# MASTERS OF ARTS
# IN
# SANSKRIT

## SCIENTIFIC LITERATURE IN SANSKRIT

**Paper-27**

NAAC ACCREDITED A+

**UTKAL UNIVERSITY**

**VANI VIHAR, BHUBANESWAR, ODISHA-751004**

**Name of the Study Material:** Systems Language & Literature

**Author Name:** ....................................................................

Edition: 2019

Copyright © Laxmi Publications Pvt Ltd.

No part of this publication which is material protected by this copyright notice may be reproduced or transmitted or utilized or stored in any form or by any means now known or hereinafter invented, electronic, digital or mechanical, including photocopying, scanning, recording or by any information storage or retrieval system, without prior permission from the publisher.

Information contained in this book has been published by Laxmi Publications Pvt Ltd and has been obtained by its authors from sources believed to be reliable and are correct to the best of their knowledge. However, the publisher and its author shall in no event be liable for any errors, omissions or damages arising out of use of this information and specially disclaim and implied warranties or merchantability or fitness for any particular use.

**Printed and Published by:**
**Laxmi Publications Pvt Ltd.**
113, Golden House
Daryaganj, New Delhi-110 002.
Tel: 011-43532500, E-mail: info@laxmipublications.com

**For:**
**Directorate of Distance & Continuing Education**
Utkal University, Vaniihar, Bhunabeswar-7, Odisha
Email: helpline@ddceutkal.ac.in
Website: www.ddceutkal.ac.in

Book Code - C–
Typeset at: Friends Enterprises, Delhi Printed at:

**DIRECTORATE OF DISTANCE & CONTINUING EDUCATION**
**UTKAL UNIVERSITY : VANI VIHAR**
**BHUBANESWAR-751007**

# From the Director's Desk

The Directorate of Distance & Continuing Education, originally established as the University Evening College way back in 1962 has travelled a long way in the last 52 years. 'EDUCATION FOR ALL' is our motto. Increasingly the Open and Distance Learning institutions are aspiring to provide education for anyone, anytime and anywhere. DDCE, Utkal University has been constantly striving to rise up to the challenges of Open Distance Learning system. Nearly one lakh students have passed through the portals of this great temple of learning. We may not have numerous great tales of outstanding academic achievements but we have great tales of success in life, of recovering lost opportunities, tremendous satisfaction in life, turning points in career and those who feel that without us they would not be where they are today. There are also flashes when our students figure in best ten in their honours subjects. Our students must be free from despair and negative attitude. They must be enthusiastic, full of energy and confident of their future. To meet the needs of quality enhancement and to address the quality concerns of our stake holders over the years, we are switching over to self instructional material printed courseware. We are sure that students would go beyond the course ware provided by us. We are aware that most of you are working and have also family responsibility. Please remember that only a busy person has time for everything and a lazy person has none. We are sure, that you will be able to chalk out a well planned programme to study the courseware. By choosing to pursue a course in distance mode, you have made a commitment for self improvement and acquiring higher educational qualification. You should rise up to your commitment. Every student must go beyond the standard books and self instructional course material. You should read number of books and use ICT learning resources like the internet, television and radio programmes etc. As only limited number of classes will be held, a student should come to the personal contact programme well prepared. The PCP should be used for clarification of doubt and counselling. This can only happen if you read the course material before PCP. You can always mail your feedback on the course ware to us. It is very important that one should discuss the contents of the course materials with other fellow learners.

We wish you happy reading.

**DIRECTOR**

# Paper-27. Scientific Literature in Sanskrit

Unit-I Ayurveda (Dirghajivitiya adhyaya of Caraka Samhita) – Chapter-I.
Unit-II Vastushastra (only Bhumi-chayana and Gruha-nirmana) from Brhatsamhita, chapter-55
Unit-III Jyotisa (Jyotis-sara ratnavali of Baikoli Mohapatra (Vol-I) 20
Unit-IV Surapala's Vrksayurveda (Chapter- I to IV)
Unit-V Basic Science in Sanskrit Literature. 20

**Books Recommended:**

1. Charaka Samhita, Chowkhamba Publication, Varanasi.
2. Brhatsamhita, Chowkhamba Vidya Bhavan, Varanasi.
3. Jyotissaratnavali, Dharmagrantha Store, Cuttack.
4. A Concise History of Science in India, Ed. D.M. Bose.
5. Indian Scientific Tradition, Ed. N.V.P. Unithiri.
6. Studies in the History of Science in Ancient India, Vol-I, Ed. by D.P. Chattopadhyaya.
7. Surapala's Vrksayurveda, by Lallanji Gopal, Sandeep Prakashan, New Delhi.

# अध्याय : १

# दीर्घञ्जीवितीयमध्यायं

## १.० प्रस्तावना

चरकसंहिता आयुर्वेदस्य श्रेष्ठतमः ग्रन्थः। अस्य रचयिता महान् चिकित्साचार्यः चरकः। चरकसंहितायाः आरम्भे आयुर्वेदस्य अवतरणं कथं जातमिति वर्णितमस्ति । तस्य अनुसारं ब्रह्मा प्रजापतिं, प्रजापतिः अश्विनीकुमारम्, अश्विनीकुमारः इन्द्रम्, इन्द्रः भरद्वाजं, भरद्वाजः अन्येभ्यः ऋषिभ्यः इदं ज्ञानम् अददात् । पुनर्वसु आत्रेयः इदं ज्ञानं स्वस्य षड्भ्यः शिष्येभ्यः अयच्छत् । ते - अग्निवेशः, भेलः, जतूकर्णः, पराशरः, हारीतः, क्षारपाणिश्च । आत्रेयस्य उपदेशम् अग्निवेशः तन्त्ररूपेण निबद्धवान् 'अग्निवेशतन्त्रे' । अस्य अग्निवेशतन्त्रस्य सङ्ग्रहं भाष्यञ्च लिखितं चरकेण यच्च 'चरकसंहिता' इति प्रसिद्धं जातम् । एषः प्राचीन ग्रन्थः अद्यपि महत्वपूर्णः अस्ति। अत विविधरोगाणां लक्षनानि, निदानानि,पथ्यानि च वर्णितानि। कस्मै औषधाय कस्य वनस्पतेः अपेक्षा, कथं च औषधनिर्माणं करणीयम् इति सर्वमत्र विस्तरेण निगदितम्।

## १.१ महत्त्वम्

आयुर्वेदस्य बृहत्रय्यां चरकसंहिता मूर्धन्या मन्यते । मध्यकाले श्रीहर्षस्य नैषधीयचरिते चरकस्य उल्लेखः कृतः अस्ति । वाग्भटः अपि चरकाय प्रथमं स्थानं कल्पितवान् अस्ति । सम्भाषायाः विचारः चरकसंहितायां विस्तृतरूपेण दत्तः अस्ति । ज्ञानार्जनाय विद्यमानेषु त्रिषु उपायेषु सम्भाषा अन्यतमा विद्यते । एतदर्थं विभिन्नपरिषदाम् आयोजनं तस्य कार्यशैली, सिद्धान्तस्थापनस्य विवरणं यत् चरकसंहितायाम् उपलभ्यते तत् वैज्ञानिकशोधसमीक्षायाः सर्वोत्कृष्टम् उदाहरणं विद्यते । एतादृशीषु परिषत्सु अनुमोदनं प्राप्य एव कोपि सिद्धान्तः ग्रन्थः वा अङ्गीक्रियते स्म । चिकित्साक्रमविषये अपि तेन लिख्यते यत् - 'वैद्यसमूह निःसंशयकराणाम्' इति । गभीररोगाणां चिकित्सावसरे अपि परस्परं विचारविमर्शं कृत्वा एव निर्णयः स्वीक्रियते स्म इति ।

अस्यां संहितायां त्रिदोष-पञ्चमहाभूतम्-रसगुणवीर्यविपाकादीनां मौलिकसिद्धान्तानां विषये वैज्ञानिकनिरूपणं दृश्यते । ज्ञान-कर्मयोः समुचितसामञ्जस्येन एव चिकित्सायाः उद्देशः सफलः भविष्यति इति ।

# १.१ आयुर्वेदीयशिक्षणम्

स्नातकः सैद्धान्तिकज्ञानेन सह व्यावहारिकदक्षताम् अवश्यं प्राप्नुयात् । देहमान-सदृष्टिमात्रेण चिकित्सा कर्तुम् अशक्या । चैतन्यं विना शरीरं निरर्थकं भवति । अतः पाञ्चभौतिकशरीरेण सह चैतन्ययुक्तस्य षड्धात्वात्मकस्य पुरुषस्य चिकित्सा कर्तव्या । चैतन्यस्य विवरणावसरे आस्तिकदर्शनानां विचारविमर्शः कृतः अस्ति । सामाजि-कव्यवस्थायां पुण्य-पापयोः धर्माधर्मयोः कारणेन अपि रोगोत्पत्तिः भवेत् इति चिन्त्यते । त्रिदोषः अपि समस्तशरीरव्यापी इत्यतः समष्टिपुरुषस्य विचारः कर्तव्यः ।

चिकित्सा काचित् अत्यन्तं वैयक्तिकप्रक्रिया विद्यते । अन्यस्य जनस्य चिकित्सा समाना न भवति । सामान्य-विशेषयोः अयं समन्वयः चरकस्य वैशिष्ट्यं वर्तते । रोगिणः परीक्षां प्रत्यक्ष-अनुमान-प्रमाणादीनां द्वारा कृत्वा ज्ञात्वा तथ्यानाम् आधारेण चिकित्सा कर्तव्या । एतदतिरिच्य दोष-दूष्य-अग्नि-सत्त्व-प्रकृति-इत्यादीनां विचारः कृतः अस्ति अत्र ।

औषधं रोगस्य निवारणाय न दीयते अपि तु प्रकृत्याः सहायकरणाय एव दीयते इति स्पष्टतया कथयति चरकः । अतः अस्मिन् अर्थे चरकस्य चिकित्सा प्राकृतिकचिकित्सा । तेन उक्तः 'स्वभावोपरमवादः' प्राकृतिकचिकित्सायाः मूलम् । रोगस्य प्रतिषेधः व्याधिनिवारणम् इत्येतत् विहाय महर्षीणाम् अवधानं दीर्घायुष्ये आसीत् । अतः एव चरकः औषधानि विहाय आचार-रसायनविषये प्रामुख्यं यच्छति । आचरपालनं विना औषधसेवनं व्यर्थमेव इति तस्य अभिप्रायः । तेन लिखितं सद्वृत्तप्रकरणम् अत्युत्तममस्ति ।

चरकः आयुर्वेदद्रव्यगुणानां वैज्ञानिकाधारभूमिकायां प्रतिष्ठापयति । द्रव्यविषये षट्पदार्थानां निरूपणं कृतवान् अस्ति । द्रव्याणां रचनानुसारं कर्मानुसारञ्च वर्गीकरणम् ऐदम्प्राथम्येन चरकसंहितायां प्राप्यते । पञ्चाशत्-महाकषायाणां कर्मानुसारं निर्णयः चरकस्य मौलिकं योगदानम् ।

चरकसंहितायाः अरबीभाषया अनुवादः ८ शतके जातः । तस्य ग्रन्थस्य आङ्ग-्लानुवादश्च जातः अस्ति । क्षेत्रीयभाषाभिः अपि अयं ग्रन्थः उपलभ्यते ।

# १.२ दीर्घञ्जीवितीयम

**अथातो दीर्घञ्जीवितीयमध्यायं व्याख्यास्यामः।।१।।**

**गुणत्रयविभेदेन मूर्तित्रयमुपेयुषे।**

**त्रयीभुवे त्रिनेत्राय त्रिलोकीपतये नमः।।१।।**

**सरस्वत्यै नमो यस्याः प्रसादात् पुण्यकर्मभिः।**

**बुद्धिदर्पणसङ्क्रान्तं जगदध्यक्षमीक्ष्यते।।२।।**

**ब्रह्मदक्षाश्विदेवेशभरद्वाजपुनर्वसुहुताशवेशचरकप्रभृतिभ्यो नमो (१) नमः।।३।।**

**पातञ्जलमहाभाष्यचरकप्रतिसंस्कृतैः।**

**मनोवाक्कायदोषाणां हर्त्रेऽहिपतये (२)नमः।।४।।**

**नरदत्तगुरूद्दिष्टचरकार्थानुगामिनी।**

**क्रियते चक्रदत्तेन टीकाऽऽयुर्वेददीपिका।।५।।**

**सभ्याः सद्गुरुवाक्सुधास्रुतिपरिस्फीतश्रुतीनस्मि वो**

**नालं तोषयितुं पयोदपयसा नाम्भोनिधिस्तृप्यति।**

**व्याख्याभासरसप्रकाशनमिदं त्वस्मिन् यदि प्राप्यते**

**क्वापि क्वापि कणो गुणस्य तदसौ कर्णे क्षणं धीयताम् (३)।।६।।**

इह हि धर्मार्थकाममोक्षपरिपन्थिरोगोपशमाय ब्रह्मप्रभृतिभिः प्रणीतायुर्वेदतन्त्रेष्वतिविस्तरत्वेन सम्प्रति वर्तमानाल्पायुर्मेधसां पुरुषाणां न सम्यगर्थाधिगमः, तदनधिगमाच्च तद्विहितार्थानामननुष्ठाने (४) तथैवोपप्लवो रुजामिति मन्नानः परमकारुणिकोऽत्रभवानग्निवेशोऽल्पायुर्मेधसामपि (५) सुखोपलम्भार्थं नातिसङ्क्षेपविस्तरं कायचिकित्साप्रधानमायुर्वेदतन्त्रं प्रणेतुमारब्धवान्। तस्मिंश्च श्लोकनिदानविमानशारीरेन्द्रियचिकित्सितकल्पसिद्धिस्थानात्मकेऽभिधातव्ये निखिलतन्त्रप्रधानार्थाभिधायकतया (६) श्लोकस्थानमेवाग्रे वक्तव्यममन्यत। वक्ष्यति हि- "श्लोकस्थानं समुद्दिष्टं तन्त्रस्यास्य शिरः शुभम्। चतुष्काणां महार्थानां स्थानेऽस्मिन् सङ्ग्रहः कृतः" (सू. अ.३०) इति। तत्र च सूत्रस्थानेऽप्युत्पन्नरोगग्रहणे त्वरया रोगोपघातिभेषजाभिधायिचतुष्केऽभिधातव्ये निखिलतन्त्रबीजभूतहेतुलिङ्गौषधाद्यर्थस्य तथा तन्त्रप्रवृत्त्यङ्गप्रयोजनवदायुर्वेदागमादेरभिधायकं दीर्घञ्जीवितीयमध्यायमभिधातुमारब्धवान्। श्रोतृजनप्रवृत्तिहेत्वभिधेयप्रयोजनसम्बन्धोपदर्शकं श्रोतृबुद्धिसमाधानाय व्याख्यानप्रतिज्ञापरमष्टपदमष्टसङ्ख्याया मङ्गलत्वेनादौ सूत्रं निवेशितवान्- अथातो दीर्घञ्जीवितीयमध्यायं व्याख्यास्याम इति। यतो निरभिधेये कचटतपादौ साभिधेये वा निष्प्रयोजने काकदन्तपरीक्षादौ प्रेक्षावतां प्रवृत्तिर्नोपलभ्यते, तेनादावभिधेयप्रयोजने अभिधातव्ये। यदुक्तं- "अभिधेयफलज्ञानविरहस्तिमितोद्यमाः। श्रोतुमल्पमपि ग्रन्थं नाद्रियन्ते हि साधवः" इति। अभिधेयवत्त्वप्रयोजनवत्त्वनिर्वाहार्थं

चाभिधेयशास्त्रयोरभिधानाभिधेयलक्षणः सम्बन्धः, प्रयोजनशास्त्रयोश्च साध्यसाधनभावलक्षणोऽभिधातव्यः। तत्रेहाभिधेयं हिताहितादिरूपेणायुः। वक्ष्यति हि- "हिताहितं सुखं दुःखमायुस्तस्य हिताहितम्। मानं च तच्च यत्रोक्तमायुर्वेदः स उच्यते" (सू. अ.३०) इति। अत्र च सर्वाभिधेयावरोधो यथास्थानमेव व्याकरणीयः। प्रयोजनं च धातुसाम्यम्। यथोक्तं- "धातुसाम्यक्रिया चोक्ता तन्त्रस्यास्य प्रयोजनम्" (सू. अ.१) इति। सम्बन्धोऽप्यायुःशास्त्रयोरभिधानाभिधेयलक्षणः, प्रयोजनेन च धातुसाम्येन सममस्य शास्त्रस्य हेयोपादेयज्ञानावान्तरव्यापारस्य साध्यसाधनभावलक्षणः। तदेतत्सर्वं दीर्घञ्जीवितीयमित्यनेन पदेन दीर्घञ्जीवितशब्दमधिकृत्य (७) कृतप्रयोजनाभिधायक 'धातुसाम्यक्रिया चोक्ता' इत्यादिवाक्याभिधायकेन दर्शितं मन्तव्यम्। ननु, प्रयोजनाभिधानं शास्त्रप्रवृत्त्यर्थीमति यदुक्तं तन्न युक्तं, यतो न प्रयोजनाभिधानमात्रेण प्रयोजनवत्तावधारणं, विप्रलम्भकसंसारमोचनप्रतिपादकादिशास्त्रेषु (८) प्रयोजनाभिधानेऽपि निष्प्रयोजनत्वदर्शनात्। अथ मन्यसे, आप्तप्रयोजनाभिधानमेतदतोऽत्र (९) यथार्थत्वं; ननु भो कथमयं प्रयोजनाभिधायी आप्तः? तदभिहितशास्त्रस्य यथार्थत्वादिति चेत्, हन्त न यावच्छास्त्रस्य प्रयोजनवत्त्वावधारणं न तावच्छास्त्रप्रवृत्तिः, न यावच्छास्त्रप्रवृत्तिर्न तावच्छास्त्रस्य यथार्थत्वावधारणं, न यावच्छास्त्रस्य यथार्थत्वावधारणं न तावच्छास्त्रस्य कर्तुराप्तत्वमवधार्यते, आप्तत्वानवधृतौ च कुतस्तदभिहितप्रयोजनवत्तावधारणमिति चक्रकमापद्यते (१०); अथ मन्यसे, मा भवतु प्रयोजनवत्तावधारणम्, अर्थरूपप्रयोजनवत्तासन्देह एव प्रवर्तको भविष्यति, कृष्यादावपि हि प्रवृत्तिरर्थसन्देहादेव; नहि तत्र कृषीवलानां फललाभावधारणं विद्यते, अन्तराऽवग्रहादेरपि सम्भाव्यमानत्वात्; नन्वेवमसत्यपि प्रयोजनाभिधाने सप्रयोजननिष्प्रयोजनशास्त्रदर्शनाच्छास्त्रत्वमेव प्रयोजनवत्तासन्देहोपदर्शकमस्तु, तथाऽप्यलं प्रयोजनाभिधानेन। नैवं, नहि सामान्येन प्रयोजनसन्देहः प्रयोजनविशेषार्थिनं तथा प्रवर्तयति यथाऽभिप्रेतप्रयोजनविशेषविषयः सन्देहः; अभिप्रेतविशेषविषयश्च सन्देहो न विशेषविषयस्मरणमन्तरा भवति, अतो ये तावदनवधृताग्निवेशप्रामाण्यास्तेषां धातुसाम्यसाधनमिदं शास्त्रं न वेत्येवमाकारविशेषसन्देहोत्पादनार्थं प्रयोजनविशेषाभिधानं; ये पुनः परमर्षेरग्निवेशस्याद्यत एवावधृतप्रामाण्यास्तेषां तदभिहितप्रयोजनवत्तावधारणेनैव प्रवृत्तिरिति युक्तं प्रयोजनाभिधानम्। प्रयोजनाभिधायिवाक्ये तु स्वल्पप्रयत्नबोध्ये प्रयोजनसामान्यसन्देहादेव प्रवृत्तिरुपपन्ना, न पुनरनेकसंवत्सरक्लेशबोध्ये शास्त्रे। तदेवं यदुच्यते- 'प्रयोजनाभिधायिवाक्यप्रवृत्तावपि प्रयोजनमभिधातव्यं, तथा चानवस्था' इति, तन्निरस्तं भवति। अथेत्यादिसूत्रेऽथशब्दो ब्रह्मादिप्रणीततन्त्रेष्वल्पायुर्मेधसामर्थानवधारणस्य, तथाऽभीष्टदेवतानमस्कारशास्त्रकरणार्थगुर्वाज्ञालाभयोरानन्तर्ये प्रयुक्तोऽपि शास्त्रादौ स्वरूपेण मङ्गलं भवत्युदकाहरणप्रवृत्तोदकुम्भदर्शनमिव प्रस्थितानाम्। ग्रन्थादौ मङ्गलसेवानिरस्तान्तरायाणां ग्रन्थकर्तृश्रोत□णामविघ्नेनेष्टलाभो भवतीति युक्तं मङ्गलोपादानम्। अथशब्दस्य

मङ्गलत्वे स्मृतिः- “ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा। कण्ठं (११)भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभौ” इति। शास्त्रान्तरे चादौ मङ्गलत्वेन दृष्टोऽयमथशब्दः। यथा- “अथ शब्दानुशासनम्” (व्या. म. भा. अ. १ पा. १ आ. १), “अथातो धर्मं व्याख्यास्यामः” (वै . अ.१आ.१सू.१) इत्यादौ। अभीष्टदेवतानमस्कारस्तु ग्रन्थादौ शिष्टाचारप्राप्तः परमशिष्टेनाग्निवेशेन कृत एव, अन्यथा शिष्टाचारलङ्घनेन शिष्टत्वमेव न स्याद् व्याख्यानान्तरायभयश्च (१२); तथा ग्रन्थाविनिवेशितस्यापि नमस्कारस्य प्रत्यवायापहत्वाच्च न ग्रन्थनिवेशनम्। यथा च गुर्वाज्ञालाभानन्तरमेतत्तन्त्रकरणं तथा “अथ मैत्रीपरः पुण्यम्” (सू. अ. १) इत्यादौ स्फुटमेव। ग्रन्थकरणे च गुर्वनुमतिप्रतिपादनेन ग्रन्थस्योपादेयता प्रदर्शिता भवति। यत् पुनः शिष्यप्रश्नानन्तर्यार्थत्वमथशब्दस्य वर्ण्यते तन्न मां धिनोति, नहि शिष्यान् पुरो व्यवस्थाप्य शास्त्रं क्रियते; श्रोतृबुद्धिस्थीकारे तु शास्त्रकरणं युक्तं, न च बुद्धिस्थीकृताः प्रष्टारो भवन्ति। अतः शब्दोऽधिकारप्रागवध्युपदर्शकः, अत ऊर्ध्वं यदुपदेक्ष्यामो दीर्घञ्जीवितीयं तदिति; यदि वा हेतौ, येन ब्रह्मादिप्रणीतायुर्वेदतन्त्राणामुक्तेन न्यायेनोत्सम्बन्धत्वमिव (१३), अतो हेतोर्दीर्घञ्जीवितीयं व्याख्यास्याम इति योजनीयम्। दीर्घञ्जीवितीयमित्यत्र दीर्घञ्जीवितशब्दोऽस्मिन्नस्तीति मत्वर्थे “अध्यायानुवाकयोर्लुक् च” (पा. अ. ५/२/६०) इति छप्रत्ययः। यदि वा दीर्घञ्जीवितशब्दमधिकृत्य कृतो ग्रन्थोऽध्यायरूपस्तन्त्ररूपो वा, इत्यस्यां विवक्षायाम् “अधिकृत्य कृते ग्रन्थे” (पा. अ. ४/३/८७) इत्यधिकारात् “शिशुक्रन्दयमसभ” (पा. अ. ४/३/८८) इत्यादिना छः। एवमन्यत्राप्येवञ्जातीये मन्तव्यम्। अत्र च सत्यपि शब्दान्तरे दीर्घञ्जीवितशब्देनैव सञ्ज्ञा कृता, दीर्घञ्जीवितशब्दस्यैव प्रवचनादौ निवेशात् प्रशस्तत्वाच्च। ‘दीर्घञ्जीवितशब्दोऽस्मिन्नस्ति’ इति, दीर्घञ्जीवितशब्दमधिकृत्य कृतो वा, इत्यनया व्युत्पत्त्या दीर्घञ्जीवितीयशब्दस्तन्त्रेऽध्याये च प्रवर्तनीयः। तेन दीर्घञ्जीवितीयं व्याख्यास्याम इत्यनेन तन्त्रं (१४)प्रति व्याख्यानप्रतिज्ञा लब्धा भवति, पुनर्दीर्घञ्जीवितीयमिति पदमावर्त्याध्यायपदसमभिव्याहृतमध्यायव्याख्यानप्रतिज्ञां लम्भयति। दृष्टं चावृत्य पदस्य योजनं, यथा- अपामार्गतण्डुलीये “गौरवे शिरसः शूले पीनसे” (सू. अ. २) इत्यादौ ‘शिरस’ इति पदं ‘गौरवे’ इत्यनेन युज्यते, आवृत्य ‘शूले’ इत्यनेन च। अतश्च यदुच्यते- अकृततन्त्रप्रतिज्ञस्याध्यायप्रतिज्ञा ऊनकायमानेति, तन्निरस्तं भवति। यदि वा, अध्यायप्रतिज्ञैवास्तु, तयैव तन्त्रप्रतिज्ञाऽप्यर्थलब्धैव, न ह्यध्यायस्तन्त्रव्यतिरिक्तः, तेनावयवव्याख्याने तन्त्रस्याप्यवयविनो व्याख्या भवत्येव; यथा- अङ्गुलीग्रहणेन देवदत्तोऽपि गृहीतो भवति। अवयवान्तरव्याख्यानप्रतिज्ञा तु (१५)न लभ्यते, तां तु प्रत्यध्यायमेव करिष्यति। अध्यायमिति अधिपूर्वादिङः “इङश्च” (पा. अ. २/४/४७) इति कर्मणि घञा साध्यम्। तेन अधीयते (१६)इत्यध्यायः। न चानया व्युत्पत्त्या प्रकरणचतुष्कस्थानादिष्वतिप्रसङ्गः, यतो योगरूढेयमध्यायसञ्ज्ञाऽध्यायस्य प्रकरणसमूहविशेष एव दीर्घञ्जीवितीयादिलक्षणे

पङ्कजशब्दवद्वर्तते न योगमात्रेण वर्तते। वक्ष्यति हि- "अधिकृत्येयमध्यायनामसञ्ज्ञा प्रतिष्ठिता" (सू. अ. ३०) इति; नामसञ्ज्ञा योगरूढसञ्ज्ञेत्यर्थः। यदि वा करणाधिकरणयोरर्थयोः "अध्यायन्यायोद्यावसंहाराश्च" (पा. अ. ३/३/११२) इतिसूत्रेण निपातनादध्यायपदसिद्धिः। अधीयतेऽस्मिन्ननेन वाऽर्थविशेष इत्यध्यायः। अतिप्रसक्तिनिषेधस्तूक्तन्यायः। व्याख्यास्याम इति व्याङ्पूर्वात् ख्यातेर्लृटा साध्यम्। चक्षिङो हि प्रयोगेऽनिच्छतोऽपि व्याख्यातुः क्रियाफलसम्बन्धस्य दुर्निवारत्वेन "स्वरितञित" (पा. अ. १/३/७२) इत्यादिनाऽऽत्मनेपदं स्यादिति। 'वि' इति विशेषे, विशेषाश्च व्याससमासादयः। आङयं क्रियायोगे, ये तु मर्यादायामभिविधौ वा आङ्प्रयोगं मन्यन्ते तेषामभिप्रायं न विद्मः। यतो मर्यादायामभिविधौ चाङः प्रातिपदिकेन योगः स्यात्; यथा- "आसमद्रक्षितीशानां" (र. वं. अ. १) "आपाटलीपुत्राद्वृष्टो देव" इत्यादौ, इहापि च तथा। क्रियायोगविरहे "उपसर्गाः क्रियायोगे" (पा. अ. १/४/५९) इति नियमादाङ उपसर्गत्वं न स्यात्; ततश्चानुपसर्गेणाङा व्यवधानाद् वेरुपसर्गस्य प्रयोगो न स्यात्। येनाव्यवहितः सजातीयव्यवहितो वा धातोरुपसर्गो भवति। व्याङोरुभयोरप्यनुपसर्गत्वे तत्सम्बन्धोचितभूरिप्रातिपदिककल्पनागौरवप्रसङ्गः स्यात्; तस्मात् क्रियायोगित्वमेवाङो न्याय्यम्। अथ, अतः, दीर्घं, जीवितीयम्, अध्यायं, वि, आ, ख्यास्याम इत्यष्टपदत्वम्।।१।।

**इति ह स्माह भगवानात्रेयः।।२।।**

**व्याख्या :**

ननु कथमग्निवेशः सकलपदार्थाशेषविशेषज्ञानव्याख्येयमायुर्वेदं व्याख्यास्यति; यतो न तावद्भेषजादीनामशेषविशेषः प्रत्यक्षज्ञेयः, सर्वपदार्थानां विशेषाणां प्रत्यक्षाविषयत्वात्; अन्वयव्यतिरेकाभ्यां तु सर्वपदार्थावधारणं दुष्करमेव , यत एकमेव मधु स्वरूपेण जीवयति, मारयति चोष्णं समघृतं च, कफप्रकृतेर्हितमहितं वातप्रकृतेः, अनूपे सात्म्यमसात्म्यं मरौ, शीते सेव्यमसेव्यं ग्रीष्मे, हितमवृद्धे वृद्धे चाहितम्, अल्पं गुणकरमाबाधकरमत्युपयुक्तम्, आमतां गतमुदरे उपक्रमविरोधित्वाददतिविभ्रमकरं, काकमाचीयुक्तं पक्वनिकुचेन च सहोपयुक्तं मरणाय अथवा बलवर्णवीर्यतेजौपघाताय भवति, इत्येवमादि तत्तद्युक्तं तत्तच्छतशः करोति; अत एवैकस्यैव मधुनो रूपं यदाऽनेन प्रकारेण दुरधिगमं, तदाऽत्र कैव कथा निखिलपदार्थाशेषविशेषज्ञानस्य; अजानंश्च व्याचक्षाणः कथमुपादेयवचन इति कृत्वा गुरोराप्तात् प्रतिपन्नं प्रतिपादयिष्याम इति दर्शयन् तामिमां शङ्कां निराचिकीर्षुर्गुरूक्तानुवादरूपतां स्वग्रन्थस्य दर्शयन्नाह- इति ह स्माह भगवानात्रेय इति। अत्र इतिशब्दो वक्ष्यमाणार्थपरामर्शकः, हशब्दोऽवधारणे; यथा- "न ह वै सशरीरस्य प्रियाप्रिययोरपहतिरस्ति" इति, अत्र न हेति नैवेत्यर्थः। अत्र 'स्माह' इति स्मशब्दप्रयोगेण भूतमात्र एव लिडर्थे "लट् स्मे" (पा.अ. ३पा. २सू. ११८) इति लट्; न भूतानद्यतनपरोक्षे, आत्रेयोपदे-

शस्याग्निवेशं प्रत्यपरोक्षत्वात्। यथा च भूतमात्रे लिड् भवति तथाच दर्शयिष्याम:। भगं पूजितं ज्ञानं, तद्वान्; यथोक्तम्- "उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम्। वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति"; यदि वा भगशब्द: समस्तैश्वर्यमाहात्म्यादिवचन: ; यथोक्तम्- "ऐश्वर्यस्य समग्रस्य वीर्यस्य यशस: श्रिय:। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना:" इति। अत्रेरपत्यमात्रेय:; अनेन विशुद्धवंशत्वं दर्शितं भवति। अत्रान्ये वर्णयन्ति- "चतुर्विधं सूत्रं भवति- गुरुसूत्रं, शिष्यसूत्रं, प्रतिसंस्कर्तृसूत्रम्, एकीयसूत्रं चेति"। तत्र गुरुसूत्रं यथा- "नैतद्बुद्धिमता द्रष्टव्यमग्निवेश" (सू.अ.४) इत्यादि, प्रतिसंस्कर्तृसूत्रं यथा- "तमुवाच भगवानात्रेय:" (सू.अ.४) इत्यादि, शिष्यसूत्रं यथा- "नैतानि भगवन् पञ्चकषायशतानि पूर्यन्ते" (सू.अ.४) इत्यादि, एकीयसूत्रं यथा- "कुमारस्य शिर: पूर्वमभिनिर्वर्तत इति कुमारशिरा भरद्वाज:" (शा.अ.६) इत्यादि। तेनाद्यं व्याख्यानप्रतिज्ञासूत्रं गुरोरेव, शिष्यस्याग्निवेशस्य व्याख्यानेऽनधिकारत्वात्। द्वितीयं च सूत्रं प्रतिसंस्कर्तु:। इतिशब्देन च प्रकारवाचिना 'दीर्घञ्जीवितीयं व्याख्यास्याम' इति परामृश्यते; तेनाहस्मेति भूतानद्यतनपरोक्ष एव भवति, प्रतिसंस्कर्तारं प्रत्यात्रेयोपदेशस्य परोक्षत्वात्। अनेन च न्यायेन तमुवाच भगवानात्रेय इत्यादावपि लिड्विधिरुपपन्नो भवति। सुश्रुते च "यथोवाच भगवान् धन्वन्तरि:" (सु.सू.अ.१) इति प्रतिसंस्कर्तृसूत्रमिति कृत्वा टीकाकृता "लिड्विधिरुपपादित:' इति। अत्र ब्रूम:- यत्तावदुक्तं शिष्यस्याग्निवेशस्य व्याख्यानानधिकारादिदं गुरो: सूत्रं; तन्न, नहि जात्या गुरुत्वमस्ति, यत: स एवात्रेय: स्वगुरुमपेक्ष्य शिष्य:, अग्निवेशादीनपेक्ष्य गुरु:; एवमग्निवेशोऽपि ग्रन्थकरणकाले स्वबुद्धिस्थीकृताञ् शिष्यान् प्रति गुरुरिति न कश्चिद्दोष:। यत्पुनर्द्वितीयसूत्रस्य प्रतिसंस्कर्तृसूत्रतया भूतानद्यतनपरोक्षे लिड्विधिरुपपाद्यते, तत्र विचार्यं- किमिदं द्वितीयं सूत्रं पूर्ववाक्यैकतापन्नं न वा ? यद्येकवाक्यतापन्नं तदा सुश्रुते- तथा व्याख्यास्यामो यथोवाच धन्वन्तरिरिति योजनीयं, तथाच तथा व्याख्यास्याम इति क्रियैकवाक्यतापन्नमुवाचेति पदं न भिन्नकर्तृकं भवितुमर्हति, तथाच कुतो लिड्विधि:; अथ नैकतापन्नं, तदा गौरश्व: पुरुषो हस्तीतिवन्नार्थसङ्गति:। किञ्च जतूकर्णादौ प्रतिसंस्कर्तृश्रुतिगन्धोऽपि नास्ति, तत् कथं "नानाश्रुतपरिपूर्णकण्ठ: शिष्यो जतूकर्ण: प्राञ्जलिरधिगम्योवाच" इत्यादौ लिड्विधि:। अनेन न्यायेन चरकेऽपि प्रतिसंस्कर्तृसूत्रपक्षे लिड्विधिर्नास्ति, तस्माच्चरकेऽग्निवेश: सुश्रुते सुश्रुत एव सूत्राणां प्रणेता, क्वचित् किञ्चिदर्थं स्तोतुं निन्दितुं वाऽऽख्यायिकारूपं पुराकल्पं दर्शयन् किमपि सूत्रं गुरूक्तानुवादरूपतया किमप्येकीयमतानुवादरूपतया लिखति; प्रतिसंस्कर्ता त्वयं ग्रन्थं पूरयति तदाद्यग्रन्थकर्तृतयैव। लिड्विधिस्तु भूतानद्यतनमात्र एव छन्दोविहितो भाषायामपि वर्णनीय:, अन्यथा उवाचेति पदं जतूकर्णादौ न स्यात्; तथा च हरिवंशे धन्योपाख्याने "मामुवाच" इति, तथा "अहमुवाच" इति च न स्यात्; यथा "स मामुवाचाम्बुचर: कूर्मो मानुषवत् स्वयम्। किमाश्चर्यं मयि मुने धन्यश्चाहं कथं

विभो" (हरिवंशे, विष्णुपर्व २अ.११०) इति, तथा "स्वयम्भुवचनात् सोऽहं वेदान् वै समुपस्थितः। उवाच चैनांश्चतुरः" इति। यदपि 'इति ह स्माह' इत्यत्र इतिशब्देन पूर्वसूत्रं परामृश्यते; तन्न, येन दीर्घञ्जीवितीयादिसूत्रमात्रस्य तदर्थस्य वा गुरूक्तत्वप्रतिपादने सति नैवोत्तरत्राभिधेयाभिधानेन निखिलतन्त्रस्य गुरूक्तानुवादरूपतया करणं श्रोतृश्रद्धाकरणं प्रतिपादितं भवति। भवति तु भावयितुं यथा पुरा व्याख्यातं, तस्मात्तदेव न्याय्यमिति। अग्निवेशस्य व्याख्यास्याम इति बहुवचनमेकस्मिन्नप्यस्मदः प्रयोगाद्बहुवचनप्रयोगस्य साधुत्वात्; साधु हि वदन्ति वक्तारो- 'वयं करिष्यामः' इति। भगवानात्रेय इत्यत्र त्वेकवचननिर्देशः कृतः, भगवानित्यनेनैवात्रेयस्य गुरोर्गौरवस्य दर्शितत्वात्।।२।।

**दीर्घं जीवितमन्विच्छन्भरद्वाज उपागमत्।**

**इन्द्रमुग्रतपा बुद्ध्वा शरण्यममरेश्वरम्।।३।।**

**व्याख्याः**

ननु यथाऽग्निवेशस्यायुर्वेदस्य दुरधिगमत्वेन प्रत्यक्षतो वाऽन्वयव्यतिरेकाद्वा ज्ञानं न सम्भाव्यते, एवमात्रेयस्यापि कथमायुर्वेदज्ञानं स्यात्, यन्मूलमग्निवेशस्यायुर्वेदज्ञानं समीचीनमुच्यते, इत्याशङ्क्यायुर्वेदस्याविप्लुतागमत्वं दर्शयन्नाह- दीर्घं जीवितमित्यादि। जीवितं शरीरेन्द्रियसत्त्वात्मसंयोगः। तच्च दीर्घमिति दीर्घकालसम्बन्धि, कालशब्दोऽप्यत्र लुप्तनिर्दिष्टो द्रष्टव्यः। यत्तन्त्रशैली चेयमाचार्यस्य यत आदिमध्यान्तलोपान् करोति, ये लुप्ता अपि गम्यन्त एव। यथा "ग्राम्यानूपौदकरसा" (सू.अ.२१) इत्यत्र मांसशब्दो लुप्तः, तथा 'दग्धविद्ध' इत्यत्र विषशब्दो लुप्त इत्यादि। अन्विच्छन्निति अनुरूपं दीर्घमिच्छन्। भरद्वाज इति गोत्रनाम। 'उग्रतपा' इति विशेषणेन भरद्वाजस्य मानुषस्यापीन्द्राभिगमनशक्तिः, तथा शरण्यत्वप्रतीतिशक्तिश्चोपदर्श्यते; अचिन्त्यो हि तपसां प्रभावो येनागस्त्यो महोदाधिमपि चुलुकनिपेयमकरोत्। नच वाच्यमुग्रतपस्त्वेनैव किमित्ययमायुर्वेदमपि न बुध्यते, यतस्तपःप्रभावोऽपि प्रतिनियतविषयत्वान्न सर्वत्र शक्तिमान्, शक्तिश्चास्य कार्योन्नेया; तेन गुरुनिरपेक्षायुर्वेदज्ञानलक्षणकार्यादर्शनान्न तत्तपस्तत्र समर्थमित्यवधारयामः; किंवा गुरुपूर्वक्रमेणैवायुर्वेदज्ञानं फलतीतीन्द्रमुपागमद्भरद्वाजः। अथ कथं ब्रह्मादिष्वायुर्वेदपूर्वगुरुषु विद्यमानेष्विन्द्रमेवायमुपागमत्? युक्तं च प्रधानगुरोरेव श्रवणं, यतः शिष्यपरम्परासञ्चारिणी विद्याऽसम्यग्ग्रहणादिदोषात् पात्रपरम्परासञ्चार्यमाणमधुवत् क्षीणाऽपि सम्भाव्येत; अत आह- बुद्ध्वा शरण्यममरेश्वरमिति। यस्मादयमेवेन्द्रोऽल्पायुः, स एव भयत्रस्तानां यथा शरण्यो रक्षणहितो न तथा ब्रह्मादयः, तेन तमेवोपागमत्। अमरेश्वर इत्यनेन चेन्द्रस्य रक्षणोपयुक्ततां दर्शयति; राजा हि प्रजारक्षणे प्रयत्नातिशयवान् भवति। ननु दीर्घं जीवितमन्विच्छन्नित्यत्र दीर्घस्याव्यवस्थिततत्वेन कियत्कालं तद्दीर्घमभिप्रेतं? तत्र युगानुरूपं वर्षशतं, यदुक्तं- "वर्षशतं खल्वायुषः प्रमाणमस्मिन् काले" (वि.अ.३) इति। एतच्च कलिकालादौ

परमायु:कालस्य यथा यथा क्षयस्तथाऽऽयुषः क्षयः। यदाह- "संवत्सरशते पूर्णे याति संवत्सरः क्षयम्। देहिनामायुषः काले यत्र यन्मानमिष्यते" (वि.अ.३) इति। एतदनुसारेण पूर्वयुगेष्वायु:प्रकर्षः। यदाह भगवान् व्यासः- "पुरुषाः सर्वसिद्धाश्च चतुर्वर्षशतायुषः। कृते त्रेतादिकेऽप्येवं पादशो ह्रसति क्रमात्" इति। कर्मानुरूपं चायुर्नियतं वा, अनियतं वा भवति। तत्र बलवत्कर्मारब्धं नियतं, यथाऽयमस्मिन् काले म्रियत एव परम्; अबलवत्कर्मारब्धं त्वनियतं, तद्यदा दृष्टं विषादि मारकं प्रत्ययमासादयति तदा सञ्जातबलं मारयति, यदा न प्राप्नोति दृष्टं मारकं कारणं तदा युगानुरूपायु:प्राप्तौ युगप्रभावजर्जरीकृतशरीरं मारयति। अत्र दृष्टान्तश्चाचार्येण दर्शितः "यथा ह्यक्षः स्वगुणोपपन्नो वाह्यमानो यथाकालं स्वप्रमाणक्षयादेवावसानं गच्छति, स एवाक्षोऽतिभाराधिष्ठित" इत्यारभ्य यावत् "अन्तरा व्यसनमापद्यते; तथाऽनियतायुषोऽन्तरा प्राणा अपराधान्निरुध्यन्ते" (वि.अ.३) इत्यन्तेन। यदा त्वनियतायुषो रसायनमाचरन्ति तदा तत्प्रभावाद्युगप्रभावनियतायुर्लङ्घनं भवति। यदाह- "तानि यावन्ति भक्षयेत्। जीवेद्वर्षसहस्राणि तावन्त्यागतयौवनः" (चि.अ.१) इत्यादि। न तु बलवत्कर्मनियतस्यायुषो लङ्घनमस्ति, यदाह- "कर्म किञ्चित् क्वचित्काले विपाके नियतं महत्। किञ्चित्त्वकालनियतं प्रत्ययैः प्रतिबोध्यते" (वि.अ.३) इति। हन्त यद्येवं तदा सर्वत्र कर्मैव कारणं मरणे जीविते वा तथा व्याधौ व्याध्यपगमे वा, तत् किमनेनायुर्वेदेन कर्मजनितफलानुविधायिना; तथाहि- यत्तावदुच्यते- नियतं कर्म, तत्र तावदायुर्वेदव्यापारो नास्ति, येन नियतेनैव कर्मणा मिलितमपि दृष्टं तत्र विफलीक्रियते; यच्चाबलवत्कर्मारब्धत्वेनानियतमायुरुच्यते तदपि न श्रद्धाधीनं, येनादृष्टशक्तिपराभवेन दृष्टस्य कार्यकारितां दृष्ट्वाऽपि विवादाध्यासिते विषयेऽदृष्टमेव कारणमवधारयामः, दृष्टं त्वदृष्टाकृष्टमेव तत्र भवति। नैवम्, एवं सति सर्वानुष्ठानस्योपरमप्रसङ्गः; किञ्च केवलकर्मवादिनो दृष्टमपवदतोऽदृष्टोत्पत्तिरेव न प्राप्नोति, अदृष्टं हि दृष्टाग्निष्टोमादिजन्यं, दृष्टं च कारणं कर्मवादिनोऽभिमतम्; अथादृष्टकारणं दृष्टमिच्छन्ति हन्त तर्हि तेनैव न्यायेन दहनादीनामपि किमिति शीतापहत्वस्फोटादिजनकत्वादि न स्वीक्रियते; किञ्च केवलकर्मवादिनो दृष्टे कारणे व्याप्तिग्रहणाभावाददृष्टानुमानमेव न स्यात्, तस्माद्दृष्टमदृष्टं च कारणम्। तत्र क्वचिददृष्टं दृष्टेन बाध्यते, क्वचिच्च दृष्टमदृष्टेनेति; तेन यत्र पुरुषे बलवन्नियतमरणकारणमदृष्टं , तत्र जीवितमरणयोरकिञ्चित्करोऽयमायुर्वेदः, किन्तु तत्रापि नियतमरणकालादर्वाग्दु:खजनकव्याधिप्रशमने व्याप्रियत एव यदि व्याधिरपि तस्य नियतकर्मजन्यो न स्यात्; यत्तु कर्मानियतविपाकं भवति तत्प्रति सर्वथा प्रयोजनवदायुर्वेदोपादानम्। यत्तु युगनियतमायुः, तन्नातिबलवता कर्मणा नियमितं; येन रसायनप्रयोगात्तद्बाधनं दृष्टत्वादनुमन्यन्ते, न तु स्वस्थहितातुरहितचिकित्साभ्याम्। अयं च वादः शास्त्रकारेण स्वयमेव प्रपञ्चेन निर्लोचनीय इति नेह प्रतन्यते।।३।।

**ब्रह्मणा हि यथाप्रोक्तमायुर्वेदं प्रजापतिः।**

**जग्राह निखिलेनादावश्विनौ तु पुनस्ततः।।४।।**

**अश्विभ्यां भगवाञ्छक्रः प्रतिपेदे ह केवलम्।**

**ऋषिप्रोक्तो भरद्वाजस्तस्माच्छक्रमुपागमत्।।५।।**

**व्याख्याः**

कथमिन्द्र एव शरण्यो न ब्रह्मादय इत्याह- ब्रह्मणा हीत्यादि। हि यस्मादर्थे। प्रजापतिर्दक्षनामा। प्रोक्तमिति प्रकर्षेणोक्तं, प्रकर्षश्चानवशेषेणाभिधानम्। यथेत्यनेन तथाशब्दस्य नित्यसम्बन्धस्याकर्षणाद्यादृशं प्रोक्तं तादृशमेव जग्राह। निखिलेनेति अनवशेषेण। अश्विनौ तु ततः प्रजापतेर्जगृहतुः। अत्रापि यथाप्रोक्तं निखिलेन चेतिपदं तथैव योजनीयम्। एवमश्विभ्यां भगवाञ्छक्रः प्रतिपेदे हेत्यत्रापि यथाप्रोक्तमित्यादि योजनीयम्। हशब्दस्त्ववधारणे, तेन प्रतिपेदे एव परं शक्रो नतु कस्मैचिदायुर्वेदं दत्त-वानित्यर्थः। अनेन च ग्रन्थेनान्यूनाधिकायुर्वेदागमोपदर्शकेन यथा ब्रह्मण आयुर्वेदज्ञानं तथेन्द्रस्यापीति दर्शितम्। तेन ब्रह्मणो वाऽऽयुर्वेदः श्रूयते इन्द्राद्वेति न किञ्चिदर्थतो विशेषः। इन्द्रे त्विदमधिकं- यदयमसङ्क्रामितविद्यत्वेन शिष्यार्थी। यदुक्तं- "यो हि गुरुभ्यः सम्यग-ादाय विद्यां न प्रयच्छत्यन्तेवासिभ्यः स खल्वृणी गुरुजनस्य महदेनो विन्दति" इति, अतोऽकृतशिष्यत्वेन शिष्यार्थित्वविशेषयोगाद्ब्रह्मादिभ्यो विशेषेणेन्द्र एव शरण्य इति। ब्रह्मणस्तु परमगुरोर्विदितसकलवेदस्य सर्वत्रातिरोहितमतेरायुर्वेदज्ञानं स्वतःसिद्धमेवेति न गुर्वन्तरापेक्षा। एतच्च ब्रह्मादिगुरुपरम्परोपदर्शनमायुर्वेदस्याविप्लुतागमोपदर्शनार्थं तथा महापुरुषसेवितत्वेनोपादेयत्वोपदर्शनार्थं च। वचनं हि- "तत्र यन्मन्येत महद्यशस्विसुधीरप-ुरुषासेवितम्" इत्यादि यावत् "तदभिप्रपद्येत शास्त्रम्" (वि.अ.८) इति। ऋषिप्रोक्त इति वक्ष्यमाणवृत्तान्तेन ऋषिप्रोक्तः। तस्मादिति यस्मादिन्द्र एव विशेषेण शरण्यः।।४-५।।

**विघ्नभूता यदा रोगाः प्रादुर्भूताः शरीरिणाम्।**

**तपोपवासाध्ययनब्रह्मचर्यव्रतायुषाम् ।।६।।**

**तदा भूतेष्वनुक्रोशं पुरस्कृत्य महर्षयः।**

**समेताः पुण्यकर्माणः पार्श्वे हिमवतः शुभे।।७।।**

**व्याख्याः**

अथ कथमयमृषिप्रोक्त इत्यायुर्वेदस्य मर्त्यलोकागमे हेतुमाह- विघ्नभूता इत्यादि। विघ्नभूता इत्यन्तरायस्वरूपाः। रुजन्तीति रोगाः। प्रादुर्भूता इत्याविर्भूताः। अयं च रोगप्रादुर्भावः कृतयुगान्ते बोद्धव्यः। वक्ष्यति हि- "भ्रश्यति तु कृतयुगे" (वि.अ.३)

इत्यादिना रोगप्रादुर्भावं जनपदोद्ध्वंसनीये। प्रादुर्भावश्च पूर्वसिद्धस्यैवाविर्भावः। तेन रोगसन्ताननित्यताऽप्यविरुद्धा भवत्यर्थेदशमहामूलीये (सू.अ.३०) वक्तव्या। शीर्यत इति शरीरं, तदस्यास्तीति शरीरी। एतेन शरीरं स्वत एव शीर्यमाणं रोगसम्बन्धात्तु नितरां शीर्यत इति सूचयति। केषां विघ्नभूता इत्याह- तपोपवासाध्ययनेत्यादि। रोगग्रस्ता हि शरीरिणस्तपःप्रभृतीनि कर्तुं न पारयन्ति विकृतत्वात्; तथा, आयुषश्च मारकत्वेन केचिद्वदा विरोधका भवन्ति। अत्र तपश्चान्द्रायणादि, उपवासः क्रोधादिपरित्यागः सत्याद्युपादानं च, वचनं हि- "उपावृत्तस्य पापेभ्यः सहवासो गुणे हि यः। उपवासः स विज्ञेयो न शरीरस्य शोषणम्" इति; अध्ययनं वेदाध्ययनं, ब्रह्मणे मोक्षाय चर्यं ब्रह्मचर्यमुपस्थनिग्रहादि, व्रतमीप्सितकामो नियमः, आयुरुक्तम्। तपोपवासेति प्रयोगः पूर्वत्रासिद्धविधेरनित्यत्वेन तपःसकारस्थानिभूतयलोपस्य सिद्धत्वाज्ज्ञेयः, यथा "नोपधायाः" (पा.अ.६पा.४सू.७) इति। भूतेषु प्राणिषु। अनुक्रोशमिति अनुकम्पां, कस्मात्? अनेकार्थत्वाद्धातूनाम्। पुरस्कृत्य आदृत्य। एतेन प्राणिरोगहरणमेव प्रधानमायुर्वेदोपगमने महर्षीणां फलम्; आयुःप्रकर्षस्त्वनुषङ्गसिद्धस्तेषां महात्मनामिति भावः। नरेष्विति वक्तव्ये यदयं भूतेष्विति सामान्यशब्दं करोति, तेन न समानजीवप्रयुक्तेयमनुकम्पा , किन्तु प्राणिमात्रप्रयुक्तेति समदर्शितामृषीणां दर्शयति। महान्तश्च ते ऋषयश्चेति महर्षयः; अनेन चतुर्विधा अपि ऋषयः- ऋषिका, ऋषिपुत्रा, देवर्षयो, महर्षयश्च गृह्यन्ते; महर्ष्यनुगामित्वादृषिकादीनामपि ग्रहणम्। पुण्यं पावनं कर्म येषां ते पुण्यकर्माणः। पर्शुकाभिस्तृतं पार्श्वं, तेन पार्श्वमिव (ततं) पार्श्वम्। शुभे इति पदं कर्तव्यसमाध्यनुगुणोपदर्शनार्थं, यतः शुभे हि देशे समाधयः प्रसीदन्ति।।६-७।।

**अङ्गिरा जमदग्निश्च वसिष्ठः कश्यपो भृगुः।**

**आत्रेयो गौतमः साङ्ख्यः पुलस्त्यो नारदोऽसितः।।८।।**

**अगस्त्यो वामदेवश्च मार्कण्डेयाश्वलायनौ।**

**पारिक्षिर्भिक्षुरात्रेयो भरद्वाजः कपिञ्ज(ष्ठ)लः।।९।।**

**विश्वामित्राश्मरथ्यौ च भार्गवश्च्यवनोऽभिजित्।**

**गार्ग्यः शाण्डिल्यकौण्डिल्यौ(न्यौ)वार्क्षिर्देवलगालवौ।।१०।।**

**साङ्कृत्यो बैजवापिश्च कुशिको बादरायणः।**

**बडिशः शरलोमा च काप्यकात्यायनावुभौ।।११।।**

**काङ्कायनः कैकशेयो धौम्यो मारीचकाश्यपौ।**

**शर्कराक्षो हिरण्याक्षो लोकाक्षः पैङ्गिरेव च।।१२।।**

**शौनकः शाकुनेयश्च मैत्रेयो मैमतायनिः।**

**वैखानसा वालखिल्यास्तथा चान्ये महर्षयः।।१३।।**

**ब्रह्मज्ञानस्य निधयो द(य)मस्य नियमस्य च।**

**तपसस्तेजसा दीप्ता ह्रूयमाना इवाग्नयः।।१४।।**

**सुखोपविष्टास्ते तत्र पुण्यां चक्रुः कथामिमाम् ।।१५।**

**व्याख्या :**

के ते महर्षय इत्याह- अङ्गिरा इत्यादि। बह्वृषीणामत्र कीर्तनं ग्रन्थादौ पापक्षयहेतुत्वेन, तथाऽऽयुर्वेदस्यैवंविधमहापुरुषसेवितत्वेन सेव्यत्वोपदर्शनार्थं चेति। एषु च मध्ये केचिद्यायावराः, केचिच्छालीनाः, केचिदयोनिजाः, एवम्प्रकाराश्च सर्वे मिलिता बोद्धव्याः। भिक्षुरित्यात्रेयविशेषणं, वक्ष्यति हि- "तन्नेति भिक्षुरात्रेयः" (सू.अ.२५) इति। वैखानसा इति कर्मविशेषप्रयुक्ता सञ्ज्ञा। वालखिल्यास्तु स्वल्पप्रमाणाः केचिदृषयः। निधय इव निधयोऽक्षयस्थानत्वेन। दमो दान्तत्वम्। इमामिति अग्रे वक्ष्यमाणाम्।।८-१४।।-

**धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम्।।१५।।**

**रोगास्तस्यापहर्तारः श्रेयसो जीवितस्य च।**

**प्रादुर्भूतो मनुष्याणामन्तरायो महानयम्।।१६।।**

**कः स्यात्तेषां शमोपाय इत्युक्त्वा ध्यानमास्थिताः।**

**अथ ते शरणं शक्रं ददृशुर्ध्यानचक्षुषा।।१७।।**

**स वक्ष्यति शमोपायं यथावदमरप्रभुः।१८।**

**व्याख्या :**

धारणाद्धर्मः स चात्मसमवेतः कार्यदर्शनानुमेयः, अर्थः सुवर्णादिः, काम्यत इति कामो वनितापरिष्वङ्गादिः, मोक्षः संसारविमोक्षः। आरोग्यं रोगाभावाद्धातुसाम्यम्। मूलं कारणम्। उत्तममिति प्रधानं; तेनारोग्यं चतुर्वर्गे प्रधानं कारणं, रोगगृहीतस्य क्वचिदपि पुरुषार्थेऽसमर्थत्वादित्युक्तम्। तस्यापहर्तार इति आरोग्यस्यापहर्तारः; इदमेव च रोगाणामारोग्यापहरणं यदनर्थलाभः; न पुनरुत्पन्नो रोगः पश्चादारोग्यमपहरति, भावाभावयोः परस्पराभावात्मकत्वात्। श्रेयसो जीवितस्य चेति श्रेयोवज्जीवितं हितत्वेन सुखत्वेन चार्थेदशमहामूलीये (सू.अ.३०) वक्ष्यमाणं, तस्य जीवितस्यापहर्तार इति योजनीयम्; अश्रेयोजीवितमहितत्वेन दुःखहेतुतया चानुपादेयमिति कृत्वा तदपहरणमिह नोक्तम्। अत्र सुखहितजीवितोपघातो धर्माद्युपघातेनैव लब्धः; तेन वयं पश्यामः- श्रेयःशब्देन

सामान्येनाभ्युदयवाचिना धर्मादयोऽभिधीयन्ते, जीवितशब्देन च जीवितमात्रं, यतो जीवितं स्वरूपेणैव सर्वप्राणिनां निरुपाध्युपादेयं; वचनं हि- "आचकमे च ब्रह्मण इयमात्मा आशी:- आयुष्मान् भूयासम्" इति। यत्त्वत्यन्तदु:खगृहीतस्य जीवितं जिहासितं, तत्र दु:खस्यात्यन्तजिहासितस्यान्यथाहातुमशक्यत्वात् प्रियमपि जीवितं त्यक्तुमिच्छति न स्वरूपेण। अन्तराय इति धर्मादिसाधने बोद्धव्य:। अयमिति रोगप्रादुर्भावरूप:। तेषामिति रोगाणाम्। शरणमिति रक्षितारम्। शक्तत्वाच्छक्र उच्यते। ध्यानं समाधिविशेष:, तदुपलब्धिसाधनत्वाच्चक्षुरिव ध्यानचक्षु:, 'तेन स वक्ष्यति शमोपायं यथावदमरप्रभु:' इति ध्यानचक्षुषा ददृशुरिति योजना।।१५-१७।।-

**क: सहस्राक्षभवनं गच्छेत् प्रष्टुं शचीपतिम्।।१८।।**

**अहमर्थे नियुज्येयमत्रेति प्रथमं वच:।**

**भरद्वाजोऽब्रवीत्तस्मादृषिभि: स नियोजित:।।१९।।**

**स शक्रभवनं गत्वा सुरर्षिगणमध्यगम् ।**

**ददर्श बलहन्तारं दीप्यमानमिवानलम्।।२०।।**

**सोऽभिगम्य जयाशीर्भिरभिनन्द्य सुरेश्वरम्।**

**प्रोवाच विनयाद्धीमानृषीणां वाक्यमुत्तमम्।।२१।।**

**व्याधयो हि समुत्पन्ना: सर्वप्राणिभयङ्करा:।**

**तद्ब्रूहि मे शमोपायं यथावदमरप्रभो।।२२।।**

**तस्मै प्रोवाच भगवानायुर्वेदं शतक्रतु:।**

**पदैरल्पैर्मतिं बुद्ध्वा विपुलां परमर्षये।।२३।।**

**व्याख्या :**

अथैतेषु मध्ये भरद्वाज: कथमिन्द्रमुपागमदित्याह- क इत्यादि। शचीपतिमित्यनेन शचीसम्भोगव्यासक्तमप्यहमुपासितुं क्षम इति भरद्वाजो दर्शयति। अर्थे प्रयोजने। नियुज्येयं व्यापारयेयम्। अत्रेति प्रकृतप्रयोजन एव, अत्रेतिशब्दो यस्मादर्थे। यथा- सुभिक्षमित्यागत:; यस्मात् सुभिक्षं तस्मादागत इत्यर्थ:। नियोजित इति चौरादिको णिच्, न हेतौ। अनेन प्रकरणेन भरद्वाजस्यायुर्वेदागमे विशेषेणार्थित्वान्न प्रेरणमिति दर्शितं भवति। प्रोवाचेति सम्यगुवाच; न तु प्रशब्द: प्रपञ्चार्थ:, पदैरल्पैरित्युक्तत्वात्। कस्मात् पदैरल्पैरुवाचेत्याह- मतिं बुद्ध्वा विपुलामिति; यस्माद्विपुलमतिं भरद्वाजं प्रतिपन्नवान् तस्मात् पदैरल्पैरुवाचेति भाव:; मतिश्च बहुविषयत्वेनोपचाराद्विपुलेत्युच्यते, सा च मति: शुश्रूषाश्रवणग्रहणधारणोहापोहतत्त्वाभिनिवेशवतीह विपुला बोद्धव्या। अत्र चेन्द्रेण दिव्यदृशा भरद्वाजाभिप्रायमग्रत एव

बुद्ध्वाऽऽयुर्वेद उपदिष्टः; तेन भरद्वाजस्येन्द्रपृच्छादीह न दर्शितं, किंवा भूतमपीन्द्रपृच्छादि ग्रन्थविस्तरभयादिह न लिखितम्।।१८-२३।।

**हेतुलिङ्गौषधज्ञानं स्वस्थातुरपरायणम्।**

**त्रिसूत्रं शाश्वतं पुण्यं बुबुधे यं पितामहः।।२४।।**

**व्याख्या :**

यादृशोऽसावल्पपदैरुपदिष्ट आयुर्वेदस्तमाह- हेत्वित्यादि। हेतुलिङ्गौषधज्ञानमिति हेत्वादीनि ज्ञायन्तेऽनेनेति हेतुलिङ्गौषधज्ञानं, यावच्चायुर्वेदवाच्यं तावद्धेत्वाद्यन्तर्भूतमित्यर्थः। हेतुग्रहणेन सन्निकृष्टविप्रकृष्टव्याधिहेतुग्रहणं; लिङ्गग्रहणेन च व्याधेरारोग्यस्य च कृत्स्नं लिङ्गमुच्यते, तेन व्याध्यारोग्ये अपि लिङ्गशब्दवाच्ये, यतस्ताभ्यामपि हि तल्लिङ्गं लिङ्ग्यत एव; वक्ष्यति हि विषमारम्भमूलानां ज्वर एको हि लक्षणम्। विषमारम्भमूलाद्यैर्ज्वर एको निगद्यते (नि.अ.८) इत्यादि; औषधग्रहणेन च सर्वपथ्यावरोधः। शरीरं चात्र हेतौ लिङ्गे चान्तर्भवति। स्वस्थातुरयोः परमुत्कृष्टमयनं मार्ग इति स्वस्थातुरपरायणम्। किमन्योऽयं हेतुलिङ्गौषधज्ञानरूप आयुर्वेदो ब्रह्मबुद्धादायुर्वेदादुतानन्य इत्याह- त्रिसूत्रमित्यादि। पितामहोऽपि यं त्रिसूत्रं बुबुधे तमिन्द्रः प्रोवाच। त्रीणि हेत्वादीनि सूत्र्यन्ते यस्मिन् येन वा तत्त्रिसूत्रम्। तत्र सूचनात् सूत्रणाच्चार्थसन्ततेः सूत्रम्। एतेन तं यथा ब्रह्मा त्रिसूत्रं बुबुधे तथैव हेतुलिङ्गौषधज्ञानमिन्द्रः प्रोवाचेत्यविप्लुतमागमं दर्शयति। बुबुध इति न कृतवान्। अत एवोक्तं- शाश्वतं; नित्यमित्यर्थः। तच्च नित्यत्वं सूत्रस्थानान्ते व्युत्पादनीयम्।।२४।।

**सोऽनन्तपारं त्रिस्कन्धमायुर्वेदं महामतिः।**

**यथावदचिरात् सर्वं बुबुधे तन्मना मुनिः।।२५।।**

**तेनायुरमितं लेभे भरद्वाजः सुखान्वितम्।**

**ऋषिभ्योऽनधिकं तच्च शशंसानवशेषयन्।।२६।।**

**व्याख्या :**

अथोद्दिष्टमायुर्वेदं कथं गृहीतवान् भरद्वाज इत्याह- सोऽनन्तेत्यादि। अविद्यमानावन्तपारौ यस्यासावनन्तपारः, अत्र पारशब्देन गोबलीवर्दन्यायेनादिरुच्यते; पारशब्दो ह्युभयोरपि नदीकूलयोर्विवक्षावशाद्वर्तते; किंवा अनन्तो मोक्षः, पारमुत्कृष्टं फलं यस्यायुर्वेदस्यासावनन्तपारः। वक्ष्यति हि- चिकित्सा तु नैष्ठिकी या विनोपधाम् (शा.अ.१) इति। अत्र नैष्ठिकी मोक्षसाधनहेतुः। त्रयो हेत्वादयः स्कन्धरूपा यस्य स त्रिस्कन्धः; स्कन्धश्च स्थूलावयवः प्रविभागो वा। तत्रैवायुर्वेदग्रहणे मनो यस्य स तन्मनाः। मननात् ज्ञानप्रकर्षशालित्वान्मुनिः। एतेन यस्मादयं महामतिस्तन्मनाः मुनिश्च तेनानन्तपारमप्यायुर्वेदं हेत्वादिस्कन्धत्रयमालम्बनं कृत्वा यथावदचिरादेव प्रतिपन्नवानित्याशयः। अचिरादिति अचिरेण।

अत्र च यथा ब्रह्मा त्रिसूत्रं बुबुधे यथा चेन्द्रो हेतुलिङ्गौषधज्ञानं प्रोवाच तथैव भरद्वाजोऽपि त्रिस्कन्धं तं बुबुधे इत्यनेनायुर्वेदस्याविप्लुतागमत्वमुपदर्श्यते; तेन त्रिसूत्रत्रिस्कन्धयोर्न पुनरुक्तिः। तेनेति इन्द्राद्गृहीतेनायुर्वेदेन। अमितमिति अमितमिवामितम्, अतिदीर्घत्वात्। आयुःशब्दश्चायुःकारणे रसायनज्ञाने बोद्धव्यः; येनोत्तरकालं हि रसायनोपयोगादयं भरद्वाजोऽमितमायुरवाप्स्यति (न ऋषिभ्य आयुर्वेदकथनात् पूर्वं रसायनमाचरति स्म); किंवा सर्वप्राण्युपकारार्थाधीतायुर्वेदजनितधर्मवशात्तत्कालमेवामितमायुर्लेभे भरद्वाज इति बोद्धव्यम्। तच्चेति श्रुतं; यदा तमिति पाठः, तदा तमायुर्वेदम्। अनवशेषयन्निति कात्स्न्येनेत्यर्थः। आयुर्वेदमधीत्यानन्तरमेवायं तमृषिभ्यो दत्तवान्।।२५-२६।।

**ऋषयश्च भरद्वाजाज्जगृहुस्तं प्रजाहितम्।**

**दीर्घमायुश्चिकीर्षन्तो वेदं वर्धनमायुषः।।२७।।**

**महर्षयस्ते ददृशुर्यथावज्ज्ञानचक्षुषा।**

**सामान्यं च विशेषं च गुणान् द्रव्याणि कर्म च।।२८।।**

**समवायं च तज्ज्ञात्वा तन्त्रोक्तं विधिमास्थिताः।**

**लेभिरे परमं शर्म जीवितं चाप्यनित्वरम् ।।२९।।**

**व्याख्या :**

दीर्घमायुश्चिकीर्षन्त इति प्राणिनामात्मनश्च। ज्ञानार्थं ज्ञानरूपं वा चक्षुर्ज्ञानचक्षुः, तेन ज्ञानचक्षुषा। गृहीतेन तेनायुर्वेदेन किं ददृशुरित्याह- सामान्यं चेत्यादि। एषां चोत्तरत्र लक्षणं षण्णां पदार्थानां विश्वरूपाणां भविष्यति; तेनैतत्तत्रैव व्याकरणीयम्। तदिति सामान्यादि। तन्त्रोक्तं विधिमिति अपथ्यपरिहारपथ्योपादानरूपम्। शर्म सुखम्। परमिति दुःखानाक्रान्तम्। अनित्वरमिति अगत्वरम्।।२७-२९।।

**अथ मैत्रीपरः पुण्यमायुर्वेदं पुनर्वसुः।**

**शिष्येभ्यो दत्तवान् षड्भ्यः सर्वभूतानुकम्पया।।३०।।**

**अग्निवेशश्च भेल(ड)श्च जतूकर्णः पराशरः।**

**हारीतः क्षारपाणिश्च जगृहुस्तन्मुनेर्वचः।।३१।।**

**व्याख्या :**

अथेत्यादिना भरद्वाजशिष्यस्यात्रेयस्य पुनर्वस्वपरनाम्नोऽग्निवेशादिगुरुतां दर्शयति। अत्र केचिद्भरद्वाजात्रेययोरैक्यं मन्यन्ते, तन्न; भरद्वाजसञ्ज्ञया आत्रेयस्य क्वचिदपि तन्त्रप्रदेशेऽकीर्तनात्; हारीते चात्रेयादिगुरुतया भरद्वाज उक्तः- “शक्रादहमधीतवान्”

इत्यादिना "मत्तः पुनरसङ्ख्येयास्त्रिसूत्रं त्रिप्रयोजनम्। अत्रात्रेयादिपर्यन्ता विदुः सप्त महर्षयः।।आत्रेयाद्धारीत-ऋषिः"- इत्यन्तेन। वाग्भटेन तु यदुक्तं "ब्रह्मा स्मृत्वाऽऽयुषो वेदं प्रजापतिमजिग्रहत्। सोऽश्विनौ तौ सहस्राक्षं सोऽत्रिपुत्रादिकान् मुनीन्" (वा.सू.अ.१) इत्यनेनात्रेयस्येन्द्रशिष्यत्वं, तदायुर्वेदसमुत्थानीयरसायनपादे आदिशब्देन वक्ष्यमाणेन्द्रशिष्यतायोगात् समर्थनीयम्। तत्र हीन्द्रेण पुनर्महर्षीणामायुर्वेद उपदिष्ट इति वक्तव्यम्। मैत्रीपरो मैत्रीप्रधानः; मैत्री च सर्वप्राणिष्वात्मनीव बुद्धिः।।३०-३१।।

**बुद्धेर्विशेषस्तत्रासीन्नोपदेशान्तरं मुनेः।**

**तन्त्रस्य कर्ता प्रथममग्निवेशो यतोऽभवत्।।३२।।**

**अथ भेलादयश्चक्रुः स्वं स्वं तन्त्रं कृतानि च।**

**श्रावयामासुरात्रेयं सर्षिसङ्घं सुमेधसः।।३३।।**

**श्रुत्वा सूत्रणमर्थानामृषयः पुण्यकर्मणाम्।**

**यथावत्सूत्रितमिति प्रहृष्टास्तेऽनुमेनिरे।।३४।।**

**सर्व एवास्तुवंस्तांश्च सर्वभूतहितैषिणः।**

**साधु भूतेष्वनुक्रोश इत्युच्चैरब्रुवन् समम्।।३५।।**

**तं पुण्यं शुश्रुवुः शब्दं दिवि देवर्षयः स्थिताः।**

**सामराः परमर्षीणां श्रुत्वा मुमुदिरे परम्।।३६।।**

**अहो साध्विति निर्घोषो लोकांस्त्रीनन्ववा(ना)दयत्।**

**नभसि स्निग्धगम्भीरो हर्षाद्भूतैरुदीरितः।।३७।।**

**शिवो वायुर्ववौ सर्वा भाभिरुन्मीलिता दिशः।**

**निपेतुः सजलाश्चैव दिव्याः कुसुमवृष्टयः।।३८।।**

**अथाग्निवेशप्रमुखान् विविशुर्ज्ञानदेवताः।**

**बुद्धिः सिद्धिः स्मृतिर्मेधा धृतिः कीर्तिः क्षमा दया।।३९।।**

**तानि चानुमतान्येषां तन्त्राणि परमर्षिभिः।**

**भ(भा)वाय भूतसङ्घानां प्रतिष्ठां भुवि लेभिरे।।४०।।**

**व्याख्या :**

बुद्धेर्विशेष उत्कर्षः। यत इति बुद्धेर्विशेषात्। स्वं स्वं तन्त्रमिति स्वस्वनामाङ्कितं

भेलतन्त्रं, जतूकर्णतन्त्रमित्यादिकम्। कृतानि चेत्यत्र 'तन्त्राणि' इति शेषः। पुण्यमायुर्वेदतन्त्रकरणलक्षणं कर्म येषामग्निवेशादीनां ते पुण्यकर्माणः, तेषां पुण्यकर्मणाम्। सर्वभूतहितैषिण इत्यग्निवेशादिविशेषणं; किंवा ऋषिसङ्घविशेषणम्। साधुशब्दोऽजहाल्लिङ्गतया नपुंसकलिङ्ग एव; यथा- वेदाः प्रमाणमिति। केचित्तु साध्विति विशेषणस्य नपुंसकलिङ्गतानुरोधादनुक्रोशमित्यपि नपुंसकलिङ्गं पठन्ति। अहो इति साध्विति प्रशंसायाम्। स्निग्ध इति अनुत्कटत्वेनाह्लादकत्वेन च। शिवो वायुर्ववावित्यादिना शुभलक्षणेन प्रकृततन्त्रकरणस्य देवैरप्यर्थतोऽनुमतत्वमुपदर्श्यते। ज्ञानदेवता इति ज्ञानाभिमानिन्यो देवताः। तेन ग्रन्थकरणात् पूर्वमेवाग्निवेशादीनां बुद्ध्यादयो व्यवस्थिताः, तन्त्रकरणोत्तरकालं त्वादरेण बुद्ध्यादिदेवतानुप्रवेश इति। सिद्धिः साध्यसाधनज्ञानम्। कीर्तिः कीर्तनं वक्तुं ज्ञानमित्यर्थः; नतु कीर्तिर्यशोरूपा, तस्या अज्ञानरूपत्वात्; ज्ञानदेवताश्चेहोच्यन्ते। भवाय स्थितये, रोगानुपहतजीवितायेति यावत्। प्रतिष्ठा जनोपादेयतयाऽवस्थानम्।।३२-४०।।

**हिताहितं सुखं दुःखमायुस्तस्य हिताहितम्।**

**मानं च तच्च यत्रोक्तमायुर्वेदः स उच्यते।।४१।।**

**व्याख्या :**

सम्प्रत्यायुर्वेदव्युत्पत्तिं कुर्वन्नायुर्वेदाभिधेयं दर्शयति- हिताहितमित्यादि। हितं चाहितं च हिताहितं, तथा सुखयुक्तत्वात् सुखं, दुःखयुक्तत्वाद्दुःखं; एतच्च चतुष्प्रकारमप्यायुरर्थेदशमहामूलीये "तत्र शारीरमानसाभ्याम्" इत्यादिना ग्रन्थेन "अहितमतो विपर्ययेण" (सू.अ.३०) इत्यन्तेन वक्ष्यति। तस्य हिताहितमिति आयुषः पथ्यापथ्यम्। मानं चेत्यायुष एव, तच्च प्रमाणं मासिकद्विमासिकत्वादिभिर्विकृतिलक्षणैरिन्द्रियस्थाने तथा प्रकृतिलक्षणैः "इदमायुष्मतां कुमाराणां लक्षणं भवति" (शा.अ.८) इत्यादिना शारीरे वक्तव्यम्। तच्चेति आयुः स्वरूपेण "शरीरेन्द्रियसत्त्वात्मसंयोग" इत्यादिना वक्ष्यमाणम्। तेन हिताहितमित्यादिना 'आयुर्वेदयतीत्यायुर्वेद' इत्युक्तं भवति। विदधातुश्चेह ज्ञानार्थ एवाभिप्रेतः। यद्वक्ष्यत्यर्थे दशमहामूलीये- "तदायुर्वेदयतीत्यायुर्वेदः" (सू.अ.३०) इति। लाभादयस्त्वर्था विदेरिह नोक्ताः, तेषां साक्षादायुर्वेदाजन्यत्वादिति भावः।।४१।।

**शरीरेन्द्रियसत्त्वात्मसंयोगो धारि जीवितम्।**

**नित्यगश्चानुबन्धश्च पर्यायैरायुरुच्यते।।४२।।**

**व्याख्या:**

आयुर्वेदपदे पूर्वपदवाच्यमायुराह- शरीरेत्यादि। शरीरं पञ्चमहाभूतविकारात्मकमात्मनो भोगायतनम्, इन्द्रियाणि चक्षुरादीनि, सत्त्वं मनः, आत्मा ज्ञानप्रतिसन्धाता, एषां

सम्यगदृष्टयन्त्रितो योग: संयोग:। यद्यपि शरीरग्रहणेनैव इन्द्रियाण्यपि लभ्यन्ते, तथाऽपि प्राधान्यात्तानि पुन: पृथगुक्तानि। अयं च संयोग: संयोगिन: शरीरस्य क्षणिकत्वेन यद्यपि क्षणिकस्तथाऽपि सन्तानव्यवस्थितोऽयमेकतयोच्यते। तस्यायुष: पर्यायानाह- धारीत्यादि। धारयति शरीरं पूतितां गन्तुं न ददातीति धारि। जीवयति प्राणान् धारयतीति जीवितम्। नित्यं शरीरस्य क्षणिकत्वेन गच्छतीति नित्यग:। अनुबध्नात्यायुरपरापरशरीरादिसंयोगरूपतयेत्यनुबन्ध:। पर्यायैरायुरुच्यत इति एकार्थाभिधायिभि: शब्दैरुच्यते। यद्यपि च नित्यगानुबन्धशब्दाभ्यां न क्वचिदप्यायुरभिधीयते, तथाऽपि नित्यगत्वानुबन्धत्वधर्मख्यापनार्थमेवैतत्सञ्ज्ञाद्वयं बोद्धव्यं, धारिसञ्ज्ञा त्वर्थेदशमहामूलीये भविष्यति। ननु, उत्तरत्र "चैतन्यानुवृत्तिरायु:" (सू.अ.३०) इत्यायुर्लक्षणं करिष्यति, इह तु शरीरेन्द्रियसत्त्वात्मसंयोग इति किमर्थमुक्तम्? ब्रूम:- शरीरेन्द्रियसत्त्वात्मसंयोगजन्या चैतन्यानुवृत्तिर्यथोक्तसंयोगाव्यभिचारित्वेन व्यक्तत्वेन चार्थेदशमहामूलीये लक्षणत्वेनोक्ता; शरीरादिसंयोगरूपमेव त्वायु: परमार्थत:; एवम्भूतसंयोगाभावे मरणमायुरुपरमरूपं भवति, मृतशरीरे तु चेतसोऽभावादायूरूपसंयोगाभाव:।।४२।।

**तस्यायुष: पुण्यतमो वेदो वेदविदां मत:।**

**वक्ष्यते यन्मनुष्याणां लोकयोरुभयोर्हितम्।।४३।।**

**व्याख्या:**

तस्येत्यादि। वेदयतीति वेद:। वेदविदां मत इति वेदविद्भि: पूजित:। अथ कस्मादायुर्वेदलक्षणो वेद: पुण्यतमो वेदविदां च पूजित इत्याह- वक्ष्यत इत्यादि। यदिति यस्मात्; एवमुक्तं भवति- यदन्ये ऋग्वेदादय: प्राय: परलोकहितमेवार्थं वदन्ति तेन पुण्या:, पुण्यतमश्चायमायुर्वेदो यद् यस्मान्मनुष्याणामुभयोरपि लोकयोर्यद्धितमायुरारोग्यसाधनं धर्मसाधनं च तद्वक्ष्यते, तेनातिशयेन पुण्यतमस्तथा वेदविदां च पूजित इति। केचित् 'वक्ष्यते य:' इति पठन्ति, तत्रापि हेतुगर्भमिति व्याख्येयम्। जीवितप्रदातृत्वादायुर्वेदस्य पुण्यतमत्वं बोद्धव्यं, यतश्चतुर्वर्गसाधनीभूतजीवितप्रदमेव सर्वोत्तमं भवति। उच्यते च- "न हि जीवितदानाद्धि दानमन्यद्विशिष्यते" (चि.अ.१) इति।।४३।।

**सर्वदा सर्वभावानां सामान्यं वृद्धिकारणम्।**

**ह्रासहेतुर्विशेषश्च, प्रवृत्तिरुभयस्य तु।।४४।।**

**व्याख्या :**

सम्प्रत्यायुर्वेदाभिधेयतया सूत्रिते सामान्यादौ सामान्यस्य प्रथमसूत्रितत्वात्तथा सामान्यज्ञानमूलत्वाच्चायुर्वेदप्रतिपाद्यस्य हेत्वादे: सामान्यमेवाग्रे निर्दिशति- सर्वदेत्यादि।

सर्वदा सर्वस्मिन् काले नित्यगे चावस्थिके च। सर्वभावानामित्यत्र सर्वशब्दः कृत्स्नवाची; भवन्ति सत्तामनुभवन्तीति भावा द्रव्यगुणकर्माणीत्यर्थः, नतु भवन्त्युत्पद्यन्त इति भावाः; तथा सति पृथिव्यादिपरमाणूनां नित्यानां सामान्यस्य पार्थिवद्व्यणुकादिवृद्धं कार्यमसङ्गृहीतं स्यात्। सामान्यं च "सामान्यमेकत्वकरं" इत्यादिना वक्ष्यमाणलक्षणम्। वृद्धिः आधिक्यं, तत्कारणं वृद्धिकारणम्। एतच्च सामान्यं सामान्यवतो मांसद्रव्यादेर्वृद्धिकारणस्य लक्षणत्वेन वृद्धिकारणमित्युक्तम्। यतो न सामान्यं मांसत्वादिजातिरूपं वृद्धौ कारणं भवति, तथाहि सति सामान्यं मांसत्वरूपं यथा वर्धके भोज्यरूपे मांसेऽस्ति तथा शरीरधातुरूपे वर्धनीयेऽप्यस्ति, ततश्च नित्यं मांसत्वसम्बन्धादमांसादानामपि मांसेन वर्धितव्यं; तस्माद्वृद्धिकारणलक्षणत्वेन सामान्यं वृद्धिकारणमित्युक्तम्। अत एव वैशेषिकेऽप्युक्तं- "त्रयाणामकार्यत्वमकारणत्वं च" इति। अत्र त्रयाणामिति सामान्यविशेषसमवायानाम्। ये तु समानमेव सामान्यमिति कृत्वा द्रव्याद्येव सामान्यशब्देनाभिदधति, तेषां मते "सामान्यं च विशेषं च" (सू.अ.१) इत्यादिग्रन्थोक्तस्य सामान्यस्य न किञ्चिदनेनोक्तं स्यादित्यसम्बन्धार्थत्वं प्रकरणस्य स्यात्। एतच्च वृद्धिकारणत्वं सामान्यस्य न लक्षणं, किं तर्ह्यायुर्वेदोपयोगिना धर्मेण निर्देशः; लक्षणं तु "सामान्यमेकत्वकरम्" इति करिष्यति। एवं द्रव्यादावपि चोद्देशानन्तरं निर्देशं करिष्यति "खादीन्यात्मा" इत्यादिना, ततो लक्षणं "यत्राश्रिताः कर्मगुणा" इत्यादिना करिष्यति। सामान्यस्य च वृद्धिकारणत्वं ह्यसति विरोधिकारणे बोद्धव्यं, तेनामलकादिगतानामम्लत्वादीनां पित्तगताम्लत्वाद्यवर्धकत्वमामलकगतशिशिरत्वप्रभावविरोधित्वादुपपन्नम्। एवमन्यत्रापि त्रिदोषहरद्रव्ये बोद्धव्यम्। इह च सामान्यस्य वृद्धिकारणत्वमित्युच्यते, नतु सामान्यमेव वृद्धिकारणमित्युच्यते, तेनासमानादपि घृतान्मेधाया वह्नेश्च वृद्धिः प्रभावादेवोपपन्ना, यदुक्तं- "घृतमग्निमेधे करोति" इति; तथा चिन्तया वातवृद्धिः, तथा सङ्कल्पाद्वृष्यपादयुगलेपाच्च शुक्रवृद्धिरित्यादि प्रभावादुपपन्नम्। सामान्यं चेह वृद्धिकारणमित्युच्यमाने समानस्येति गम्यते, न हि शोणितं प्रति मांसत्वं सामान्यं, किन्तु व्यावृत्तबुद्धिजनकत्वाद्विशेष एव। अथ वैशेषिकोक्तानामन्त्यविशेषाणामिह शास्त्रे चिकित्सायामनुपयुक्तत्वात्तद्विशेषधर्मव्यावर्तकत्वयोगात् सामान्यविशेषानेव ह्रासकारणत्वेनाह- ह्रासहेतुरित्यादि। अत्रापि सर्वदा सर्वभावानामिति योजनीयम्। ह्रासः अपचयः। विशिष्यते व्यावर्तत इति विशेषः। सामान्यमेव गवेधुकत्वं मांसादीन् प्रति विशेषः; गवेधुको हि गवेधुकत्वेन गवेधुकव्यक्त्यन्तरापेक्षया समानः, मांसापेक्षया व्यावृत्तत्वाद्विशेषः; न हि मांसे गवेधुकत्वमस्ति। एवं मांसत्वं मांसान्तरापेक्षयाऽनुगतत्वात् सामान्यं, शोणिताद्यपेक्षया तु मांसानां व्यावृत्तत्वाद्विशेष एव। अत्रापि ह्रासहेतुत्वं ह्रासहेतुद्रव्यादिलक्षणत्वेन सामान्यवज्ज्ञेयं; तथा ह्रासहेतुत्वमप्यसति विरोधके सामान्योक्तन्यायेन ज्ञेयं; तेन मन्दकनिकुचादीनां वातादिविरुद्धानामपि स्निग्धत्वादीनां वाताद्यशमकत्वं द्रव्यस्यापथ्यत्वप्रभावादेव ज्ञेयम्। विशेषश्चेह विरुद्धविशेषोऽभिप्रेतः;

ते(ये)नोत्तरत्र विरुद्धविशेषमेव ह्रासहेतुतया तत्र तत्रोपदेक्ष्यति; यथा- "वृद्धिः समानैः सर्वेषां विपरीतैर्विपर्ययः" (वा.सू.अ.१) इति, तथा "विपरीतगुणैर्देशमात्राकालोपपादितैः" (सू.अ.१) इत्यादि, तथा विपरीतगुणैर्द्रव्यैर्मारुतः सम्प्रशाम्यति (सू.अ.१) इत्यादि, तथा जतूकर्णेऽप्युक्तं- "समानैः सर्वभावानां वृद्धिर्हानिर्विपर्ययात्" इति। अविरुद्धविशेषस्तु यद्यपि ह्रासे वृद्धौ वाऽप्यकारणं, यथा- पृथिव्या अनुष्णाशीतस्पर्शो वातस्य शैत्यं न वर्धयति नापि ह्रासयति, तथाऽप्यग्निक्षीयमाणानां धातूनामसमानत्वेनाजनकत्वाद्धासकारणमि(मे)व भवति; यतोऽसमानद्रव्योपयोगे सति ह्रासो विनश्वराणां भावानामापूरकहेत्वभावादुपलभ्यत एव; यथा- वहतो जलस्य पूर्वदेशसेतुनोत्तरदेशजलस्य ह्रासः। एवम्भूतं चाविरुद्धविशेषोपयोगेऽपि ह्रासं पश्यताऽऽचार्येण सामान्येनैवेहोक्तं ह्रासहेतुर्विशेष इति। चशब्दः सर्वभावानामिति समुच्चिनोति। अथ किमसम्बद्धावपि सामान्यविशेषौ वृद्धिह्रासकारणं नेत्याह - प्रवृत्तिरुभयस्य त्विति। 'कारणं' इति शेषः। उभयस्य सामान्यस्य विशेषस्य च, प्रवृत्तिः प्रवर्तनं शरीरेणाभिसम्बन्ध इति यावत्; एवम्भूता प्रवृत्तिः धातुसामान्यविशेषयोर्वृद्धिह्रासे कारणमित्यर्थः। तुशब्दोऽवधारणे; तेन नासम्बद्धौ सामान्यविशेषौ स्वकार्यं कुरुत इति दर्शयति। किंवा प्रवृत्तिः उचिता धातुप्रवृत्तिर्धातुसाम्यमिति यावत्, सा उभयस्य सामान्यस्य विशेषस्य च 'कार्या' इति शेषः। तेन केवलसमानोपयोगाद्धातुवृद्ध्या धातुवैषम्यं , केवलविशेषोपयोगाच्च धातुक्षयाद्धातुवैषम्यं, युगपत्समानविशिष्टद्रव्योपयोगात् प्रवृत्तिर्धातुसाम्यरूपा भवतीत्युक्तं भवति। तुशब्दः पूर्वपक्षादेकद्रव्योपयोगलक्षणाद्व्यावर्तयति।।४४।।

**सामान्यमेकत्वकरं, विशेषस्तु पृथक्त्वकृत्।**

**तुल्यार्थता हि सामान्यं, विशेषस्तु विपर्ययः।।४५।।**

**व्याख्या :**

अथ किंलक्षणं तत् सामान्यं किंलक्षणो वा स विशेष इत्याह- सामान्यमित्यादि। एकत्वकरमिति एकत्वबुद्धिकरं, सामान्यं यदनेकासु भिन्नदेशकालासु गवादिव्यक्तिषु 'अयं गौरयं गौः' इत्यादिप्रकारा एकाकारा बुद्धिस्तत् सामान्यम्। न हि भिन्नासु व्यक्तिष्वभिन्नं सामान्यमेकरूपं विनाऽभ्रान्ता एकाकारा बुद्धिर्भवतीति भावः। यत्रापि च 'अयं पाचकोऽयं पाचकः' इति, तथा अयं 'शुक्लोऽयं शुक्लः' इत्यादौ क्रियागुणादिसामान्यादेकरूपा बुद्धिस्तत्रापि सामान्यमेकक्रियागुणादिगतमेकरूपाध्यवसाये हेतुः। न ह्येकस्मिन् पाचके या क्रिया सा पाचकान्तरेऽपि, किन्तर्हि तज्जातीया। अतः क्रियासामान्यं तत्राप्येकत्वाध्यवसाये कारणम्। विशेषलक्षणं- पृथक्त्वकृदिति- व्यावृत्तबुद्धिकृत्; तेन यद्गोव्यक्त्यन्तरापेक्षयैकबुद्धिकर्तृतया गोत्वं सामान्यं, तदेव गोत्वमश्वाद्यपेक्षया व्यावृत्तबुद्धिकर्तृत्वादश्वादीन् प्रति विशेष इत्युक्तं भवति। तेन मांसत्वं मांसं प्रति मांसान्तरापेक्षया

समानत्वाद्वृद्धिकारणं भवति, तदेव तु मांसत्वं वातं प्रति विशेषरूपतया ह्रासहेतुर्भवति; शोणितादीन् प्रति त्वविरोधिविशेषत्वेन न तथा ह्रासकारणं, गुणसामान्यात्तु वर्धकमपि मांसं शोणितादीनां भवति। कथमनेकासु व्यक्तिषु सामान्यमेकबुद्धिमव्यभिचारिणीं करोतीत्याह- तुल्यार्थता हीत्यादि। तुल्यार्थता एकसामान्यरूपार्थानुयोगिता। एतेन यस्माद्भिन्नासु व्यक्तिषु सामान्यमेकरूपसम्बन्धमस्ति , ततस्तदनेकार्थावलम्बा सत्यपि व्यक्तिभेदे एकबुद्धिर्युक्तेति भावः। विशेषस्तु विपर्यय इति अतुल्यार्थता हि विशेषत्वं , तेन गोगजयोरतुल्यगोत्वगजत्वरूपार्थयोः पृथग्बुद्धिर्युक्तैवेति दर्शितं भवति। अन्ये तु व्याख्यानयन्ति यत्- त्रिविधं सामान्यं, विशेषश्च त्रिविधः; यथा- द्रव्यगोचरः, गुणगोचरः, कर्मगोचरश्च; तत्र सर्वदेत्यादिना द्रव्यसामान्यमुच्यते; सामान्यमेकत्वकरमित्यनेन गुणसामान्यं; यथा- पयःशुक्रयोर्भिन्नजातीययोरपि मधुरत्वादिगुणसामान्यं तत्रैकतां करोति, एवं विशेषेऽप्युदाहार्यं; तुल्यार्थतेत्यादिना तु कर्मसामान्यं निगद्यते, आस्यारूपं हि कर्म न श्लेष्मणा समानमपि तु पानीयादिकफसमानद्रव्यार्थक्रियाकारित्वात् कफ-वर्धकरूपतया आस्याऽपि कफसमानेत्युच्यते; एवं स्वप्नादावपि कर्मणि बोद्धव्यम्। तदेतद्भट्टारहरिचन्द्रेणैव दूषितं; यतः सर्वदेत्यादिनैव लक्षणेन त्रिविधिमपि सामान्यं लभ्यते, तेनास्मिन् पक्षे सामान्यमेकत्वकरमित्याद्यवाच्यं स्यादिति कृत्वा। अन्ये तु पश्यन्ति- यत्त्रिविधं सामान्यम्- अत्यन्तसामान्यं, मध्यसामान्यम्, एकदेशसामान्यं च; तत्र सर्वदेत्यादिनाऽत्यन्तसामान्यमुच्यते, सामान्यमेकत्वकरमित्यनेन मध्यसामान्यं, तुल्यार्थता हीत्यादिनैकदेशसामान्यं एतदपि त्रैविध्यकथनं नातिप्रयोजनमसङ्गतलक्षणं चेति नातिश्रद्धाकरम्। केचित् सामान्यं द्विविधमिच्छन्ति- उभयवृत्ति, तथैकवृत्ति च; तत्र मांसं मांसवर्धकम्, उभयवृत्तिसामान्यात्; मांसत्वं हि पोष्ये पोषके च गतत्वादुभयवृत्ति; एकवृत्ति तु यथा- घृतमग्निकरं, तथा धावनादिकर्म वातकरं, तथाऽऽस्यादि कफकरम्; एतद्धि सर्वं न वर्धनीयेन समानं, किन्तु प्रभावाद्वर्धकं; प्रभावश्च घृतत्वधावनत्वादिरेव; स चैकवृत्तिसामान्यरूपः, तेनात्रापि सामान्यमेव वृद्धिकारणमिति ब्रुवते। अस्मिंस्तु पक्षेऽनुभयवृत्तिसामान्यं विशेष एव भवति, तथा समानमसमानं च वृद्धिकारणं भवतीति न किञ्चित् सामान्यस्योक्तं स्यात्। अस्मन्मते तु सामान्यं वृद्धौ कारणमेव भवतीति सामान्यं वृद्धिकारणत्वेन नियम्यते; न तु वृद्धिः सामान्यकारणिकैवेति नियम्यते, तेनासमानादपि वृद्धिर्भवति निर्दोषा। यत्तूच्यते- कर्मसामान्यं नेह तन्त्रे वृद्धिकारणमस्ति, यतो न धावनेन वायुः समान इति; अत एवाचार्येण द्रव्यसामान्यमुक्तं "मांसमाप्यायते मांसेन" (शा. अ.६) इत्यादिना, तथा "समानगुणानामाहारविकाराणामुपयोगः" (शा.अ.६) इत्यादिना गुणसामान्यमुक्तं; नैवं कर्मसामान्यमुक्तं, वचनं हि "कर्मापि च यद्यस्य धातोर्वृद्धिकरं तत्तदासेव्यम्" (शा.अ.६) इति; न तत्र सामान्योपग्रहः कृतः। अत्र ब्रूमः- कर्मणां प्रायः प्रभावेणैव वृद्धिहेतुत्वात् सामान्यानुपग्रहः कृतः, न तु कर्मसामान्याभावात्; यतः क्रिया-

वतो वातस्य क्रियावता व्यायामादियुक्तेन शरीरेण वृद्धिः क्रियते, निष्क्रियतया चास्य वातस्य ह्रासः। स्वप्नादयस्तु "संयोगे च विभागे च" इत्यनेन वक्ष्यमाणलक्षणेनानुक्ता अपि शास्त्रव्यवहारात् कर्मशब्देनोच्यते। तत्र स्वप्नः स्वकारणादेव चीयमानस्य कफस्य क्षयकारणशरीरपरिस्पन्दादिनिरोधकत्वेन वृद्धिकर उच्यते, न तु स्वप्नः साक्षाच्छ्लेष्म-वृद्धिं करोति। एवमास्यादावपि चिन्तनीयम्। यत्र त्वेवं कारणं चिन्तयितुं न पार्यते तत्र प्रभाव एव वर्णनीयः। ननु मांसं मांसं वर्धयति सामान्यात्, विशेषाच्च वातं क्षपयति, तत् कथं युगपद्विरुद्धार्थद्वयकर्तृत्वं मांसस्य; न हि देवदत्तो यदैव कुम्भं करोति तदैव काण्डमपि। नैवं, क्रियावतामयं धर्मो नाक्रियावतामिति ; तथाहि- शब्दो युगपदनेकानेव शब्दानेककालमारभते, तथाऽग्निः प्रकाशदाहौ युगपत् करोति; अत एवोक्तमाचार्येण- "तस्माद्भेषजं सम्यगवचार्यमाणं युगपदूनातिरिक्तानां धातूनां साम्यकरं भवति; अधि-कमपकर्षति, न्यूनमाप्याययति" (शा.अ.६) इति। यदुच्यते- क्षीयमाणधातोर्वृद्धस्य तथा बहुदोषस्य समानगुणोऽप्याहारो न वृद्धिहेतुः, तथा ग्रीष्मे च मधुरादिना समानेनापि न कफाभिवृद्धिरित्यादि; तत्र प्रतिबन्धकानां जरा-बहुदोषत्व-ग्रीष्मोष्णत्वादीनां विद्यमानत्-वान्न सामान्यं वर्धकम्; असति च विरोधके सामान्यं वृद्धिकारणमिति सिद्धान्तः; तेन न काचित् क्षतिः। किंवा वृद्धादीनां समानेनाहारेण क्रियत एव वृद्धिः; परमतिबलवता क्षयहेतुनाऽऽधीयमानक्षये पुरुषे सा वृद्धिर्नोपलभ्यते। अत्र च द्रव्यसामान्यमेव धातूनां द्रव्यरूपाणां वर्धकं न गुणसामान्यं, गुणानां द्रव्यानारम्भकत्वात्। गुणसामान्यात्तु तद्गुणाश्रयं द्रव्यमनुमीयते; तच्च द्रव्यं धातुवर्धकं भवति, यथा- रूक्षादीन् गुणान् दृष्ट्वा चित्रको वाय्वधिको योऽनुमितः, स च चित्रक उपयुक्तो वातं वर्धयति, गुणास्तु गुणानेव जनयन्-तोऽभिवर्धयन्ति। सामान्यं च वृद्धिकारणलक्षणं न साक्षाद्वृद्धिकारणमिति प्रागेवोक्तम्; एवं विशेषेऽपि। अयं च सामान्यविशेषवादो ग्रन्थविस्तरभयादायुर्वेदोपयुक्तधर्ममात्रेणोक्तः; विस्तरस्त्वस्य वैशेषिके बोद्धव्यः।।४५।।

**सत्त्वमात्मा शरीरं च त्रयमेतत्त्रिदण्डवत्।**

**लोकस्तिष्ठति संयोगात्तत्र सर्वं प्रतिष्ठितम्।।४६।।**

**स पुमांश्चेतनं तच्च तच्चाधिकरणं स्मृतम्।**

**वेदस्यास्य, तदर्थं हि वेदोऽयं सम्प्रकाशितः।।४७।।**

**व्याख्या :**

सम्प्रति सामान्यविशेषावभिधाय, उद्देशक्रमानुरोधाद्गुणेऽभिधातव्ये, गुणेषु प्रधानभूतमायुर्वेदोपकार्यं सत्त्वात्मशरीरसंयोगं वक्तुमाह- सत्त्वमित्यादि; किंवा सा-

मान्यविशेषाभ्यामेव हेतुलिङ्गौषधानि दर्शितानि, सामान्यविशेषवत एव सर्वत्र कारणत्वाल्लिङ्गत्वाच्चैतावदेव विचार्यमाणं तन्त्रं भवति, अधिकरणं च नोक्तम्, अत: सत्त्वादिमेलकं हेत्वाद्यधिकरणमाह- सत्त्वमित्यादि। सत्त्वं मन:। चशब्द: समुच्चये। सङ्ख्येयनिर्देशादेव सङ्ख्यायां लब्धायां त्रयमिति पदं मिलितानामेव ग्रहणार्थम्। एतदित्यनन्तरोक्तनिर्देश:। त्रिदण्ड: परस्परसंयोगविधृत: कुम्भादिधारकस्तद्वत्। एतेन यथा त्रिदण्डेऽन्यतमापाये नावस्थानं, तथा सत्त्वादीनामन्यतमापायेऽपि न लोकस्थितिरित्युक्तं भवति। लोकत आलोकत इति लोक:, तेनेह जङ्गमो भूतग्राम उच्यते। संयोगात्तिष्ठतीति परस्परोपग्राहकात् संयोगात् स्वार्थक्रियां कुर्वन्न विशकलितं भवति। अत्र तु पृथगिन्द्रियग्रहणं न कृतं, शरीरग्रहणेनैव गृहीतत्वात्। तत्र सर्वं प्रतिष्ठितमिति तस्मिंल्लोके कर्मफलादि व्यवस्थितं; यद्वक्ष्यति- "अत्र कर्मफलं चात्र ज्ञानं चात्र प्रतिष्ठितम्। अत्र मोह: सुखं दु:खं जीवितं मरणं स्वता" (शा.अ.१) इति। स पुमानिति तत् सत्त्वादित्रयं पुमानिति भण्यते। तत्र यद्यपि सत्त्वादित्रयं नपुंसकलिङ्गं, तथाऽपि पुमानिति वक्ष्यमाणलिङ्गग्रहणात् 'स' इति पुंलिङ्गनिर्देश:; यथा- "णेरणौ यत्कर्म णौ चेत् स कर्तानाध्याने" (पा.अ.१ पा.३ सू.६७) इत्यादौ। किञ्चैतदिति यद्यपि वर्तमाननिर्देश: कृतस्तथाऽपि तस्यैव 'स' इत्यतीतनिर्दिशोऽपि सर्वनाम्नां सर्वकालनिर्देशादेवाविरुद्धो मन्तव्य:। वदन्ति हि लाक्षणिका:- "प्रत्यक्षे च परोक्षे च सामीप्ये दूर एव च। एतेष्वर्थेषु विद्वद्भि: सर्वनाम प्रयुज्यते" इति। चेतनमिति ज्ञानवत्। तच्चाधिकरणं स्मृतं तन्त्रस्येत्यत्र हेतुमाह- तदर्थं हीत्यादि। तदर्थमिति तदुपकारार्थम्; एतेन तदुद्दिश्य प्रवृत्तिरधिकरणार्था नाधारार्थेति दर्शयति। अत्र सत्त्वमादौ कृतं, तदधीनत्वादात्मशरीरक्रियाया:; यदुक्तं- "अचेतनं क्रियावच्च मनश्चेतयिता पर:। युक्तस्य मनसा तस्य निर्दिशन्त्यात्मन: क्रियाम्" (शा.अ.१) इति। पूर्वं शरीरेत्यादिनाऽऽयुरुक्तं, सत्त्वमात्मेत्यादिना तु तन्त्राधिकरणभूतपुरुष उच्यत इति न पौनरुक्त्यम्। अत्र चात्मग्रहणेन बुद्ध्यहङ्कारादीनां ग्रहणं, शरीरग्रहणेनेन्द्रियाणामर्थानां च शरीरसम्बद्धानां ग्रहणं व्याख्येयम्।।४६-४७।।

**खादीन्यात्मा मन: कालो दिशश्च द्रव्यसङ्ग्रह:।**

**सेन्द्रियं चेतनं द्रव्यं, निरिन्द्रियमचेतनम्।।४८।।**

**व्याख्या:**

सम्प्रति गुणाभिधानं क्रमप्राप्तमुल्लङ्घ्य द्रव्याणि निर्दिशता गुणाधारतया द्रव्यस्य प्राधान्यमुच्यते; सूत्रे च "सामान्यं च विशेषं च" इत्यादौ गुणानादौ निर्दिशता गुणानामेव रसादीनां प्राय: शास्त्रे कार्मुकत्वमुपदर्श्यते; अत एवात्रेयभद्रकाप्यीये (सू.अ.२६) मधुरादिरसद्वारा सर्वगुणान् कर्माणि च द्रव्यस्य वक्ष्यति; किञ्च सर्वप्रधानं यज्जीवितं तदेव संयोगगुणरूपमित्यग्रे तत्र गुणग्रहणं, स च संयोगगुण: सत्त्वमात्मेत्यादिना प्रथममुक्त एव;

विशेषगुणेषु तु द्रव्यं प्रधानमिति द्रव्यमुच्यते- खादीनीत्यादि। खादीनीत्यादावात्मा कस्मात् प्रधानभूतोऽपि प्रथमं नोक्तः ? उच्यते- शरीरस्येह व्याध्यारोग्याधिकरणतया प्रधानत्वात्तद-ारम्भकानि खादीन्येवोच्यन्ते नात्मा, तस्य निर्विकारत्वात्; वचनं हि "निर्विकारः परस्त-वात्मा" (सू.अ.१) इत्यादि; खादीनि च "महाभूतानि खं वायुरग्निरापः क्षितिस्तथा" (शा. अ.१) इत्यनेन क्रमेणोक्तानि भूतान्यनागतावेक्षणेनोच्यन्ते ।आत्मादीनां च यथाभ्यर्हितस्य पूर्वनिर्देशः। द्रव्यसङ्ग्रह इति करचरणहरीतकीत्रिवृताद्यसङ्ख्येयभेदभिन्नस्य कार्यद्रव्यस्य कारणद्वारा सङ्क्षेप इत्यर्थः। सर्वकार्यद्रव्याणामपि व्यवस्थामाह- सेन्द्रियमित्यादि। निरिन्द्रियमित्यत्र निःशब्दोऽभावे, निर्मक्षिकमितिवत्। अत्र सेन्द्रियं चेतनमित्येवावतैवार्थ-ापत्त्या निरिन्द्रियमचेतनमिति लब्धेऽपि पुनस्तद्वचनमेवम्भूतार्थापत्तेरनैकान्तिकत्वाद्बोद्ध-व्यम्। यथा नवज्वरे दिवास्वप्नादि निषिद्धं, अर्थाज्जीर्णे ज्वरे तदापद्येत , न चैवं; तत्र तेषां दिवास्वप्नादीनां निषिद्धत्वात्; तस्मार्त्तिविधशिष्यबुद्धिहिततयोह्यमपि साक्षादेवोच्यते; वदन्ति हि न्यायविदो- "व्याख्यानाद्वरं करणम्" इति। यद्यपि चात्मैव चेतनो न शरीरं, नापि मनः, यदुक्तं- "चेतनावान् यतश्चात्मा ततः कर्ता निरुच्यते" (शा.अ.१) इति, तथाऽपि सलिलौष्ण्यवत् संयुक्तसमवायेन शरीराद्यपि चेतनम्। इदमेव चात्मनश्चेतनत्वं यदिन्द्रिययोगे सति ज्ञानशालित्वं, न केवलस्यात्मनश्चेतनत्वं ; यदुक्तं- "आत्मा ज्ञः, क-रणैर्योगाज्ज्ञानं त्वस्य प्रवर्तते" (शा.अ.१) इति। अत्र सेन्द्रियत्वेन वृक्षादीनामपि चेतनत्वं बोद्धव्यं; तथाहि- सूर्यभक्ताया यथा यथा सूर्यो भ्रमति तथा तथा भ्रमणाद्दृगनुमीयते, तथा लवली मेघस्तनितश्रवणात् फलवती भवति, बीजपूरकमपि शृगालादिवसागन्धेनातीव फलवद्भवति, चूतानां च मत्स्यवसासेकात् फलाढ्यतया रसनमनुमीयते, अशोकस्य च कामिनीपादतलाहतिसुखिनः स्तबकितस्य स्पर्शनानुमानं; स्मृतिश्चानुमानं द्रढयति, यथा- "योऽभिवादितविप्रस्तु नाशिषं सम्प्रयच्छति। श्मशाने जायते वृक्षो गृध्रकङ्कोपस्-ोवितः" इति; तथा "वृक्षगुल्मं बहुविधं तत्रैव तृणजातयः। तमसाऽधर्मरूपेण च्छादिताः कर्महेतुना।।अन्तःसञ्ज्ञा भवन्त्येते सुखदुःखसमन्विताः। एतदन्ताश्च गतयो ब्रह्माद्याः समुदाहृताः" (मनुस्मृति अ.१) इति। तथा तन्त्रकारश्च वानस्पत्यानूकान् प्राणिनो वक्ष्यति; तेनागमसंवलितया युक्त्या चेतना वृक्षाः।।४८।।

**सार्था गुर्वादयो बुद्धिः प्रयत्नान्ताः परादयः।**

**गुणाः प्रोक्ताः ...।४९।**

व्याख्या :

सम्प्रति गुणान्निर्देष्टुमाह- सार्था इत्यादि। अनेन त्रिविधा अपि वैशेषिकाः सामान्या आत्मगुणाश्चोद्दिष्टाः। तत्रार्थाः शब्दस्पर्शरूपरसगन्धाः। यदुक्तम्- "अर्थाः शब्दादयो ज्ञेया

गोचरा विषया गुणाः" (शा.अ.१) इति। एते च वैशेषिकाः; यत आकाशस्यैव शब्दः प्राधान्येन, वायोरेव स्पर्शः प्राधान्येन, एवमग्न्यादिषु रूपादयः। अन्यगुणानां चान्यत्र दर्शनं भूतान्तरानुप्रवेशात् । वचनं हि- "विष्टं ह्यपरं परेण" (न्या.द.अ.३आ.१सू.६६) इति। गुर्वादयस्तु गुरुलघुशीतोष्णस्निग्धरूक्षमन्दतीक्ष्णस्थिरसरमृदुकठिनविशदपिच्छिलश्लक्ष्ण-खरस्थूलसूक्ष्मसान्द्रद्रवा विंशतिः। एते च सामान्यगुणाः, पृथिव्यादीनां साधारणत्वात्। एते यज्जःपुरुषीये प्राय आयुर्वेदोपयुक्तत्वात् परादिभ्यः पृथक् पठिताः। बुद्धिः ज्ञानम्; अनेन च स्मृतिचेतनाधृत्यहङ्कारादीनां बुद्धिविशेषाणां ग्रहणम्। प्रयत्नोऽन्ते येषां निर्देशे ते प्रयत्नान्ताः; एतेन चेच्छाद्वेषसुखदुःखप्रयत्नानां ग्रहणम्। वचनं हि- "इच्छा द्वेषः सुखं दुःखं प्रयत्नश्चेतना धृतिः। बुद्धिः स्मृतिरहङ्कारो लिङ्गानि परमात्मनः" (शा.अ.१) इति। इह चेतनादीनां बुद्धिग्रहणेनैव ग्रहणं, शारीरे तु चेतनादीनामपि पृथगात्मगमकत्वेन पृथक् पाठः। एतच्च तत्रैव व्याकरणीयम्। परादयो यथा- "परापरत्वे युक्तिश्च सङ्ख्या संयोग एव च। विभागश्च पृथक्त्वं च परिमाणमथापि च।।संस्कारोऽभ्यास इत्येते गुणाः प्रोक्ताः परादयः। (सू.अ.२६) इति। एते च सामान्यगुणा अपि नात्युपयुक्तत्वात्तथा बुद्धिप्राधान्याच्चान्ते प्रोक्ताः। प्रोक्ता इति प्रकर्षेण विशेषगुणत्वादिनोक्ताः। ४९।

**प्रयत्नादि कर्म चेष्टितमुच्यते।।४९।।**

**व्याख्या**

क्रमागतं कर्म निर्दिशति- प्रयत्नादीत्यादि। प्रयतनं प्रयत्नः कर्मैवाद्यमात्मनः; यथा- "तुल्यास्यप्रयत्नं सवर्णम्" (पा.अ.१पा.१सू.९) इत्यत्र व्याख्यातम्। आदिशब्दः प्रकारवाची। तेन संस्कारगुरुत्वादिजन्यकृत्स्नक्रियावरोधः। यद्यपि चेष्टितं प्राणिव्यापार उच्यते, तथाऽपीह सामान्येन क्रिया विवक्षिता। चेष्टितपदेनैव सर्वकर्मलाभे सिद्धे वमन-ादिकर्मनिषेधे च सिद्धे प्रयत्नादीति पदं सुसूक्ष्मप्रयत्नरूपकर्मव्यापित्वद्योतनार्थम् । अन्ये तु प्रयत्नादीति प्रयत्नकारणमिति ब्रुवते, प्रयत्नग्रहणं च कारणोपलक्षणं वदन्ति; तेन गुरुत्-वादिकार्यस्यापि कर्मणो ग्रहणमिति। प्रयत्नशब्दश्चायुर्वेदेऽपि कर्मवचनो दृश्यते; "प्रवृत्तिस्तु चेष्टा कार्यार्था, सैव क्रिया प्रयत्नः कार्यसमारम्भश्च" (वि.अ.८) इति वचनात्।।४९।।

**समवायोऽपृथग्भावो भूम्यादीनां गुणैर्मतः।**

**स नित्यो यत्र हि द्रव्यं न तत्रानियतो गुणः।।५०।।**

व्याख्या :

समवायमाह- समवाय इत्यादि। समवायस्य चायं निर्देश एव लक्षणम्। तेनोत्तरत्र द्रव्यादिलक्षणे पुनरस्य लक्षणं न कर्तव्यम्। समवाय इति लक्ष्यनिर्देशः, अपृथग्भाव इति

लक्षणम्; अपृथग्भाव: अयुतसिद्धि:, सहैवावस्थानमिति यावत्। यथा- अवयवावयविनो:, गुणगुणिनो:, कर्मकर्मवतो:, सामान्यसामान्यवतो:; नह्यवयवादीन् विरहय्यावयव्यादय उपलभ्यन्ते। अपृथग्भावमेव विशेषयन्नाह- भूम्यादीनां गुणैर्मत इति। भूम्यादीनां भूमिप्रकाराणां; भूमिश्च भूयसामाधेयानामाधारा, तेनाधारत्वोदाहरणार्थमुक्ता; यतो भूमेरर्था: सर्वे गुर्वादिपराद्याश्च गुणास्तथा चावयविसामान्यक(ध)र्माण्यप्याधेयानि, नेतरद्रव्ये यथोक्तसर्वाधेयसम्पत्ति:। एतेन भूम्यादीनामित्याधाराणां, गुणैरिति अप्रधानैराधेयै:; आधेयो ह्याधारापेक्षयाऽप्रधानम्, अप्रधाने च गुणशब्दो यथा- गुणीभूतोऽयमिति, अप्रधानमित्यर्थ:; तेनाधाराणामाधेयैर्योऽपृथग्भाव: स समवाय: इति। तेन पृथिवीत्वगन्धवत्त्वयोरपृथक्सिद्धयोरप्याधाराधेयभावाभावान्न समवाय इत्युक्तं भवति। अत एवोक्तं वैशेषिके यत्- “अयुतसिद्धानामाधार्याधारभूतानां य: सम्बन्ध इहेतिप्रत्ययहेतु: स समवाय:” (प. ध.सं.द्रव्यपदार्थनिरूपण) इति। स नित्य इति समवायोऽविनाशी। सत्यपि समवायिनां द्रव्याणां नाशे समवायो न विनश्यति। अत्र हेतुमाह- यत्र हीत्यादि। यत्र द्रव्यं नियतं नित्यं, यथा- आकाशं, न तत्र नित्य आकाशेऽनियतो विनाशी गुण:, ‘कश्चित्’ इति शेष:। एवं मन्यते- नित्ये व्योम्नि परिमाणमपि तावन्नित्यं, तथा द्रव्यत्वमप्याकाशगतं नित्यं, तथा नित्ययोराकाशतद्गुणयो: समवायलक्षण: सम्बन्धोऽपि नित्य एव। एवं तत्र समवायस्य नित्यत्वे सिद्धे एकरूपत्वात् समवायस्यान्यत्रापि नित्यत्वमेव। न चाश्रयद्रव्यनाशे समवायविनाश:। यथा- गोव्यक्तिविनाशेऽपि गोत्वस्य सामान्यस्य न विनाश:। नित्यस्यैव समवायस्य ते ते पार्थिवद्रव्यादयस्तत्र तत्र व्यञ्जका भवन्ति सामान्यस्येव व्यक्तय:। अन्यैस्तु नित्यानित्यभेदेन द्विविध: समवायो व्याख्यात:; अयं च ग्रन्थो भूम्यादीनां गुणैरेव य: सम्बन्धस्तस्यैव यथाश्रुतस्य प्रतिपादक इति व्याख्यातं; तत्तु न व्यापकं नापि वैशेषिकमतानुयायीति नेह प्रपञ्चितम्।।५०।।

**यत्राश्रिता: कर्मगुणा: कारणं समवायि यत्।**

**तद्द्रव्यं ...। ५१।**

**व्याख्या :**

द्रव्यलक्षणमाह- यत्रेत्यादि। यत्राश्रिता यत्र समवेता:, कर्म च गुणाश्च कर्मगुणा:। कारणं समवायि यदिति समवायि कारणं यत्, द्रव्यमेव हि द्रव्यगुणकर्मणां समवायिकारणम्। समवायिकारणं च तद् यत् स्वसमवेतं कार्यं जनयति; गुणकर्मणी तु न स्वसमवेतं कार्यं जनयत:, अतो न ते समवायिकारणे। एतत्कर्मवत्त्वं हि द्रव्यस्य गुणादिपञ्चपदार्थव्यावृत्तिमात्रलक्षणकथनं, न तु सजातीयव्यापकविजातीयव्यावर्तकलक्षणकथनं; येन कर्मसमवायो नाकाशादीनां वर्तते , तेन लक्षणानुगतं विजातीयव्यावृत्तं द्रव्यस्य लक्षणं गुणवत्त्वं समवायिकारणत्वं च बोद्धव्यम्। यदु(त्तू)त्पन्नमात्रं द्रव्यं प्रथमक्षणे निर्गुणं, तदपि

द्वितीयक्षणावश्यम्भाविगुणवत्तया तद्योग्यत्वाद्गुणवदेवेति मन्तव्यम्। वैशेषिकेऽप्युच्यते- क्रियावद्गुणवत् समवायिकारणं द्रव्यम् (वै.द.अ.१सू.१५) इति। तत्रापि च यथेह व्याख्यातं तथैव व्याख्यातम्। ५१। -

**...समवायी तु निश्चेष्टः कारणं गुणः।।५१।।**

**व्याख्या :**

गुणलक्षणमाह- समवायीत्यादि। समवायीति समवायाधेयः; तेन व्यापकद्रव्येभ्यो निष्क्रियेभ्य आकाशादिभ्यो गुणस्य व्यावृत्तिः; नह्याकाशादयः समवायाधेयाः। निर्गतिश्चेष्टायाः निश्चेष्टः; चेष्टानिर्गत्या चेह चेष्टाशून्यत्वं तथा चेष्टाव्यतिरिक्तत्वं चोच्यते; तेन चेष्टारूपात् कर्मणो व्यावृत्तिः, तथा क्रियाधारत्वयोगेभ्यो मूर्तद्रव्येभ्यो व्यावृत्तिः सिद्धा; गुणस्य कारणमित्यनेन चाकारणेभ्यः सामान्यविशेषसमवायेभ्यो व्यावृत्तिः सिद्धा। कारणत्वं तु विभुद्रव्यपरिमाणान्त्यावयविरूपादिषु लक्षणीयेषु गुणेषु नास्ति, तेन भागासिद्धं लक्षणं स्यात्, अतः कारणत्वेनेह भावरूपकारणाव्यभिचारि सामान्यवत्त्वं लक्षणतया बोद्धव्यम्। तच्च सामान्यवत्त्वं सर्वगुणव्यापकं सामान्यादिव्यावर्तकं च, सामान्यादीनां सामान्यवत्त्वाभावात्। अथवा विभुद्रव्यपरिमाणान्त्यावयविरूपाद्यन्तराणां कारणत्वदर्शनाद्विभुद्रव्यपरिमाणान्त्यावयविरूपादावपि कारणत्वयोग्यत्वमस्त्येवेति न भागासिद्धता कारणत्वस्य; किंवा योगिप्रत्यक्षज्ञानहेतुतया विभुद्रव्यपरिमाणादीनामपि कारणत्वं बोद्धव्यम्। एवम्भूतं च कारणत्वं यद्यपि सामान्यादिष्वपि क्वचिदनुगम्यते, तथाऽपि 'समवायी तु' इति पदेन समवायाधारता तथा समवायाधेयता च युगपद्विपक्षिता; तेन समवायकेवलाधारस्य विभुद्रव्यस्य तथा समवायकेवलाधेयस्य सामान्यादेश्च व्युदासः सिद्धो भवति।।५१।।

**संयोगे च विभागे च कारणं द्रव्यमाश्रितम्।**

**कर्तव्यस्य क्रिया कर्म कर्म नान्यदपेक्षते।।५२।।**

**व्याख्या :**

कर्मलक्षणमाह- संयोग इत्यादि। संयोगे च विभागे च युगपत् कारणम्। तेन संयोगे उत्तरदेशसंयोगकारके विभागाकारणे, तथा विभागे च विभागजविभागमात्रकारणे संयोगाकारणे व्यावृत्तिः सिद्धा। द्रव्यमाश्रितमिति स्वरूपमात्रकथनं व्याख्येयं, द्रव्यव्यावृत्तिस्तु 'कर्म नान्यदपेक्षते' इत्यनेनैव सिद्धा ।अस्यायमर्थो यत्- कर्म उत्पन्नं स्वाश्रयस्य द्रव्यस्य पूर्वदेशविभागे उत्तरदेशसंयोगे च कर्तव्ये नान्यत्कारणं पश्चात्कालभाव्यपेक्षते; द्रव्यं तु यद्यपि संयोगविभागकारणं युगपद्भवति, तथाऽपि तदुत्पन्नं सद्यदा कर्मयुक्तं भवति तदैव संयोगविभागकारणं स्यात् ; कर्म तूत्पन्नं करोत्येव परं संयोगविभागौ न तु

कारणान्तरं पश्चाद्भाव्यपेक्षते, संयोगविभागाश्रयप्रत्यासत्तिं त्वपेक्षते, सा च पूर्वसिद्धैवेति न चरमभाविकारणान्तरापेक्षता कर्मणः। अथ कर्मशब्देन वमनादीनां तथाऽदृष्टस्य तथा क्रियायाश्चाभिधीयमानत्वात् कस्य कर्मण इदं लक्षणमित्यत आह- कर्तव्यस्य क्रिया कर्मेति। एतेन क्रियारूपस्य कर्मण इदं लक्षणं नादृष्टादेरिति।।५ २।।

**इत्युक्तं कारणं...। ५३।**

**व्याख्या:**

प्रकरणमुपसंहरति- इतीत्यादि। इति समाप्तौ; तेनैतावदेव सामान्यादिषट्कं सर्वस्यैव कार्यजातस्य कारणं, नान्यत् कारणमस्ति ।५ ३। -

... कार्यं धातुसाम्यमिहोच्यते।

धातुसाम्यक्रिया चोक्ता तन्त्रस्यास्य प्रयोजनम्।।५ ३।।

**व्याख्या :**

कारणं सामान्येनाभिधायायुर्वेदोपयुक्तं कार्यमाह- कार्यमित्यादि। धातुसाम्यम् आरोग्यं; वक्ष्यति हि- "विकारो धातुवैषम्यं साम्यं प्रकृतिरुच्यते। सुखसञ्ज्ञकमारोग्यम्" (सू.अ.९) इत्यादि। इहेत्यायुर्वेदे; तेनान्यत्रान्यदपि घटादि कार्यमुच्यते। इह तु किमिति तत् कार्यं नोच्यत इत्याह- धातुसाम्येत्यादि। चकारो हेतौ। धातुसाम्यक्रियैव यस्मादायुर्वेदप्रयोजनं, तस्मादायुर्वेदे धातुसाम्यमेव कार्यमुच्यते प्रयोजनं कथ्यते; अन्यत्त्वविवक्षितत्वात्तथाऽप्रधानत्वाच्च नेह कार्यत्वेनोच्यते।।५ ३।।

**कालबुद्धीन्द्रियार्थानां योगो मिथ्या न चाति च।**

**द्व्याश्रयाणां व्याधीनां त्रिविधो हेतुसङ्ग्रहः।।५४।।**

**व्याख्या :**

सम्प्रति सामान्येन कारणमुक्तं तदायुर्वेदोपयुक्तद्वारेण वक्तव्यं; तत्र व्याधिकारणमेव तावदग्रेऽभिधीयते- कालेत्यादिना सूत्रक्रमानुरोधात्। सूत्रणं हि "हेतुलिङ्गौषधज्ञानम्" (सू.अ.१) इति। कालः शीतोष्णवर्षलक्षणः, बुद्धिः प्रज्ञा, इन्द्रियार्थाः शब्दस्पर्शरूपरसगन्धास्तत्सहचरितानि द्रव्यगुणकर्माणीन्द्रियद्वारोपयुज्यमानानि च; तेषां कालादीनां योगः सम्बन्धः। तस्य विशेषणत्रयं- मिथ्या न चाति चेति। तेन कालादीनां मिथ्यायोगः, नच योगः अयोग इत्यर्थः, अति च योगः अतियोग इत्यर्थः। द्व्याश्रयाणामिति मनःशरीराश्रयाणाम्। एतच्च मनःशरीराधिष्ठानत्वं पृथङ्मिलितं च बोद्धव्यम्। त्रिविध इत्ययोगातियोगमिथ्यायोगरूपः। हेतुसङ्ग्रहः हेतुसङ्क्षेपः। एते च कालादीनामतियोगायोगमिथ्यायोगास्तिस्रैषणीये "तत्रातिप्रभावतां" (सू.अ.११) इत्यादिना ग्रन्थेन सुव्यक्तं वाच्या इति नेह विव्रियन्ते।

कालग्रहणं त्विहादौ कृतं, कालस्य दुष्परिहारत्वात्। तदनु बुद्धिरुच्यते, बुद्ध्यपराध्‌ास्यैवेन्द्रियार्थातियोगादिहेतुत्वात्; वक्ष्यति हि- "प्रज्ञापराधाद्ध्यहितानर्थान् पञ्च निषेवते" (सू.अ.२८) इति; एवं च यद्यप्यसात्म्येन्द्रियार्थसंयोगः प्रज्ञापराधे प्रविशति, तथाऽपि प्रत्यासन्नकारणत्वादसात्म्येन्द्रियार्थसंयोगेनैवायं पृथक् तन्त्रे सूच्यते, प्रज्ञापराधस्त्ववसात्म्येन्द्रियार्थसंयोगव्यतिरिक्तकायवाङ्मनःक्रियापराधे वर्तते। अत्र चाधर्मोऽपि व्याधिहेतुरस्ति, यदुक्तं- "क्रियाघ्नाः कर्मजा रोगाः" (शा.अ.१) इत्यादि; तस्य चाधर्मस्य कालग्रहणेनैव ग्रहणं केचिन्मन्यन्ते; तन्न, तिस्त्रैषणीये प्रज्ञापराधेनैवाधर्मग्रहणात्। तत्र हि, अनृतवचनाभिध्यादिवाङ्मनोमिथ्यायोगरूपः प्रज्ञापराधविशेष उक्तः; नत्वनृतवचनादीनां स्वरूपेण व्याधिकर्तृत्वं, किन्त्वधर्मोत्पादावान्तरव्यापाराणामेव; तेन प्रज्ञापराध एवाधर्मोत्पादावान्तरव्यापारः कर्मजरोगेषु कारणं, याग इव धर्मोत्पादावान्तरव्यापारः स्वर्गे। यत्तूच्यते- कालपरिणामजायमानत्वात् कर्मजविकाराणां कालजत्वं, यदुक्तं- "कालस्य परिणामेन जरामृत्युनिमित्तजाः। रोगाः स्वाभाविका दृष्टाः स्वभावो निष्प्रतिक्रियः" (शा.अ.१) इति; तन्न, तथा सत्यसात्म्येन्द्रियार्थसंयोगजस्यापि किञ्चित्कालपरिणामजायमानस्य कालजत्वं स्यात्। नच कालातियोगाद्यभिधायिग्रन्थे तिस्त्रैषणीये कर्मावरोधः कथमपि प्रतिभाति। कतिधापुरुषीये तु "धीधृतिस्मृतिविभ्रंशः सम्प्राप्तिः कालकर्मणाम्। असात्म्येन्द्रियसंयोगा विज्ञेया रोगहेतवः" (शा.अ.१) इत्यभिधाय स्वाभाविकानां रोगाणां तथा कर्मजानां च कालज एवावरोधः कृतः। उक्तं हि तत्र- "कालस्य परिणामेन जरामृत्युनिमित्तजाः। रोगाः स्वाभाविका दृष्टाः स्वभावो निष्प्रतिक्रियः" (शा.अ.१) इति, तथा "निर्दिष्टं दैवसञ्ज्ञं तु कर्म यत् पौर्वदैहिकम्। हेतुस्तदपि कालेन रोगाणामुपलभ्यते" (शा.अ.१) इति। अत्रापि बुद्धिमिथ्यायोगरूपः प्रज्ञापराध एव रोगजनककर्मकारणम्। कालविशेषप्राप्त्या तु येषां व्याधीनामागमो भवति, ते कालमिथ्यादियोगजन्या वा भवन्तु, असात्म्येन्द्रियार्थप्रज्ञापराधजन्या वा; सर्व एवाविशेषेण कालकृताभिव्यक्तिमात्रपरिग्रहणात्तत्र कालसम्प्राप्तिजन्या इत्युक्ता गदाः। तथाहि- तत्र सन्तताादिज्वरा अपि कालजन्या एवोक्ताः। वचनं हि- "सन्ततः सततोऽन्येद्युस्तृतीयकचतुर्थकौ। स्वे स्वे काले प्रवर्तन्ते काले ह्येषां बलागमः" (शा.अ.१) इति। नच सन्ततादौ कालस्य मिथ्यायोगादयः कारणत्वेनोपलभ्यन्ते, किन्तर्ह्यसात्म्येन्द्रियार्थसंयोगप्रज्ञापराधावेव; तथा स्वाभाविकेषु च रोगेषु न कालमिथ्यायोगादयः कारणत्वेनोपलभ्यन्ते; तस्मान्न तत्र कालमिथ्यायोगादिजन्याः कालजत्वेनाचार्यस्याभिप्रेताः, किन्तु कालाभिव्यञ्जनीयाः कालजाः; अत एव च तत्र "सम्प्राप्तिः कालकर्मणाम्" (शा.अ.१) इति पठितं नतु "कालो मिथ्या न चाति च" इति पठितम्। किञ्च तत्रापि कालमभिधायापि कर्मणामिति पदं पृथक् पठित्वा काले जातः कर्मजः पृथगेव सूचितः। किञ्च, उन्मादनिदाने साक्षादेवाचार्येण कर्मजस्य प्रज्ञापराधजत्वमुक्तम्। वचनं हि- "प्रज्ञापराधात् सम्भूते व्याधौ कर्मज आत्मनः। नाभिशंसेद्बुधो देवान्न पित□न्न

च राक्षसान्" (नि.अ.७) इति। जनपदोद्ध्वंसनीयेऽप्युक्तं- "तस्यमूलमधर्मः, तन्मूलं चासत्कर्म पूर्वकृतं, तयोर्योनिः प्रज्ञापराध एव" (वि.अ.३)। (तदेवं कर्मापेक्षद्वयमुपदर्शितं,) बलाबलं तु विद्वांसः स्वयमेव निर्लोचयिष्यन्ति। इदं त्वत्र चिन्त्यतां- स्वाभाविकानां क्षुत्पिपासादीनां तथा कालसम्यग्योगेऽपि जायमानानां दोषचयप्रकोपाणां क्व प्रवेशो भवतु; न तावत् कालजे, यतः कालो हि तत्र सम्यग्युक्त एव, कालसम्यग्योगश्च न व्याधिकारणमिति सिद्धान्तः; अथ कालप्रतिनियतस्तत्रासात्म्येन्द्रियार्थसंयोग एव कारणमिष्यते, तथाऽप्येवं सति कालमिथ्यायोगादावप्यसात्म्येन्द्रियार्थसंयोग एव कारणमिति वक्तुं पार्यते; तस्मादस्मिन्मार्गे एवं बुद्धिर्वलते - यत्- सहजानां विकाराणां निष्प्रतिक्रियत्वेनेहायोगादिजन्यत्वेनावरोधो न कृत एव, कालस्वभावजा अपि सहजा एव; या त्वत्र प्रतिक्रिया कालस्वभावजानामनागतानां भावानां सत्त्वगुणद्रव्यसेवादिरूपा तथा स्वाभाविकानां च क्षुत्पिपासाजरादीनां कालभोजनरसायनादिरूपा, तस्या अकरणे सति कालस्वभावजस्य रोगस्य प्रादुर्भावः प्रज्ञापराधजन्य एव, उचिते हि काले कर्तव्याकरणं प्रज्ञापराध एव; उक्तं हि कतिधापुरुषीयेऽपि प्रज्ञापराधसङ्ग्रहे- "कर्मकालातिपातश्च मिथ्यारम्भश्च कर्मणाम्" (शा.अ.१) इति। अन्ये तु मिथ्यायोगादिशून्यकालविद्यमानत्वेन काल एवावरोध एषां विकाराणामिति कतिधापुरुषीये वक्ष्यमाणग्रन्थस्य यथाश्रुतार्थपरिग्रहाद्वर्णयन्ति। नचेति चकाराद्धीनयोगं गृह्णाति। वक्ष्यति हि- "मिथ्यातिहीनलिङ्गेभ्यो यो व्याधिरुपजायते" (शा. अ.१) इति। हीनयोगस्य तु साक्षादपठनमयोगप्रभेदत्वात्; स्वल्पयोगे(गो)ऽप्ययोगो भवति, यथैकतण्डुलाभ्यवहारेऽनशनमुच्यते।।५४।।

**शरीरं सत्त्वसञ्ज्ञं च व्याधीनामाश्रयो मतः।**

**तथा सुखानां, योगस्तु सुखानां कारणं समः।।५५।।**

**व्याख्या :**

द्व्याश्रयाणामित्यनेनोक्तमाश्रयं दर्शयति- शरीरमित्यादि। अत्र शरीरमादौ कृतं, शरीररोगाधिकारेणैवास्य तन्त्रस्य प्रवृत्तत्वात्। सत्त्वसञ्ज्ञशब्देन मन उच्यते; किंवा सत्त्वशब्देनैव मनसि लब्धे सञ्ज्ञाशब्देनात्मशरीरसम्बद्धं मन उच्यते, शरीराद्यसम्बन्धस्य मनसो व्याध्यनाश्रयत्वात्। असमासेन च पृथगपि शरीरमनसोर्व्याध्याश्रयत्वं दर्शयति। यतः कुष्ठादयः शारीरा एव, कामादयस्तु मानसाः, उन्मादादयश्च द्व्याश्रयाः। आरोग्यस्याश्रयं हेतुं चाह- तथा सुखानामित्यादि। सुखानामिति आरोग्याणाम्। वचनं हि- "सुखसञ्ज्ञकमारोग्यं विकारो दुःखमेव तु" (सू.अ.९) इति। तथेति शरीरं मनश्च, तत्र शरीररोगाभावरूपस्यारोग्यस्य शरीरमाश्रयः, मानसरोगाभावस्य तु मनः। योगस्तु समः कालबुद्धीन्द्रियार्थानां सम्यग्योगरूपस्तथा सुखानामारोग्याणां कारणम्। सुखानामिति सुखपदाभिधेयानां च रोगाभावानां बहुत्वं निषेध्यरोगबहुत्वादेव बोद्धव्यम्।

इदमेव ह्यभावानां बहुत्वं यन्निषेध्यभावबहुत्वम्। ननु "आयुर्वेदागमो हेतुः" (सू.अ.१) इत्यादावध्यायार्थसङ्ग्रहे व्याध्याश्रयो न सङ्गृहीतः, तत् किमिदमनार्षं? न, हेतवश्चेत्यनेन व्याध्याश्रयरूपस्यापि हेतोस्तत्र सङ्ग्रहणम्।।५५।।

**निर्विकारः परस्त्वात्मा सत्त्वभूतगुणेन्द्रियैः।**

**चैतन्ये कारणं नित्यो द्रष्टा पश्यति हि क्रियाः।।५६।।**

**व्याख्या :**

सत्त्वमात्मा शरीरं चेति वचनेन त्रयमुपात्तम्, अत्र शरीरमनसी व्याध्याश्रयतयोक्ते, आत्मनस्तु का व्यवस्थेत्याह- निर्विकार इत्यादि। निर्विकारो निर्विकृतिः, तेन नीरोगत्वमात्मनः। पर इति सूक्ष्मः श्रेष्ठो वा, तेन सत्त्वशरीरात्ममेलकरूपो य आत्मशब्देनोच्यते तं व्यावर्तयति; यदुक्तं- "संयोगपुरुषस्येष्टो विशेषो वेदनाकृतः" (शा.अ.१) इति। संयोगेऽपि चात्मादीनां मनस्येव वेदना भवति, सा तु मनःसंयुक्ते आत्मन्यपि सम्बद्धेत्युच्यते, तेन "निर्व्यथे चान्तरात्मनि" (सू.अ.२२) इति वचनं निर्व्यथे मनसीति स्यात्; तथा शरीरादावप्यात्मशब्दो वर्तते, तद्व्यवच्छेदार्थं पर इति पदम्। उक्तं ह्यन्यत्र- "ब्रह्मेन्द्रवाय्वग्निमनोधृतीनां धर्मस्य कीर्तेर्यशसः श्रियश्च। तथा शरीरस्य शरीरिणश्च स्याद्□ादशस्विङ्गित आत्मशब्दः" इति। ननु, यद्यात्मा निर्विकारस्तत् किं ज्ञानरूपोऽप्यस्य विकारोऽस्ति वा नास्तीत्याह- सत्त्वेत्यादि। सत्त्वं मनः, भूतगुणाः शब्दादयः, इन्द्रियाणि चक्षुरादीनि, एतैः करणभूतैश्चैतन्ये कारणं भवत्यात्मा। चैतन्यं चात्मनि जायते व्यज्यते वा। अत एव च सत्त्वादीनां ज्ञानकारणानां सर्वत्रासम्भवात् सर्वगतेऽप्यात्मनि न सर्वत्र प्रदेशे ज्ञानं भवति। ननु यदि चैतन्यवानात्मा, तदा कदाचिज्ज्ञानवान् कदाचिदज्ञ इत्यनित्यः स्यादित्याह- नित्य इति। नित्यस्याप्यात्मनो ज्ञानमनित्यं; नच धर्मानित्यत्वे धर्मिणोऽप्यनित्यत्वं, नह्याकाशगुणशब्दानित्यत्वेऽप्याकाशस्याप्यनित्यत्वमिति भावः। नित्यत्वं चात्मनः पूर्वापरावस्थानुभूतार्थप्रतिसन्धानात्; नह्यनित्ये ज्ञातरि पूर्वानुभूतमर्थमुत्तरो ज्ञाता प्रतिसन्धत्ते; नहि देवदत्तबुद्धमर्थं यज्ञदत्तोऽवगतत्वेन प्रतिसन्दधाति। ननु, दृश्यते ज्ञानवतः सुखोपलब्धावनुरागलक्षणो विकारस्तथा दुःखोपलब्धौ च द्वेषलक्षणः, तत् कथं सुखदुःखोपलब्धावयमात्मा निर्विकार इत्याह- द्रष्टा पश्यति हि क्रिया इति। द्रष्टा साक्षी; तेन यतिर्यथा परमशान्तः साक्षी सञ्जगतः क्रियाः सर्वाः पश्यन्न रागद्वेषादिना युज्यते, तथाऽऽत्माऽपि सुखदुःखाद्युपलभमानोऽपि न रागादिना युज्यते; दृश्यमानरागादिविकारस्तु मनसि, प्राकृतबुद्धौ वा साङ्ख्यदर्शनपरिग्रहाद्भवतीति भावः। साङ्ख्यमते च मनःशब्देन बुद्धिरन्तःकरणं च गृह्यते।।५६।।

**वायुः पित्तं कफश्चोक्तः शारीरो दोषसङ्ग्रहः।**

**मानसः पुनरुद्दिष्टो रजश्च तम एव च।।५७।।**

**व्याख्या :**

सम्प्रति विकाराश्रयं तथा विकारस्य व्यवहितं च हेतुमभिधाय प्रत्यासन्नं दोषरूपहेतुमाह- वायुरित्यादि। अत्र प्रधानत्वादग्रे वायुरुक्तः, प्राधान्यं चाशुभूरिदारुणविकारकर्तृत्वात्; वचनं हि- 'आशुकारी मुहुश्चारी' (सु. नि. अ. १) इति; तथा अशीतिं वातजान् विकारान्, चत्वारिंशत् पित्तविकारान्, विंशतिं च कफजान् वक्ष्यति हि महारोगाध्याये (सू. अ. २)। वातमनु पित्तं प्रधानं, शरीरमूलभूताग्निहेतुत्वात्तथा कफाधिकविकारकर्तृत्वात्तथा कफापेक्षया चाशुकारित्वात्। असमासकरणं तु पृथगपि वाय्वादीनां रोगकर्तृत्वोपदर्शनार्थम्। शारीर इति मानसदोषव्यवच्छेदार्थम्। सङ्ग्रह इति "द्व्युल्बणैकोल्बणैः षट् स्युर्हीनमध्याधिकैश्च षट्" (सू.अ.१७) इत्यादिवक्ष्यमाणप्रपञ्चस्य सङ्क्षेपः। ननु, शोणितस्यापि दोषत्वान्नायं सङ्ग्रहः साधुः, यतो रक्तस्यापि वातादिवद्विशिष्टहेतुलक्षणविकारचिकित्सितनिर्देशः कृतः; तत्र हेतुनिर्देशो यथा- "काले चानवसेचनात्" (सू. अ.२४/९) इत्यादि, लक्षणं च यथा- "तपनीयेन्द्रगोपाभं पद्मालक्तकसन्निभम्" (सू. अ.२४/२२) इत्यादि, रक्तविकाराश्च रक्तार्शःप्रदररक्तपित्तादय उक्ताः, उपक्रमश्च "स्रावणं शोणितस्य तु" (सू.अ.२४/१८) इत्यादिनोक्तः, तथा दोषसञ्ज्ञा च चरके कृता, यदुक्तं- "कफे वाते जितप्राये पित्तं शोणितमेव वा। यदि कुप्यति वातस्य क्रियमाणे चिकित्सिते।।यथोल्बणस्य दोषस्य तत्र कार्यं भिषग्जितम्" (चि.अ.५/२७) इति; तथा च तन्त्रान्तरेऽपि शल्ये शोणितं दोषत्वेनोक्तं- "तैरेतैः शोणितचतुर्थैः" (सु. सू.अ.२१) इति वचनात्। नैवं, दोषो हि स्वतन्त्रदूषणात्मक उच्यते; यतो न वातादयो वृद्धाः किञ्चिदपेक्ष्य दूषयन्ति किन्तु स्वत एव, शोणितं तु दुष्टवातादिसंसर्गमपेक्ष्यैव दूषकं भवति, न हि शोणितं विकृतवातादिसम्बन्धमन्तरेण विकृतं भवति; सर्वदा वातादिजनकैरेव शोणितदुष्टेः; तथा सर्वदा वातादिलक्षणयुक्तस्यैव शोणितस्य दुष्टत्वात्; यश्च हेत्वादिविशेष उक्तः स वातादियुक्तस्यैव शोणितस्य भवति; तेन वातादय एव तत्रापि दूषणात्मकाः, शोणितं तु स्वप्रमाणातिरिक्तमपि दूष्यमेव; न च दूष्यस्य हेत्वादयो विशिष्टा न भवन्ति, यतो मांसादीनामपि हेत्वादिविशेषोऽस्ति; यथा मांसदुष्टौ- "मांसवाहीनि दुष्यन्ति भुक्त्वा च स्वपतां दिवा" (वि.अ.५) इत्यादि वक्ष्यति; मांसदुष्टिलक्षणं "शृणु मांसप्रदोषजान्" (सू.अ.२८) इत्यादिना विविधाशितपीतीये वक्ष्यति यान् विकारास्ते ज्ञेयाः, यत एतानेव मांसदोषविकारान् स्रोतोविमाने मांसदुष्टिलक्षणत्वेनातिदेशादभिधास्यति, दुष्टमांसविकाराश्चाधिमांसार्बुदादय उक्ताः; उपक्रमश्च "मांसजानां तु संशुद्धिः शस्त्रक्षाराग्निकर्म च" (सू.अ.२८) इत्युक्तः। तस्माद्दूष्याधिकारे दोषकृते कार्ये दूष्येण व्यपदेशः- रक्तजोऽयं, मांसजोऽयमित्यादि; यथा- स्नेहाधारेण वह्निना दग्धे स्नेहदग्ध इति व्यपदेशः। दोषसञ्ज्ञा तु पीडाकर्तृत्वसामान्याददोषेऽपि स्यात् ; यथा- "स्वयं प्रवृत्तं तं दोषमुपेक्षेत हिताशनैः"

(चि.अ.५/४६) इत्यत्र पुरीषमेव दोषत्वेनोक्तम्। सुश्रुते तु शोणितस्य दोषत्वं व्रणेषु प्रायः शोणितदुष्टिदर्शनादुपचरितमेवोक्तम्। यतः प्रदेशान्तरे व्रणप्रश्ने वातादयस्त्रय एव तत्राप्युक्ताः- "वातपित्तश्लेष्माण एव देवसम्भवहेतवो भवन्ति" (सु.सू.अ.२१) इत्यादिना। किञ्च यदि शोणितं दोषः स्यात्तदा वातादिवत्प्रकृत्यारम्भकं स्यात्, नचारभते; तस्मार्त्तय एव दोषा इति सिद्धम्। मानसदोषमाह- मानसः पुनरित्यादि। पुनःशब्दोऽवधारणे, तेन मानस उद्दिष्ट एव परं न शारीरदोषवत् प्रपञ्चितः, मानसदोषाणामस्मिंस्तन्त्रे कायचिकित्सारूपेऽप्रास्ताविकत्वादिति भावः। आदौ रज उक्तं प्राधान्यात्; वचनं हि- "नारजस्कं तमः प्रवर्तते" (वि.अ.६) इति। एवशब्देन सत्त्वाख्यगुणस्यादोषत्वमवधारयति, सत्त्वं ह्यविकारि।।५७।।

**प्रशाम्यत्यौषधैः पूर्वो दैवयुक्तिव्यपाश्रयैः।**

**मानसो ज्ञानविज्ञानधैर्यस्मृतिसमाधिभिः।।५८।।**

**व्याख्या :**

सम्प्रति दोषप्रशमकारणमाह- प्रशाम्यतीत्यादि। पूर्व इति शारीरः। दोषग्रहणेन तज्जन्या व्याधयोऽपि गृह्यन्ते, विकृतदोषादनन्यत्वाद्व्याधीनाम्। दैवमदृष्टं, तदाश्रित्य यद्व्याधिप्रतीकारं करोति तद्दैवव्यपाश्रयं बलिमङ्गलादि; एतच्च प्रथममुक्तं सद्योऽक्लेशेन च व्याधिप्रशमकत्वात्। युक्तिः योजना; शरीरभेषजयोर्हितो यो योगस्तदपेक्षं संशोधनसंशमनादि युक्तिव्यपाश्रयमुच्यते। ज्ञानम् अध्यात्मज्ञानं, विज्ञानं शास्त्रज्ञानं , धैर्यम् अनुन्नतिश्चेतसः, स्मृतिः अनुभूतार्थस्मरणं, समाधिः विषयेभ्यो निवर्त्यात्मनि मनसो नियमनम्।।५८।।

**रूक्षः शीतो लघुः सूक्ष्मश्चलोऽथ विशदः खरः।**

**विपरीतगुणैर्द्रव्यैर्मारुतः सम्प्रशाम्यति।।५९।।**

**सस्नेहमुष्णं तीक्ष्णं च द्रवमम्लं सरं कटु।**

**विपरीतगुणैः पित्तं द्रव्यैराशु प्रशाम्यति।।६०।।**

**गुरुशीतमृदुस्निग्धमधुरस्थिरपिच्छिलाः।**

**श्लेष्मणः प्रशमं यान्ति विपरीतगुणैर्गुणाः।।६१।।**

**व्याख्याः**

सम्प्रति शरीररोगाधिकारप्रवृत्तत्वादस्य तन्त्रस्य शारीररोगजनकवातादिलक्षणं भेषजं

चाह- रूक्ष इत्यादि। प्रधानत्वादग्रे वायोरभिधानम्। रूक्षादीनां ज्यायस्त्वादभिधानं, तेन दारुणादयोऽपि गुणा बोद्धव्या:; रूक्षत्वं च वायावधिकं, स्नेहसाध्यत्वाद्वायो:; अतो रूक्षत्वमग्रेऽभिहितम्। यद्यपि वैशेषिकेऽनुष्णाशीतो वायु:, तथाऽपीह शीतेन वृद्धिदर्शनादुष्णेन च प्रशमदर्शनात्तथा केवलवातारब्धे रोगे शीतदर्शनाच्च शीत एव वायु:; यच्च पित्तयुक्तस्योष्णत्वं, तद्योगवाहित्वात्; यथा पाषाणस्य येन द्रव्येण शीतेनोष्णेन वा योगो भवति तद्गुणानुविधानं, तथा वायोरपि। विपरीता वातगुणप्रतिपक्षा गुणा यस्य तद्विपरीतगुणं; गुणशब्देन चेह धर्मवाचिना रसवीर्यविपाकप्रभावा: सर्व एव गृह्यन्ते, तेन प्रभावादपि यद्वातविपरीतं तदपि गृह्यते। अन्ये त्वेकविपरीतशब्दलोपाद्विपरीतं विपरीतगुणं च ग्राहयन्ति; तेन विपरीतग्रहणात् प्रभावविपरीतं गृह्यते, गुणवैपरीत्याद्विपाकादयो गृह्यन्ते। ननु विपरीतगुणभूयिष्ठैरपि वातादीनां प्रशमो भवति, यतो न हि सर्वं भेषजं वातादीनां सर्वात्मना विरुद्धं भवति; उक्तं हि- "विरुद्धगुणसन्निपाते हि भूयसाऽल्पमवजीयते" (वि. अ. १) इति; तत् किमिति विरुद्धगुणभूयिष्ठस्याग्रहणम्? उच्यते- विरुद्धगुणभूयिष्ठस्यापि विपरीतगुणशब्देनैव ग्रहणात्। विपरीतगुणभूयिष्ठेऽपि ये विपरीता अल्पा अबला वा गुणास्ते स्वकार्याकर्तृत्वादव्यपदेश्या एव; किंवा सर्वथा विपरीतगुणैरधिका प्रशस्ता च शान्तिर्भवति, अत एव सम्प्रशब्दौ शीघ्रसम्यक्प्रशमार्थाभिधायकौ कृतौ; विपरीतगुणभूयिष्ठैर्न तथा शान्तिर्भवति, अत एव सम्प्रशब्दाभ्यां न तत् साक्षादुक्तम्। एवं च व्याख्यानं पित्तश्लेष्मणोरपि कर्तव्यम्। सस्नेहमिति ईषत्स्नेहं, तेन पित्ते सर्पिष: स्निग्धस्य भेषजत्वमुपपन्नम्। अम्लरसता चेह पित्तस्योच्यते, अप्तेज:समारब्धत्वात् पित्तस्य; सुश्रुते तु कटुत्वमेव पित्तस्योक्तम्, अम्लता च विदग्धस्य पित्तस्योक्ता। यदुक्तं- "विदग्धं चाम्लमेव च" (सु.सू.अ. २१) इति। एवं सस्नेहतायामपि पित्तस्य सुश्रुतस्वरसो नास्ति। एतच्च स्निग्धत्वमम्लत्वं च जलानलारब्धत्वात् पित्तस्योपपन्नमेव, सुश्रुते तु तेजोरूपपत्ताभिप्रायेणैव तन्निरस्तं भवति। श्लेष्मणो विपरीतगुणैर्गुणानां प्रशम उच्यते, न पुन: श्लेष्मण: प्रशमोऽभिधीयते; कस्मादेवमुच्यते? गुणप्रशमनेन च गुणिप्रशमो गुणवृद्ध्या च गुणिवृद्धिर्भवतीति सूचनार्थम्। यत उष्णेन शीतप्रशमे क्रियमाणे शीताधारस्योदकभागस्यावश्यमेव प्रशम: क्रियते।।५९-६१।।

**विपरीतगुणैर्देशमात्राकालोपपादितै:।**

**भेषजैर्विनिवर्तन्ते विकारा: साध्यसम्मता:।।६२।।**

**साधनं न त्वसाध्यानां व्याधीनामुपदिश्यते।६३।**

**व्याख्या :**

विपरीतगुणैरप्यल्पमात्रैस्तथाऽविपरीतदेशकालादिप्रतिबद्धैश्च न प्रशमो भवतीत्याह- विपरीतेत्यादि। देशो भूमिरातुरश्च, मात्रा अनपायिपरिमाणं, कालो नित्यगः ऋत्वादिरावस्थिको बाल्यादिश्च; देशाद्यपेक्षया यथोचितत्वेन कल्पितो देशमात्राकालोपपादितः। उपपादितैरिति चौरादिको णिच्; किंवा वैद्येनोपपादितैः। अत्र देशग्रहणाद्बलशरीराहारसात्म्यसत्त्वप्रकृतीनां ग्रहणं, कालग्रहणाद्वयसोऽपि ग्रहणं, दोषस्तु प्रशमनीयतयैव गृहीतः, भेषजं तु साक्षादेवोक्तम्; एवं दोषभेषजदेशकालबलशरीराहारसात्म्यसत्त्वप्रकृतिवयसां परीक्ष्याणां दशविधानां सर्वेषामेव ग्रहणं भवति। साध्यत्वेन प्रामाणिकानां सम्मताः साध्यसम्मताः; एतेनाज्ञेनाज्ञानाद्ये साध्यत्वेन गृहीतास्ते निराक्रियन्ते। यत्तु सम्यग्ग्रहणेन याप्ययापनमुच्यते तन्नातिसुन्दरं, विनिवर्तन्त इति वचनात्; न च याप्ययापनं विनिवृत्तिः। असाध्ये भेषजनिवृत्तिमाह- साधनमित्यादि। नन्वसाध्यानामपि साधनं दृष्टं, यतोऽरिष्टवांस्तावदवश्यं मृत्युगृहीतत्वेनासाध्यः; यदुक्तं- "अरिष्टं चापि तन्नास्ति यद्विना मरणं भवेत्। मरणं चापि तन्नास्ति यन्नारिष्टपुरःसरम्" (इं.अ.२); उत्पन्नारिष्टसाधनं च सुश्रुते प्रोक्तं- "ध्रुवं त्वरिष्टे मरणं ब्राह्मणैस्तत् किलामलैः। रसायनतपोजप्यतत्परैर्वा निवार्यते" (सु.सू. अ.२८) इति; तथा चाह भगवानगस्त्यः- "रसायनतपोजप्ययोगसिद्धैर्महात्मभिः। कालमृत्युरपि प्राज्ञैर्जीयते नालसैर्नरैः" इति; तथाऽन्यत्राप्युक्तं- "जाताऽरिष्टोऽपि जीवति" इति। अत्राहुरेके- द्विविधमरिष्टं नियतमनियतं च; तत्र यन्नियतं तदसाध्यमेव, अत एवोक्तं "न त्वरिष्टस्य जातस्य नाशोऽस्ति मरणादृते" (इं.अ.२); अत्र जातस्येति वचनान्नियतस्येति गम्यते; यत्त्वनियतमरिष्टं तत्प्रति सुश्रुतागस्त्यवचनयोरर्थवत्ता। चरकेऽप्यनियतमरिष्टमुक्तं; यथा- संशयप्राप्तमात्रेयो जीवितं तस्य मन्यते (इं.अ.९) इति। अन्ये तु ब्रुवते- संशयप्राप्तमिति उक्तिभेदमात्रमत्र; तेन सर्वारिष्टं मारकमेवासति रसायनादौ, रसायनतपःप्रभृतयस्तु प्रभावातिशययोगादितरक्रिययाऽसाध्यमपि साधयन्ति; तच्चारिष्टनिवारणं विरलेष्वेव पुरुषातिशयेषु नन्दिकेश्वरादिषु दृष्टं, न सर्वपुरुषैस्तच्छक्यमतो जातारिष्टानामसाध्यतैव तन्त्रे प्रोच्यते। यत्तु कैश्चिदुच्यते- नियतायुषो मृत्युररिष्टपूर्वो भवति, अनियतायुषस्त्वरिष्टं विनैव मृत्युर्भवति। तन्न, "मरणं चापि तन्नास्ति यन्नारिष्टपुरःसरम्" (इं.अ.२) इति वचनात्। यदुच्यते- अनियतायुषः सत्यपि रिष्टप्रादुर्भावे सम्यक्क्रियोपपादनाज्जीवितेन भवितव्यं, यतोऽनियतायुषः पुरुषकारापराधादेव परं मृत्युर्भवति, सम्यक्क्रियायां च पुरुषकारापराधो नास्ति। तन्न, नह्यनियतायुषः सर्वदैव पुरुषकारसाध्याः, किन्तु यथोचितकालक्रियमाणस्वस्थातुरहितसेवारूपपुरुषकारसाध्याः; तेन यथोचितकाले हितासेवनादसाध्यत्वयुक्ते व्याधौ रिष्टे जाते किं भेषजमतीतकालक्रियमाणमपक्रान्ते सलिल इव सेतुबन्धः करिष्यतीति। तस्मादसाध्यानां साधनं नोपदिश्यत इति साधु।।६२।।-

**भूयश्चातो यथाद्रव्यं गुणकर्माणि वक्ष्यते।।६३।।**

**व्याख्या :**

किमेतान्येव गुणकर्माणि, उतापराण्यपीत्याह- भूयश्चेत्यादि। गुणानां कर्माणि गुणकर्माणि। यथाद्रव्यमिति यस्मिन् यस्मिन् द्रव्ये यद्यद्गुणकर्म तत्तत्तस्मिंस्तस्मिन् द्रव्येऽन्नपानादौ कृत्स्ने वा तन्त्रे वक्ष्यते 'आचार्य' इति शेषः; वक्ष्यते इति ब्रूञो वचिरादेशात् प्रयोगः। किंवा यथाद्रव्यमिति यथाहेतुं; तद्यथा- गुरुखरकठिनादिगुणबहुलं पार्थिवद्रव्यं, तेषां च पार्थिवानां गुणानां कर्म उपचयसङ्घातगौरवादीति।।६३।।

**रसनार्थो रसस्तस्य द्रव्यमापः क्षितिस्तथा।**

**निर्वृत्तौ च विशेषे च प्रत्ययाः खादयस्त्रयः।।६४।।**

**व्याख्या :**

सम्प्रति दोषानभिधाय तत्प्रशमनप्रधानान् रसान् वक्तुमुद्यतो रसलक्षणपूर्वकं रसोत्पत्तिक्रममाह- रसनार्थ इत्यादि। रस्यत आस्वाद्यत इति रसः। रसनार्थ इति जिह्वाग्राह्यः। एतच्च षण्णामपि रसानामनुगतं रूपादिषु च व्यावृत्तत्वात् साधुलक्षणम्। तस्येति रसस्य। द्रव्यमिति आधारकारणम्। द्रव्यशब्दो ह्याधारकारणवाची; यथा- "पञ्चेन्द्रियद्रव्याणि" (सू. अ.८) इति। क्षितिस्तथेति यथा आप आधारकारणं तथा क्षितिरपि। 'अप्क्षिती' इति वक्तव्ये क्षितिस्तथेतिवचनात् क्षितेराधारकारणत्वममुख्यमिति दर्शयति। येनापो हि निसर्गेण रसवत्यः। तथा ह्यात्रेयभद्रकाप्यीये "सौम्याः खल्वापः" (सू.अ.२६) इत्यादिना जल एव रसस्य व्यक्तिरिति दर्शयति। सुश्रुतेऽप्युक्तं- "तस्मादाप्यो रसः" (सु.सू.अ.४२) इति। क्षितिस्त्वपामेव रसेन नित्यानुषक्तेन रसवतीत्युच्यते। यतो नित्यः क्षितिजलसम्बन्धः; वचनं हि- "विष्टं ह्यपरं परेण" (न्या.द.३/१/६०) इति। अस्यार्थः- खवाय्वग्निजलक्षितीनामुत्तरोत्तरे भूते पूर्वपूर्वभूतस्य नित्यमनुप्रवेशः, तत्कृतश्च खादिषु गुणोत्कर्षः। रसस्य किं व्यक्तावप्क्षिती कारणं किंवा विशेषे इत्याह- निर्वृत्तावित्यादि। निर्वृत्तौ चेति अभिव्यक्तौ। एतेन रसोऽभिव्यज्यमानो जलक्षित्याधार एव व्यज्यत इति दर्शयति। चकाराद्विशेषेऽपि मधुरादिलक्षणे अप्क्षिती प्रत्ययौ। तेन "सोमगुणातिरेकान्मधुरः, पृथिव्यग्निगुणातिरेकादम्लः" (सू.अ.२६) इत्यादिना जलपृथिव्योरपि विशेषकारणत्वं वक्ष्यमाणमुपपन्नम्। विशेषे च प्रत्ययाः खादय इति मधुरादिविशेषनिर्वृत्तौ निमित्तकारणं खवाय्वनलाः, न त्वाधारकारणभूताः। खादय इत्यनेनैव त्रित्वे लब्धे पुनस्त्रय इति वचनं तेषामेव व्यस्तसमस्तानामपि प्रत्ययत्वदर्शनार्थम्; अत एव व्यस्तसमस्ताकाशादिसंसर्गभेदाद्रसानां मधुरतरमधुरतमाद्यवान्तरभेद उपपन्नः। विशेषे चेति चकारादभिव्यक्तावप्याकाशादीनां निमित्तकारणत्वं दर्शयति। वक्ष्यति हि- तास्त्वन्तरीक्षाद्भ्रश्यमाना भ्रष्टाश्च पञ्चमहाभूतविकारगुणसमन्विता जङ्गमस्थावराणां भूतानां मूर्तीरभिप्रीणयन्ति; तासु षडभिमूर्च्छन्ति रसाः (सू.अ.२६) इति। अन्ये तु विशेषे चेति चकारं खादयश्चेत्यत्र योजयन्ति; तेन चकारात् कालोऽपि विशेषेऽभिव्यक्तौ च कारणं लभ्यते। साक्षात्तु कालस्यावचनेन

खादिभ्योऽप्यपकृष्टं कालस्य कारणत्वं दर्श्यते। किंवा रसस्यापो द्रव्यं क्षितिस्तथेति पूर्ववदेव; निर्वृत्तौ चेति क्षितिरेव निर्वृत्तावभिव्यक्तौ प्रत्ययो नाप:; यत आपो ह्यव्यक्तरसा एव, क्षितिसम्बन्धादेव च रसोऽभिव्यक्त उपलभ्यते। उक्तं च- "जङ्गमस्थावराणां भूतानां मूर्तीरभिप्रीणयन्ति, तासु षडभिमूर्च्छन्ति रसा:" (सू.अ. २६) इति। तेन पार्थिवद्रव्यसम्बन्धादेवापां रसो व्यज्यते, नान्यथा। विशेषे चेति चकारादप्क्षिती विशेषे कारणे। यद्यपि चाप्क्षिती विशेषे कारणे, तथाऽपि "सोमगुणातिरेकान्मधुर:"- (सू.अ. २६) इत्यादौ तु खादय एव तथा सन्निविशन्ति यथा सोमोऽतिरिक्तो भवति, तेन तत्राप्यूनत्वेन सन्निविष्टा: खादय एव विशेषहेतव इति। यद्यपिचाभिव्यक्तिर्मधुरादिविशेषरहिता क्वचिद्भवति, तथाऽपि सामान्येन सर्वत्र यदभिव्यक्तयेऽनुगतं कारणमुपलभ्यते क्षितिरूपं जलक्षितिरूपं वा तदभिव्यक्तिकारणं; यदनुगमात्तु मधुरादिविशेषोपलब्धिस्तद्विशेषकारणमुच्यते।।६४।।

**स्वादुरम्लोऽथ लवण: कटुकस्तिक्त एव च।**

**कषायश्चेति षट्कोऽयं रसानां सङ्ग्रह: स्मृत:।।६५।।**

**व्याख्या :**

रसविशेषानाह- स्वादुरित्यादि। अत्र सर्वप्राणिनामिष्टत्वादादौ मधुर उक्त:; तदनु च प्राण्यभीष्टोत्कर्षक्रमेणैवाम्लादिनिर्देशक्रमो बोद्धव्य:। षट्क इति पुन: सङ्ख्याकरणं परवादिमतसप्तसङ्ख्यत्वादिनिषेधार्थम्। अयं सङ्ग्रह इत्यनेनावान्तरभेदबहुत्वं तथा वक्ष्यमाणरससंसर्गबहुत्वं च दर्शयति।।६५।।

**स्वाद्वम्ललवणा वायुं, कषायस्वादुतिक्तका:।**

**जयन्ति पित्तं, श्लेष्माणं कषायकटुतिक्तका:।।६६।।**

**(कट्वम्ललवणा: पित्तं, स्वाद्वम्ललवणा: कफम्।**

**कटुतिक्तकषायाश्च कोपयन्ति समीरणम् ।।१।।)।**

**व्याख्या :**

रसानामुपयुक्ततरं कार्यमाह- स्वाद्वम्लेत्यादि। अत्र च वायोर्नीरसस्यापि रससहचरितस्निग्धत्वादिगुणैर्विपरीतै: प्रशमो ज्ञेय:। एवं मधुररसस्यापि श्लेष्मणोऽम्ललवणाभ्यां स्निग्धत्वाभिष्यन्दित्वादिसहचरितगुणयोगादेव वृद्धि:। अत्र च ये प्रशमकत्वेन रसा वातादीनां नोक्तास्ते वर्धका बोद्धव्या:। यदाह वाग्भट:- "तत्राद्या मारुतं घ्नन्ति त्रयस्तिक्तादय: कफम्। कषायतिक्तमधुरा: पित्तमन्ये तु कुर्वते" (वा.सू.अ. १) इति। रसकर्मातिदेशेनैव गुणवीर्यविपाकानामपि कर्मनिर्देश: कृत एव। यतो मधुरादिरसेनैव सर्वगुणान् वीर्यविपाकांश्च निर्देक्ष्यत्यात्रेयभद्रकाप्यीये- "तत्र स्वादु:" (सू.अ.२६)

इत्यादिना; तथा "कटुतिक्तकषायाणां विपाकः प्रायशः कटुः" (सू.अ.२६); तथा "अम्लोऽम्लं पच्यते स्वादुर्मधुरं लवणस्तथा" (सू.अ.२६) तथा "शीतं वीर्येण यद्द्रव्यं मधुरं रसपाकयोः। तयोरम्लं यदुष्णं च यच्चोष्णं कटुकं तयोः" (सू.अ.२६) इत्यादि-ना।।६६।।

**किञ्चिद्दोषप्रशमनं किञ्चिद्धातुप्रदूषणम्।**

**स्वस्थवृत्तौ मतं किञ्चित्त्रिविधं द्रव्यमुच्यते।।६७।।**

**व्याख्या** :

अतोऽवशिष्टं द्रव्यकार्यं प्रभावकृतं वक्तुं प्रभावभेदेन द्रव्यभेदमाह- किञ्चिदित्यादि। किञ्चिदिति न सर्वम्। दोषस्य दोषयोर्दोषाणां वा प्रशमनं दोषप्रशमनम्। दोषग्रहणेन दुष्टा रसादयोऽपि गृह्यन्ते। तेन द्रव्यमहिम्ना यद्दोषाणां दुष्टानां रसादीनां धातूनां वा शमकमा-मलकदुरालभादि तद्गृह्यते। आमलकं हि शिवत्वार्त्तिदोषहरं; दुरालभा चापि वातपित्तश्-लेष्महरी। यद्यपि चामलकस्य "हन्ति वातं तदम्लत्वात्" (सु.सू.अ.४६) इत्यादिना गुणद्वारा त्रिदोषहरत्वमुच्यते, तथाऽपि तत्प्रभावबृंहितमेव बोद्धव्यम्। यतस्तत्राम्लत्वादिना पित्तादिकोऽपि युज्यते, स त्वामलकप्रभावान्न भवति। धातुप्रदूषणमिति वातादीनां समत्वेन शरीरधारणात्मकानां तथा रसादीनां च दूषणं किञ्चित्, यथा- यवकमन्दकविषादि। सुष्ठु अवतिष्ठते नीरोगत्वेनेति स्वस्थः, तस्य वृत्तिः स्वस्थरूपतयाऽनुवर्तनं, तत्र स्वस्थवृत्तौ मतमभिमतं पूजितमिति यावत्। सङ्ख्येयनिर्देशादेव त्रित्वे लब्धे त्रिविधग्रहणं नियमार्थम्। तेन संशोधनसंशमनादीनामनेकविधानामप्यत्रैवावरोधः। रसायनवाजीकरणे तु स्वस्थवृत्ति-मात्र एव। यदुक्तं- "स्वस्थस्योजस्करं यत्तु तद्वृष्यं तद्रसायनम्" (चि.अ.१पा.१) इति। प्रतिपादे किञ्चिद्ग्रहणं दोषहरत्वादिकर्मणां विभिन्नद्रव्याश्रयित्वोपदर्शनार्थम्; एककिञ्चिद्ग्-्हणे त्वेकमेव द्रव्यं दोषहरं धातुप्रदूषकं स्वस्थवृत्तिमतं च स्यात्, न च तदभिमतम्। ननु, स्वस्थवृत्तिमतानां रक्तशालिषष्टिकयवादीनां दोषप्रशमनत्वमपि दृश्यते, यतो वक्ष्यति तत्र तत्र रक्तशाल्यादीनां ज्वरादौ प्रयोगं; तथा प्रकृतिशरीरदेशकालमात्राभि(दि)युक्तं दोषप्रशमनमपि दोषकरं भवति, यथा- आमलकमतिमात्रमग्निमान्द्यायेत्यादि ज्ञेयं; तथा धातुप्रदूषणमपि दोषशमनं दृश्यते, यथा- विषमुदरहरं, तथा यदेव मन्दकादि दोषकरं तदेव क्षीणदोषं प्रति दोषवृद्ध्या साम्यापादनेन दोषप्रशमनं भवति; तदेवमव्यवस्थितत-वात् किञ्चिद्दोषप्रशमनमित्यादि विरुद्धम्। अत्रोच्यते- स्वस्थवृत्तिमतं रक्तशाल्यादि दोषप्रशमनमपि भवति, परं तत् प्रायः स्वस्थवृत्तिहितत्वात् स्वस्थवृत्तिमतत्वेन गृह्यते। वचनं हि- "स्वस्थस्योर्जस्करं यत्तु तद्वृष्यं तद्रसायनम्। प्रायः, प्रायेण रोगाणां द्वितीयं शमने हितम्।।प्रायःशब्दो विशेषार्थ उभयं ह्युभयार्थकृत्" (चि.अ.१) इति। दोषप्रशमनानि द्रव्याणि विगुणप्रकृत्यादिप्रतिबन्धकाभावे दोषप्रशमनमाचरन्त्येव, प्रतिबन्धकसद्भावे तु

न कुर्वन्ति, न चैतावता तेषां स स्वभावो न भवति; नह्यग्निर्मन्त्रादिप्रतिबन्धात् कदाचिन्न दहतीति दाहकत्वेन नोपदिश्यते; एवं धातुप्रदूषकस्यापि कदाचिद्धातुप्रशमकत्वं निमित्तान्तरयोगाद्भवन्न धातुप्रदूषकस्वरूपतां हन्ति, यथा सलिलस्याग्निसम्बन्धादुष्णत्वम्। तस्माद्यद्यस्य प्रायिकमनन्योपाधिकृतं च रूपं, तेनैव व्यपदेशो युक्तः। यच्च मन्दकादीनां क्षीणदोषवर्धकत्वेन दोषप्रशमकत्वं तद्विद्यमानमपि कादाचित्कत्वात्तथा ह्युत्तरकालं दोषावहत्वाच्च न व्यपदिश्यते दोषप्रशमकत्वेन। ननु, यद्यप्येवं तथाऽपि यदेकदोषहरमपरदोषकरं यथा मरिचं श्लेष्महरं पित्तकरं चेत्यादि बहुद्रव्यजातं तत् कुत्र प्रविशतु ? अत्रैके वदन्ति- यदुभयात्मकं तद्दोषहरं दोषकरं च, नचैतावता द्रव्यत्रित्वक्षतिः; यतो न वातादिसंसर्गजव्याधिसद्भावे वातादिजन्यत्वेन यत्तैविध्यं रोगाणामुच्यते तत् खण्डितं भवति; किंवा मरिचादीनां यदुभयकर्तृत्वं न तद्द्रव्यप्रभावकृतं, किं तर्हि रसादिकृतं, तेन न द्रव्यप्रभावप्रस्तावे तदुदाहरणीयं; नच किञ्चिद्द्रव्यं तादृशमस्ति यत् प्रभावादेव किञ्चिद्दोषं करोति किञ्चिच्छमयतीति न दोषप्रशमनत्वादिप्रभावं प्रति नियमः; अयमेव च पक्षः साधुः। ननु 'किञ्चिद्दोषप्रशमनं किञ्चिद्दोषप्रदूषणम्' इति वा क्रियतां, 'किञ्चिद्धातुप्रशमनं किञ्चिद्धातुप्रदूषणम्' इति वा। नैवं, तथा सति दोषशब्दस्य मुख्यवृत्त्या वातादिष्वेव वृत्तित्वात्तथा धातुशब्दस्य च रसादिवृत्तित्वादुभयग्रहणं न प्राप्यते; उभयपदोपादानेन द्वयं निपुणकारी तन्त्रकारो दूषणत्वधारणत्वयोगपरिग्रहाद्दोषप्रशमनेन दुष्टरसादिप्रशमनमपि भेषजं विविधाशितपीतीयादिवक्ष्यमाणं, तथा धातुप्रदूषणेन वातादिप्रदूषकमपि निदानादिवक्ष्यमाणं ग्राहयति। प्रशब्दोऽत्र प्रकारे; तेन प्रकारेण मृदुमध्यादिना प्रकोपणं, तथा प्रकारेण संशोधनसंशमनादिना शमनमुच्यते; किंवा धात्वर्थानुवृत्तावेव इमौ प्रशब्दौ, यथा- 'च्युतांशः परिधावति' इत्यत्र धावतीत्यर्थः। आदौ दोषप्रशमनग्रहणं तस्यैवेहाभिप्रेतत्वात्। ननु स्वस्थवृत्तिमतं द्रव्यं भाविदोषहरत्वेन दोषप्रशमनमेव। नैवं, नहि स्वास्थ्यानुवृत्तिजनकत्वाद्दोषनिवृत्तिकरं दोषहरणमुच्यते, किं तर्हि समधातूनामवर्धकत्वेनाक्षयकरत्वेन च रसादिस्रोतसां चानुगुणत्वेन धातुसाम्यानुवृत्तिकरमुच्यते। वचनं हि- "पथ्यं पथोऽनपेतं यत्" (सू.अ.२५) इति।।६७।।

**तत् पुनस्त्रिविधं प्रोक्तं जङ्गमौद्भिदपार्थिवम् ।**

**मधूनि गोरसाः पित्तं वसा मज्जाऽसृगामिषम्।।६८।।**

**विण्मूत्रचर्मरेतोऽस्थिस्नायुशृङ्गनखाः खुराः।**

**जङ्गमेभ्यः प्रयुज्यन्ते केशा लोमानि रोचनाः।।६९।।**

**सुवर्णं समलाः पञ्च लोहाः ससिकताः सुधा।**

**मनःशिलाले मणयो लवणं गैरिकाञ्जने।।७०।।**

**भौममौषधमुद्दिष्टमौद्भिदं तु चतुर्विधम्।**

**वनस्पतिस्तथा वीरुद्वानस्पत्यस्तथौषधिः।।७१।।**

**फलैर्वनस्पतिः पुष्पैर्वानस्पत्यः फलैरपि।**

**ओषध्यः फलपाकान्ताः प्रतानैर्वीरुधः स्मृताः।।७२।।**

**मूलत्वक्सारनिर्यासनाल(ड)स्वरसपल्लवाः।**

**क्षाराः क्षीरं फलं पुष्पं भस्म तैलानि कण्टकाः।।७३।।**

**पत्राणि शुङ्गाः कन्दाश्च प्ररोहाश्चौद्भिदो गणः।७४।**

**व्याख्या :**

सम्प्रत्यन्यथा द्रव्यभेदमाह- तत् पुनरित्यादि। तदिति द्रव्यम्। गच्छतीति जङ्गमम्, उद्भिद्य पृथिवीं जायत इति औद्भिदं वृक्षादि, उक्तप्रकारद्वयातिरिक्तः पृथिवीविकारः पार्थिवम्। संस्वेदजस्येह क्रिम्यादेर्जङ्गमेऽवरोधः, कुकुण्डकादेश्च औद्भिदे। इह च द्रव्यशब्देन पार्थिवद्रव्यमेवोच्यते; तेन जलानिलाग्न्यादीनामग्रहणादव्याप्तिर्न वाच्या। जङ्गमशब्देन जङ्गमप्रभवं गोरसमध्वाद्यपि ग्राह्यम्। एवमौद्भिदपार्थिवयोरपि ग्रहणं वाच्यम्। रोचना गोरोचना। एतच्च मध्वादि प्राय उपयोगित्वात् प्राधान्यादुक्तं; तेनाण्डबस्त्याद-ीनां च ग्रहणं बोद्धव्यम्। यद्यपि जङ्गमानन्तरं बहुप्रपञ्चत्वेन प्रधानत्वादौद्भिदमुपदिष्टं, तथाऽप्यबहुवक्तव्यत्वात् पार्थिवमेव जङ्गमानन्तरं विव्रियते; तदनु बहुवक्तव्यमौद्भिदम्। सुवर्णमित्यादि। पञ्च लोहा इति ताम्ररजतत्रपुशीसकृष्णलोहानां ग्रहणम्। समला इति मलशब्देन शिलाजतूनि लोहमलरूपाणि गृह्यन्ते, तच्च सुश्रुतदर्शनात् सुवर्णरजतादिभवं षड्विधमेव गृह्यते; सुश्रुते हि षड्विधमेव शिलाजतूक्तम्, इह तु रसायने चतुर्विधमुक्तं- "चतुर्भ्यो धातुभ्यस्तस्य सम्भवः। हेम्नोऽथ रजतात्ताम्राद्वरं कृष्णायसादपि" (चि.अ.१) इति वचनात्। एतच्च वचनं रसायनाधिकारितां चतुर्विधस्य शिलाजतुनो दर्शयति, नतु षड्विधशिलाजतुप्रतिषेधपरमिति न सुश्रुतेन समं विरोधः। किंवा सुवर्णं निर्मलं, समलास्तु रजतताम्रत्रपुशीसलोहाः (इति मिलित्वा पञ्च लोहाः।) शिलाजतुपाषाणपङ्कप्रभृतीनां तु ग्रहणमुद्दिष्टशब्देन सूचितम्; उद्देशो ह्यल्पकथनम्। सुधा गाङ्गेयिका। आलं हरितालम्। अञ्जनं सौवीराञ्जनम्। फलैर्वनस्पतिरिति विनापुष्पैः फलैर्युक्ता वटोदुम्बरादयः। यदुक्तं हारीते- "तेषामपुष्पाः फलिनो वनस्पतय इति स्मृताः" इति। पुष्पैर्वानस्पत्यः फलैरपीति पुष्पानन्तरं फलभाज इत्यर्थः। फलस्य पाकादन्तो विनाशो येषां तिलमुद्गादीनां ते फल-पाकान्ताः; अत्र केचित् फलपाकान्ताः पाकान्ताश्चौषध्य इति वदन्ति; तेन विनाऽपि फलं पाकेनैवान्तो येषां दूर्वादीनां तेऽपि गृह्यन्ते। प्रतानशब्देन लता गुल्माश्च गृह्यन्ते। यदुक्तं हारीतेन- "लता गुल्माश्च वीरुधः" इति। मूलत्वगित्यादौ निर्यासो लाक्षासर्जरसादिः।

औद्भिदो गण इत्यौद्भिदसमुद्भूतो गण:।।६८-७३।।-

**मूलिन्य: षोडशैकोना फलिन्यो विंशति: स्मृता:।।७४।।**

**महास्नेहाश्च चत्वार: पञ्चैव लवणानि च।**

**अष्टौ मूत्राणि सङ्ख्यातान्यष्टावेव पयांसि च।।७५।।**

**शोधनार्थाश्च षड् वृक्षा: पुनर्वसुनिर्दशिता:।**

**य एतान् वेत्ति संयोक्तुं विकारेषु स वेदवित्।।७६।।**

**व्याख्या :**

सम्प्रत्यत्रैव जङ्गमौद्भिदपार्थिवद्रव्ये यत् प्रशस्तं तदाह- मूलिन्य इत्यादि। मूलं प्रशस्ततमं यासां ता मूलिन्य:; एवं फलिन्योऽपि। षोडशेति च्छेद:। महास्नेहा इति क्षीरमांसादीनामपि स्नेहतया स्नेहाध्याये वक्ष्यमाणत्वेन तेषु सर्पिरादीनां भूरिस्नेहवत्त्वेन महत्त्वम्। पञ्चैव लवणानीति विमाने (वि.अ.८) वक्ष्यमाणलवणबहुत्वे पञ्चानामेव प्रशस्तत्वेन दर्शनार्थम्। एवं मूत्रादिष्वपि प्राधान्यमुन्नेयं सजातीयेषु। वेदविदिति आयुर्वेदवित्।।७४-७६।।

**हस्तिदन्ती हैमवती श्यामा त्रिवृदधोगुडा।**

**सप्तला श्वेतनामा च प्रत्यक्श्रेणी गवाक्ष्यपि।।७७।।**

**ज्योतिष्मती च बिम्बी च शणपुष्पी विषाणिका।**

**अजगन्धा द्रवन्ती च क्षीरिणी चात्र षोडशी।।७८।।**

**शणपुष्पी च बिम्बी च च्छर्दने हैमवत्यपि।**

**श्वेता ज्योतिष्मती चैव योज्या शीर्षविरेचने।।७९।।**

**एकादशावशिष्टा या: प्रयोज्यास्ता विरेचने।**

**इत्युक्ता नामकर्मभ्यां मूलिन्य:...।८०।**

**व्याख्या :**

हस्तिदन्तीत्यादि। हस्तिदन्ती बृहत्फला गोडुम्बा, 'इयमेव नागदन्ती भण्यते' इत्येके। हैमवती वचा। श्यामा श्याममूला त्रिवृत्। अधोगुडा प्रद्धदारक:। सप्तला चर्मकषा। श्वेतनामा श्वेताऽपराजिता। प्रत्यक्श्रेणी दन्ती। बिम्बी ओष्ठोपमफला। शणपुष्पी घण्टारवा। विषाणिका आवर्तनी। अजगन्धा 'फोकान्दी' इति ख्याता। द्रवन्ती दन्त्येव चीरितपत्रा। क्षीरिणी दुग्धिका। मूलिनीनां वमनादिविनियोगमाह- शणपुष्पीत्यादि।।७७-७९।।-

**...फलिनी: शृणु।।८०।।**

**शङ्खिन्यथ विडङ्गानि त्रपुषं मदनानि च।**

**धामार्गवमथेक्ष्वाकु जीमूतं कृतवेधनम्।**

**आनूपं स्थलजं चैव क्लीतकं द्विविधं स्मृतम्।।८१।।**

**प्रकीर्या चोदकीर्या च प्रत्यक्पुष्पा तथाऽभया।**

**अन्तःकोटरपुष्पी च हस्तिपर्ण्याश्च शारदम्।।८२।।**

**कम्पिल्लकारग्वधयोः फलं यत् कुटजस्य च।**

**धामार्गवमथेक्ष्वाकु जीमूतं कृतवेधनम्।।८३।।**

**मदनं कुटजं चैव त्रपुषं हस्तिपर्णिनी।**

**एतानि वमने चैव योज्यान्यास्थापनेषु च।।८४।।**

**नस्तः प्रच्छर्दने चैव प्रत्यक्पुष्पा विधीयते।**

**दश यान्यवशिष्टानि तान्युक्तानि विरेचने।।८५।।**

**नामकर्मभिरुक्तानि फलान्येकोनविंशतिः। ८६।**

**व्याख्या :**

शङ्खिनी श्वेतबुह्ना(ध्न)। क्लीतकं यष्टीमधु; अस्य तु यद्यपि सुश्रुते मूलं प्रशस्तं, मूलेनैव व्यवहारः, तथाऽपि विरेचनं प्रति यष्टीमधुद्वयस्यापि फलमेव प्रशस्तं ज्ञेयम्। धामार्गवः पीतघोषकः। इक्ष्वाकुः तिक्तालाबुः। जीमूतो घोषकभेदः। कृतवेधनं ज्योत्स्निका। प्रकीर्योदकीर्ये करञ्जद्वयम्। प्रत्यक्पुष्पा अपामार्गः। अन्तःकोटरपुष्पी नीलबुध्ना। हस्तिपर्णी मोरटः, अस्याश्च शरत्कालभवमेव फलं ग्राह्यं; अत उक्तं- हस्तिपर्ण्याश्च शारदमिति। कम्पिल्लकं गुण्डारोचनिका। आरग्वधस्य यद्यपि सुश्रुते पत्रं प्रधानमुक्तं, तथाऽपीह फलं गृह्यते प्रधानतमत्वात्। धामार्गवमित्यादिना पञ्चकर्मविनियोग उच्यते। नस्तः प्रच्छर्दन इति शिरोविरेचने।।८०-८५।।-

**सर्पिस्तैलं वसा मज्जा स्नेहो दिष्टश्चतुर्विधः ।।८६।।**

**पानाभ्यञ्जनबस्त्यर्थं नस्यार्थं चैव योगतः।**

**स्नेहना जीवना वर्ण्या बलोपचयवर्धनाः।।८७।।**

**स्नेहा ह्येते च विहिता वातपित्तकफापहाः।८८।**

**व्याख्या :**

महास्नेहेषु सर्पिरादौ पठितं, प्राधान्यात्; वचनं हि- "नान्य: स्नेहस्तथा कश्चित् संस्कारमनुवर्तते। यथा सर्पिरत: सर्पि: सर्वस्नेहोत्तमं मतम्" (नि.अ.१) इति।।८६-८७।।-

**सौवर्चलं सैन्धवं च विडमौद्भिदमेव च।।८८।।**

**सामुद्रेण सहैतानि पञ्च स्युर्लवणानि च।**

**स्निग्धान्युष्णानि तीक्ष्णानि दीपनीयतमानि च।।८९।।**

**आलेपनार्थे युज्यन्ते स्नेहस्वेदविधौ तथा।**

**अधोभागोर्ध्वभागेषु निरूहेष्वनुवासने।।९०।।**

**अभ्यञ्जने भोजनार्थे शिरसश्च विरेचने।**

**शस्त्रकर्मणि वर्त्यर्थमञ्जनोत्सादनेषु च।।९१।।**

**अजीर्णानाहयोर्वाते गुल्मे शूले तथोदरे।**

**उक्तानि लवणा(नि)...। ९२।**

**व्याख्या :**

लवणेषु यद्यपि सैन्धवं प्रधानं, यतो वक्ष्यति- "सैन्धवं लवणानाम्" (सू.अ.२५) इत्यग्र्याधिकारे, तथाऽपि सौवर्चलस्य रोचनत्वप्रकर्षात्तथा सैन्धवमनु प्राधान्यख्यापनार्थमग्रे पाठ:। औद्भिदम् औत्कारिकालवणं, केचिच्छाम्भरिलवणमाहु:। सामुद्रं दक्षिणसमुद्रभवं 'करकच' इति ख्यातम्। अभ्यञ्जन इति स्नेहाभ्यङ्गे। वर्त्यर्थमिति फलवर्त्यर्थम्।।८८-९१।।-

**... न्यू(ऊ)र्ध्वं मूत्राण्यष्टौ निबोध मे।।९२।।**

**मुख्यानि यानि दिष्टानि सर्वाण्यात्रेयशासने।**

**अविमूत्रमजामूत्रं गोमूत्रं माहिषं च यत् ।।९३।।**

**हस्तिमूत्रमथोष्ट्रस्य हयस्य च खरस्य च।**

**उष्णं तीक्ष्णमथोऽरूक्षं कटुकं लवणान्वितम्।।९४।।**

**मूत्रमुत्सादने युक्तं युक्तमालेपनेषु च।**

**युक्तमास्थापने मूत्रं युक्तं चापि विरेचने।।९५।।**

**स्वेदेष्वपि च तद्युक्तमानाहेष्वगदेषु च।**

**उदरेष्वथ चार्श:सु गुल्मिकुष्ठिकिलासिषु ।।९६।।**

**तद्युक्तमुपनाहेषु परिषेके तथैव च।**

**दीपनीयं विषघ्नं च क्रिमिघ्नं चोपदिश्यते।।९७।।**

**पाण्डुरोगोपसृष्टानामुत्तमं शर्म चोच्यते।**

**श्लेष्माणं शमयेत् पीतं मारुतं चानुलोमयेत्।।९८।।**

**कर्षेत् पित्तमधोभागमित्यस्मिन् गुणसङ्ग्रहः।**

**सामान्येन मयोक्तस्तु पृथक्त्वेन प्रवक्ष्यते।।९९।।**

**अविमूत्रं सतिक्तं स्यात् स्निग्धं पित्ताविरोधि च।**

**आजं कषायमधुरं पथ्यं दोषान्निहन्ति च।।१००।।**

**गव्यं समधुरं किञ्चिद्दोषघ्नं क्रिमिकुष्ठनुत्।**

**कण्डूं च शमयेत् पीतं सम्यग्दोषोदरे हितम्।।१०१।।**

**अर्शःशोफोदरघ्नं तु सक्षारं माहिषं सरम्।**

**हास्तिकं लवणं मूत्रं हितं तु क्रिमिकुष्ठिनाम्।।१०२।।**

**प्रशस्तं बद्धविण्मूत्रविषश्लेष्मामयार्शसाम्।**

**सतिक्तं श्वासकासघ्नमर्शोघ्नं चौष्ट्रमुच्यते।।१०३।।**

**वाजिनां तिक्तकटुकं कुष्ठव्रणविषापहम्।**

**खरमूत्रमपस्मारोन्मादग्रहविनाशनम्।।१०४।।**

**इतीहोक्तानि मूत्राणि यथासामर्थ्ययोगतः।१०५।**

**व्याख्या :**

अविमूत्रमित्यादौ स्त्रीमूत्रमेव प्रशस्तमिति लिङ्गपरिग्रहाद्दर्शयति; यतः स्त्रीणां लघ्वङ्गत्वान्मूत्रमपि लघु; वचनं हि- "लाघवं जातिसामान्ये स्त्रीणां पुंसां च गौरवम्" (सू. अ.२७) इति। यत्तूच्यते- पुंसां मूत्रं शुक्रसम्बन्धाद्गुरु; तन्न, शुक्रसम्बन्धस्य स्त्रीणामपि शुक्रवत्त्वेन तुल्यत्वात्; वचनं हि- "यदा नारी हि नार्या तु मैथुनायोपपद्यते। मुञ्चतः शुक्रमन्योऽन्यमनस्थिस्तत्र जायते " इत्यादि; नपुंसकमूत्रं त्वमङ्गलत्वान्न गृह्यते। अगदेष्वित्यनेनागदप्रयोगयौगिकत्वं, विषघ्नमित्यनेन च केवलस्यैव विषहन्तृत्वमिति न पौनरुक्त्यम्। शर्म चोच्यत इति आरोग्यरूपसुखकर्तृत्वात्। अधोभागमिति अधोमार्गेण पित्तं कर्षेत्; किंवा यदेवाधोगतं पित्तं तदेव विरेचयति नोर्ध्वगम्। यथासामर्थ्ययोगत इति यादृशः शक्तियोगो मूत्राणां तथा।।९२-१०४।।-

**अतः क्षीराणि वक्ष्यन्ते कर्म चैषां गुणाश्च ये।।१०५।।**

**अविक्षीरमजाक्षीरं गोक्षीरं माहिषं च यत्।**

**उष्ट्रीणामथ नागीनां वडवायाः स्त्रियास्तथा।।१०६।।**

**प्रायशो मधुरं स्निग्धं शीतं स्तन्यं पयो मतम्।**

**प्रीणनं बृंहणं वृष्यं मेध्यं बल्यं मनस्करम्।।१०७।।**

**जीवनीयं श्रमहरं श्वासकासनिबर्हणम्।**

**हन्ति शोणितपित्तं च सन्धानं विहतस्य च।।१०८।।**

**सर्वप्राणभृतां सात्म्यं शमनं शोधनं तथा।**

**तृष्णाघ्नं दीपनीयं च श्रेष्ठं क्षीणक्षतेषु च।।१०९।।**

**पाण्डुरोगेऽम्लपित्ते च शोषे गुल्मे तथोदरे।**

**अतीसारे ज्वरे दाहे श्वयथौ च विशेषतः ।।११०।।**

**योनिशुक्रप्रदोषेषु मूत्रेष्वप्रचुरेषु च।**

**पुरीषे ग्रथिते पथ्यं वातपित्तविकारिणाम्।।१११।।**

**नस्यालेपावगाहेषु वमनास्थापनेषु च।**

**विरेचने स्नेहने च पयः सर्वत्र युज्यते।।११२।।**

**यथाक्रमं क्षीरगुणानेकैकस्य पृथक् पृथक्।**

**अन्नपानादिकेऽध्याये भूयो वक्ष्याम्यशेषतः।।११३।।**

**व्याख्या :**

प्रायशो मधुरमिति प्राधान्येन मधुरम्। तेन क्षीरमुष्ट्रीणामीषल्लवणं तथा छागं कषायमित्यादौ रसान्तरस्याप्राधान्येनानुबन्धोऽपि क्षीरे भवतीति दर्शयति। प्रायश इति बृंहणं स्निग्धमित्येताभ्यां तथा शीतमित्यनेन च सम्बध्यते; तेनौष्ट्रस्य रूक्षोष्णत्वाभिधानं न विरोधि। स्तन्यमिति स्तन्यवृद्धिकरम्। मनस्करमिति प्रभावादोजस्करत्वाच्च; ओजोवृद्ध्या हि तदनुविधायिनो मनसोऽपि स्वकर्मसामर्थ्यं भवति। एतदेव च नित्यस्येह मनसः करणं यन्मनसः प्रकर्षबुद्ध्युत्कर्षादिगुणकरणम्। हन्ति शोणितपित्तमिति अवस्थाविशेषापन्नमेव शोणितपित्तं हन्ति। वचनं हि- "कषाययोगैर्विविधैर्यथोक्तैर्दीप्तेऽनले श्लेष्मणि निर्जिते च। यद्रक्तपित्तं प्रशमं न याति तत्रानिलः स्यादनु, तत्र कार्यम्।।छागं पयः स्यात् परमं प्रयोगे गव्यं शृतं पञ्चगुणे जले वा" (चि.अ.४) इति। एवं च यदुच्यते- अधोभागे रक्तपित्ते स-

रत्वात् क्षीरमयौगिकम्, ऊर्ध्वगे च कफकर्तृतयाऽयौगिकमिति, तन्निरस्तम्। सर्वप्राणभृतां सात्म्यमित्यत्र सर्वशब्दश्चिकित्स्यतया प्रकृतसर्वमनुष्येष्वेव वर्तते, तेन क्षीरस्य संस्वेदज-ाादिप्राण्यसात्म्यत्वं नोद्भावनीयं; किंवा सर्वशब्दोऽयं भूरिवचनः।।१०५-११३।।

**अथापरे त्रयो वृक्षाः पृथग्ये फलमूलिभिः।**

**स्नुह्यर्काश्मन्तकास्तेषामिदं कर्म पृथक् पृथक्।।११४।।**

**वमनेऽश्मन्तकं विद्यात् स्नुहीक्षीरं विरेचने।**

**क्षीरमर्कस्य विज्ञेयं वमने सविरेचने।।११५।।**

**व्याख्या :**

फलमूलिभिरिति पृथक्शब्दयोगादपादाने तृतीया। अश्मन्तको मालुयासदृशपत्रो वृक्षः।।११४-११५।।

**इमांस्त्रीनपरान् वृक्षानाहुर्येषां हितास्त्वचः।**

**पूतीकः कृष्णगन्धा च तिल्वकश्च तथा तरुः।।११६।।**

**विरेचने प्रयोक्तव्यः पूतीकस्तिल्वकस्तथा।**

**कृष्णगन्धा परीसर्पे शोथेष्वर्शःसु चोच्यते।।११७।।**

**दद्रुविद्रधिगण्डेषु कुष्ठेष्वप्यलजीषु च।**

**षड्वृक्षाञ्छोधनानेतानपि विद्याद्विचक्षणः।।११८।।**

**इत्युक्ताः फलमूलिन्यः स्नेहाश्च लवणानि च।**

**मूत्रं क्षीराणि वृक्षाश्च षड् ये दिष्टपयस्त्वचः।।११९।।**

**व्याख्या:**

पूतीकः कण्टकीकरञ्जः। तिल्वको लोध्रः; तस्य तरुरिति विशेषणेन पट्टिकालोध्रं व्युदस्यति, शाबरलोध्रं च महाप्रमाणं तरुशब्दयोग्यं ग्राहयति; किंवा तरुविशेषणेन बालं लोध्रं व्युदस्यति। षड्वृक्षाञ् शोधनानित्यत्र यद्यपि कृष्णगन्धायाः पञ्चकर्मण्यनभिधानान्न शोधनत्वं, तथाऽपि बाह्यालेपनेन बहिःस्थितदोषसंशोधनत्वं बोद्धव्यं; किंवा अपिशब्दात् कृष्णगन्धाया अशोधनत्वमपि सूच्यते।।११६-११९।।

**ओषधीर्नामरूपाभ्यां जानते ह्यजपा वने।**

**अविपाश्चैव गोपाश्च ये चान्ये वनवासिनः।।१२०।।**

**न नामज्ञानमात्रेण रूपज्ञानेन वा पुनः।**

**ओषधीनां परां प्राप्तिं कश्चिद्वेदितुमर्हति।।१२१।।**

**योगवित्त्वप्यरूपज्ञस्तासां तत्त्वविदुच्यते।**

**किं पुनर्यो विजानीयादोषधीः सर्वथा भिषक्।।१२२।।**

**योगमासां तु यो विद्याद्देशकालोपपादितम्।**

**पुरुषं पुरुषं वीक्ष्य स ज्ञेयो भिषगुत्तमः।।१२३।।**

**व्याख्या :**

उक्तानामोषधीनां योगज्ञानस्य प्राधान्यं दर्शयन्नाह- ओषधीरित्यादि। परां प्राप्तिमिति उत्कृष्टं व्याधिशरीराद्यपेक्षं सम्यग्योगम्। योगो व्याधिशरीराद्यपेक्षा सम्यग्योजना भेषजस्य। सर्वथेति नामरूपयोगैः। योगमेव विशिष्टं दर्शयन्नाह- योगमित्यादि। देशकालोपपादितमिति देशकालकृतम्। पुरुषं पुरुषं वीक्ष्येति वीप्सायां, प्रतिपुरुषं प्रकृत्यादिभेदेन योगस्य प्रायो भेदो भवतीति दर्शयति। पुरुषशब्देन चेह संयोगपुरुषोऽभिप्रेतः।।१२०-१२३।।

**यथा विषं यथा शस्त्रं यथाऽग्निरशनिर्यथा।**

**तथौषधमविज्ञातं विज्ञातममृतं यथा।।१२४।।**

**औषधं ह्यनभिज्ञातं नामरूपगुणैस्त्रिभिः।**

**विज्ञातं चापि दुर्युक्तमनर्थायोपपद्यते।।१२५।।**

**व्याख्या :**

योगस्यौषधज्ञानाधीनत्वादौषधाज्ञानस्य महानर्थकारितां बहुभिर्दृष्टान्तैर्दर्शयति- यथा विषमित्यादि। विषादिबहुदृष्टान्तेनाज्ञातं भेषजं किञ्चिद्विषवत् सञ्ज्ञानाशं कृत्वा मारयति, किञ्चिच्च शस्त्रवन्मर्मच्छेदं कृत्वा मारयति, किञ्चिच्चाग्निवत् स्फोटादिकं कृत्वा मारयति, किञ्चिच्चाशनिवत् सद्यो मारयतीति दर्शयति। नामरूपगुणैरित्यनेन त्रित्वे लब्धे पुनस्त्रिभिरिति वचनमेकैकज्ञानप्रतिषेधार्थं; तेन त्रिभिरेव मिलितैर्ज्ञातं भेषजं प्रशस्तमिति दर्शयति।।१२४-१२५।।

**योगादपि विषं तीक्ष्णमुत्तमं भेषजं भवेत्।**

**भेषजं चापि दुर्युक्तं तीक्ष्णं सम्पद्यते विषम्।।१२६।।**

**तस्मान्न भिषजा युक्तं युक्तिबाह्येन भेषजम्।**

**धीमता किञ्चिदादेयं जीवितारोग्यकाङ्क्षिणा।।१२७।।**

**कुर्यान्निपतितो मूर्ध्नि सशेषं वासवाशनिः।**

**सशेषमातुरं कुर्यान्नत्वज्ञमतमौषधम्।।१२८।।**

**दु:खिताय शयानाय श्रद्दधानाय रोगिणे।**

**यो भेषजमविज्ञाय प्राज्ञमानी प्रयच्छति।।१२९।।**

**त्यक्तधर्मस्य पापस्य मृत्युभूतस्य दुर्मते:।**

**नरो नरकपाती स्यात्तस्य सम्भाषणादपि।।१३०।।**

**वरमाशीविषविषं क्वथितं ताम्रमेव वा।**

**पीतमत्यग्निसन्तप्ता भक्षिता वाऽप्ययोगुडा:।।१३१।।**

**नतु श्रुतवतां वेशं बिभ्रता शरणागतात्।**

**गृहीतमन्नं पानं वा वित्तं वा रोगपीडितात्।।१३२।।**

**भिषग्बुभूषुर्मतिमानत: स्वगुणसम्पदि।**

**परं प्रयत्नमातिष्ठेत् प्राणद: स्याद्यथा नृणाम्।।१३३।।**

**व्याख्या :**

योगं स्तौति- योगादपीत्यादि। विषं च सम्यग्योगाद्भेषजं भवतीति "तिलं दद्याद्विषस्य तु" (चि.अ.१) इत्यादिप्रयोगे बोद्धव्यम्। न केवलमातुरेणैवाभिषजो भेषजं नादेयं, किन्तु भिषजाऽपि युक्तिबाह्येन भेषजमातुराय न देयमित्याह- दु:खितायेत्यादि।।१२६-१३३।।

**तदेव युक्तं भैषज्यं यदारोग्याय कल्पते।**

**स चैव भिषजां श्रेष्ठो रोगेभ्यो य: प्रमोचयेत्।।१३४।।**

**व्याख्या :**

अथ सम्यग्युक्तस्य भेषजस्य किं लक्षणं किंवा उपादेयस्य श्रेष्ठवैद्यस्य लक्षणमित्याह- तदेवेत्यादि। रोगेभ्यो य: प्रमोचयेदित्यनेन च ज्ञानपूर्वं भेषजप्रयोगेण रोगहारकत्वमुच्यते; तेन यादृच्छिकसिद्ध्या कुवैद्यव्यवहारो न वाच्य:; यादृच्छिकसिद्धौ हि वैद्यो न रोगप्रमोक्षे कारणं, किन्तु घुणाक्षरन्यायेन दैवागतो भेषजस्य सम्यग्योग इति।।१३४।।

**सम्यक्प्रयोगं सर्वेषां सिद्धिराख्याति कर्मणाम्।**

**सिद्धिराख्याति सर्वैश्च गुणैर्युक्तं भिषक्तमम्।।१३५।।**

**व्याख्या :**

कथमारोग्यात् सम्यग्योगो भेषजस्य ज्ञायते इत्याह- सम्यक्प्रयोगमित्यादि। सर्वेषामित्यनेनान्येषामपि कर्मणां प्रतिमाकरणादीनां सिद्धिः सम्यग्योगं तत्कारणतां ख्यापयति; न ह्यसम्यक्प्रयुक्ते कारणे सम्यक् कार्यं भवति। सिद्धिराख्यातीति उक्ता प्रातिनियमिकी सिद्धिः, न यादृच्छिकी। सर्वैर्गुणैरिति श्रुते पर्यवदाततत्वादिभिः खुड्डाकचतुष्पाद (सू. अ.१०) वक्ष्यमाणैः।।१३५।।

**तत्र श्लोकाः-**

**आयुर्वेदागमो हेतुरागमस्य प्रवर्तनम्।**

**सूत्रणस्याभ्यनुज्ञानमायुर्वेदस्य निर्णयः।।१३६।।**

**सम्पूर्णं कारणं कार्यमायुर्वेदप्रयोजनम्।**

**हेतवश्चैव दोषाश्च भेषजं सङ्ग्रहेण च।।१३७।।**

**रसाः सप्रत्ययद्रव्यास्त्रिविधो द्रव्यसङ्ग्रहः।**

**मूलिन्यश्च फलिन्यश्च स्नेहाश्च लवणानि च।।१३८।।**

**मूत्रं क्षीराणि वृक्षाश्च षड् ये क्षीरत्वगाश्रयाः।**

**कर्माणि चैषां सर्वेषां योगायोगगुणागुणाः।।१३९।।**

**वैद्यापवादो यत्रस्थाः सर्वे च भिषजां गुणाः।**

**सर्वमेतत् समाख्यातं पूर्वाध्याये महर्षिणा।।१४०।।**

**व्याख्या :**

तत्र श्लोका इति तन्त्रकारस्य रीतिरियं यत्- यत्रोक्तमर्थं सङ्ग्रहेणाभिधत्ते तत्र 'तत्र श्लोका' इति करोति; यत्र तूक्तादनधिकमुच्यते तत्र 'भवति चात्र' इति करोति; न चास्य निष्प्रयोजनत्वं, तन्त्रधर्मत्वात्। अध्यायोक्तमर्थमध्यायान्ते सङ्ग्रहेणाभिधत्ते- आयुर्वेदागम इत्यादिना। सङ्ग्रहकथनं च पूर्वोक्तार्थस्य सङ्क्षेपेण ग्रहणार्थं तथा दुर्ज्ञानप्रतिषेधार्थं च। यतो यत्किञ्चिदत्र दुर्ज्ञानं स्यात्तदिह प्रतिपादितार्थसंवादेनावधार्यते। वचनं हि- "गद्योक्तो यः पुनः श्लोकैरर्थः समनुगीयते। तद्व्यक्तिव्यवसायार्थं द्विरुक्तिः सा न गर्ह्यते" (नि.अ.१) इति। अत्र च गद्योक्त इति विस्तरोक्तोपलक्षणम्। तेन श्लोकोक्तस्याप्यारग्वधीयाद्यर्थस्य पुनः श्लोकेन सङ्ग्रहणमविरुद्धम्। व्यक्तिः स्पष्टता, व्यवसायः अवधारणम्। आगम इति "दीर्घञ्जीवितमन्विच्छन्" इत्यादिना, हेतुरिति आयुर्वेदागमहेतुः, स च "विघ्नभूता यदा रोगा" इत्यादिना रोगप्रादुर्भाव उक्तः; किंवा "दीर्घञ्जीवितमन्विच्छन्" इत्यादिश्लोको विशेषेणायुर्वेदागमस्य तथाऽऽयुर्वेदागमहेतोश्च पिण्डसूत्ररूपः, "ब्रह्मणा हि" इत्यादिग्रन्-

थस्त्वायुर्वेदागमप्रतिपादकः, हेतुप्रतिपादकस्तु "विघ्नभूता" इत्यादिग्रन्थो यथोक्त एव। आगमस्य प्रवर्तनमिति इन्द्रादानीय भरद्वाजेन मर्त्यलोके प्रवर्तनमायुर्वेदग्रहणपर्यन्तम्। सूत्रणमित्यायुर्वेदतन्त्रकरणमग्निवेशादीनाम्। अभ्यनुज्ञानमिति "तानि चानुमतानि" इत्यादि। शेषं सुगमम्।।१३६-१४०।।

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते सूत्रस्थाने दीर्घञ्जीवितीयो नाम प्रथमोऽध्यायः।।१।।

**व्याख्या :**

इति श्रीचक्रपाणिदत्तविरचितायामायुर्वेददीपिकाख्यायां चरकतात्पर्यटीकायां सूत्रस्थाने दीर्घञ्जीवितीयो नाम प्रथमोऽध्यायः।।१।।

**अध्याय : 2**

# वास्तुशास्त्रस्य

## २.० प्रस्तावना

संस्कृतसाहित्ये वास्तुकलाविषयकाणि त्रीणि शास्त्राणि सन्ति, स्थापत्यकला स्थापत्यशास्त्रम् वा शिल्पकला शिल्पशास्त्रम् वा चित्रकला चित्रशास्त्रम् वा इति। वास्तुशास्त्रस्य आचार्या: शिल्पशास्त्रं वास्तुशास्त्रस्य पर्यायरूपेण स्वीकुर्वन्ति परन्तु केचन आचार्या: वास्तुशास्त्रं शिल्पशास्त्रान्तर्भूतं मन्यन्ते। दशमवैक्रमशताब्ध्यां लिखित: भूपते: धाराधिपस्य भोगराजस्य समरांगणसूत्रधारनाम्नीं कृति अवलोक्य ज्ञानं भवति यत् शिल्पचित्रशास्त्रे वास्तुशास्त्रान्तर्गते विभाव्येते। एतेनैव वास्तुशास्त्रस्य व्यापक क्षेत्र संगच्छते। प्राय: वास्तुशास्त्रं गृहनिर्माणविषयं शास्त्रमस्ति परमत्र गृहनिर्माणेषु देवालयनिर्माणमपि आगच्छति। देवालयनिर्माणं तु प्रतिमानिर्माणसदृशम्भवति यतोहि प्रासादेषु प्रतिमानिर्माणं एक मूर्धन्यं कर्म वर्तते । अत: प्रतिमानिर्माणमेव अत्र शिल्पशास्त्रमस्ति। प्रासादेषु गृहेषु च चित्रालेखनमपि भवति। अत: शिल्पं चित्रं च वास्तुशास्त्रन्तर्गतमेव आचार्या: स्वीकुर्वन्ति। अनेन समरांगणसूत्रधारकारेण प्राधान्येन वास्तुशास्त्रस्य त्रय: विभागा: स्वीकृता:। प्रथम स्थापत्यम् यत्र भवननिर्माणं भवति। भवनेषु जनभवनं राजभवनं देवभवनञ्चागच्छन्ति। द्वितीयं शिल्पं यत्र पाषाणधातुकाष्ठमृदाभि: प्रतिमादिनिर्माणं भवति तथा च तृतीयं चित्रम् आलेख्यञ्चेति।।

## २.२ स्थापत्यस्याष्टांगानि

प्राप्तेषु वास्तुशिल्पशास्त्रस्य ग्रन्थेषु समरांगणसूत्रधारं शिल्परत्नञ्च सम्पूर्णो वास्तुग्रन्थौ स्त:। अत्र भवनानां प्रतिमाणां चित्राणाञ्च प्रतिपादनं वर्तते। अनयो: ग्रन्थयो: पुर- दुर्गभवन- प्रासाद- प्रतिमा- चित्र- यन्त्र- शयनासनानां स्थापत्यस्याष्टांगानां वर्णनं कृत्वा वास्तुशास्त्रमेव अस्माकं भारतीयस्थापत्यस्य अविकलां परम्परां पुष्णाति। समरांगणसूत्रधारस्य समकालिका कृतिरपराजितपृच्छाऽपि एतद् समर्थनं करोति परन्तु मानसारे भवनानां (विमानानां) प्रतिमानाञ्च वर्णनं मयमतानुसारं मिलति।

## २.३ पञ्चमहाभूता: प्राकृतिकशत्तयश्च

अस्माकमियं सृष्टि: पञ्चभूतात्मिका अस्ति। यथा मानवस्य शरीरं पञ्चमहाभूतानां

समिश्रणमस्ति तथैव भूमौ कृतकार्यं अपि पञ्चतत्त्वेषु आधारितं भवति। पृथिव्यां सूर्यकिरणानां प्रभाव:, पृथिव्या चुम्बकीयक्षेत्रम् वायूनां दिशा तेषां प्रभावाद्यनेका: तथ्या: एतादृशा: सन्ति येषां वास्तुशास्त्रदृष्ट्या विचार: आवश्यकोऽस्ति। प्रात: कालिकसूर्यकिरणानां प्रभाव: मानवस्य कृते सर्वाधिक अनुकूलं भवति परन्तु मध्याह्ने इयं अनुकूलता न भवति। चुम्बकीयक्षेत्रस्य परिज्ञानं कृत्वैव आचार्या: शयनकाले उत्तरस्यां दिशि शीर्षम् न कर्त्तव्यमिति निर्दिशन्ति यतो हि चुम्बकीयक्षेत्रस्य सर्वाधिक प्रभावोऽस्माकं शरीरे पतति। वस्तुत: वास्तुपुरुष: पृथिव्या: चुम्बकीयशक्ते: विभिन्नवलधाराणाञ्च जागृतं स्वरूपं अस्ति। अस्य स्वरूपस्य संतुलने ग्रहाणां नक्षत्रणां वायूनां जलतापादिप्राकृतिकशक्तीनां महत्वपूर्ण भूमिकास्ति। अयं वास्तुपुरुष: चेतनाया: स्वरूपोऽस्ति। अस्यानुभूति: भावनया भवति न तु बुद्ध्या। पृथिव्या: चेतनाम् आचार्यै: चौतन्यवास्तुरूपे दृष्टम्। तदैव तस्य पूजां कृत्वा भवननगराणां रचना तै: कृता। समग्र पृथिव्यां वास्तुपुरुषस्य एक रूपं तथा च व्यष्टिगतवास्तो: वास्तुपुरुषस्य एकम् अन्यद् रूपं भवति। अनेन बृहद्-लघु-वास्तुरूपाणां वर्णनेन द्योतितं भवति यत् यथा अस्माकं सम्पूर्ण शरीम् एकं सजीवम् एककमस्ति परन्तु अस्य निर्माणे येषां सूक्ष्मकोशिकानां योगदानमस्ति। ता: कोशिका अपि सजीव-एककरूपे भवन्ति। एतासां कोशिकानां प्रतिक्रिया एव समग्रशरीरस्य प्रतिक्रिया भवति। अत्र अस्य एकात्मभावस्य वास्तौ प्राधान्यमस्ति। सर्वेषां ग्रहनक्षत्रदीनां ऊर्जाप्रभावै: वास्तुरचना अनुकूला प्रतिकूला च भवति। अनेन वास्तुशास्त्रे समग्रबलधाारणां ऊर्जाप्रभावक्षेत्राणाञ्च पूजनं देवानां विभिन्नरूपेषु भवति।

## २.३ मूलविचारणीयबिन्दव:

वास्तुशास्त्रस्य केचन बिन्दव: सन्ति येषां प्रयोग: वास्तुनिर्माणे सर्वत्र आवश्यक भवति विना एतेषां प्रयोगेण महती हानि: अपि भवितुं शक्यते। ते मूलभूतबिन्दव: सन्ति -

1. वास्तुपदविन्यास:।

2. दिसाधानम्।

3. मानप्रमाणविचार:।

4. आयादिविचार:।

5. पताकादिविचार:।

1. वास्तुपदविन्यास: -

वास्तुपदविन्यासं एव वास्तुशास्त्रे वास्तुपुरुषमण्डलं भवति। वास्तो: निर्माणात् पूर्वं या प्राक्कल्पना भवति सा एव वास्तुयोजना। वास्तुयोजना वास्तुपदविन्यासं एव ।

स्थापत्येऽस्य स्थानं प्रथमं भवति यतोहि भवननिर्माणस्य क्रियान्विति इतः एव प्रारभ्यते। प्राचीनभारतीयपरम्परायां वास्तुपुरुषस्य आधारपरिकल्पना वैदिकी दार्शनिकी चासीत्। अत एव वास्तुपुरुषस्य परिकल्पनायां कलादर्शनयोः समन्वयः दृष्टिगोचरो भवति कलात्मकदृष्ट्या वास्तुपविन्यासं एकमात्रं भवनयोजनाऽस्ति दार्शनिकदृष्ट्या वास्तुपदविन्यासम् आवासीयभवने गृहनिवासीनां जीवनदर्शनं वर्तते। सामान्यतया वास्तुपदविन्यासस्य प्रक्रियायां भवननिर्माणात् पूर्व निर्धारितक्षेत्रे वास्तुपुरुषस्य स्थापना कृत्वा एव निर्माणकार्यं भवति। निर्माणकार्ये चतुष्षष्ठि-एकाशीति-शतपदादि मण्डलानां वास्तुपदरूपे विन्यास एव वास्तुपदविन्यासोऽस्ति। अस्यां प्रक्रियायां पूर्वापर- याम्योत्तरलम्बरूपा अष्ट-अष्ट, नव-नव, दशख्रदशादिरेखाभिः एकोनपञ्चाशत्, चतुष्टि, एकाशीति, कोष्ठकानां एकम् एकम्, भिन्न-भिन्नं वर्गाकारक्षेत्राणि निर्मितानि भवन्ति यस्मिन् वर्गाकारक्षेत्रे यानि कोष्ठकानि भवन्ति तेषां संज्ञा तथैव भवति। यथा- एकोनपञ्चाशत्पदवास्तुः चतुष्पष्टिपदवास्तुः एकाकाशीतिपदवास्तुः शतपदवास्त्वादयः। येषु सर्वेषु पदेषु पञ्चचत्वारिंशत् देवानां विन्यासो भवति। ईशाने वास्तुपुरुषस्य शीर्षभागः भवति। तदैव नैऋत्ये पादौ भवतः। पदविन्यासेऽपि वर्गाकार-आयताकारादिक्षेत्रेषु अधोमुखमानवाकृतेः रचना भवति। अयं वास्तुपुरुषः सः एवास्ति यः सृष्ट्यादिप्रक्रियायाम् आदौ दानवः आसीत् तं गृहीत्वां अधोमुखं कृत्वा देवैः तस्य प्रतिष्ठा वास्तुपुरुषरूपे कृता। नगरग्रामराजप्रासाधार्मिककार्येषु चतुष्पष्टिपदवास्तोः आवसीयगृहेषु एकाशीतिपदवास्तोः कूपतड़ागवनोद्यानजलाशयादिनिर्माणकार्येषु षण्णवत्यधिकशत- पदवास्तोः स्थापना भवति। यथा वास्तुरत्नावल्याम्

**क्षेत्राकृतिर्वास्तुरिहार्चनीयस्त्वेकांशतो भागसहस्त्रयुत्तः।**

**साधारणोऽष्टष्टपदोऽपि तेषु चौकाधिकाशीतिपदस्तथैव।।**

पुनः वास्तुराजबल्लभे -

**ग्रामे भूपतिमन्दिरे च नगरे पूज्यश्चतुष्पष्टिकै**

**रेकाशीतिपदैः समस्तभवने जीणे नवाब्ध्यंशकैः।**

**प्रासादे तु शताशकैस्तु सकले पूज्यस्तथा मण्डपे ।**

**कूपे षण्णवचन्द्रभागसहिते बाप्पी तड़ागे बने।।**

वर्गाकारकोष्ठकेषु अपेक्षितवास्तुचक्रस्य स्थापना कृत्वा मण्डलान्तर्गतस्थितदेवानां पूजनं भवति। विना पूजनेन कष्टानि उद्भवन्ति। यथा

**निमार्ण मन्दिराणाञ्च प्रवेशे त्रिविधऽपि वा।**

**वास्तुपूजा तु कर्तव्या यस्माता कथयाम्यतः।।**

**एवं यः कुरुते सम्यग्खास्तुपूजा प्रयत्नतः।**

**आरोग्यं पुत्रौत्रादि धनधान्यं लभेन्नरः।।**

**वास्तुपूजामकृत्वा यः प्रविशेन्नमन्दिरे।**

**रोगाम्नानाविधान्लेशानश्नुते सर्वसंकटम्।।**

**यः पूजयेद्वस्तुमनन्यभवत्या ।**

**न तस्या दुःखं भवतीहि किञ्चित्।**

**जीवत्यसौ वर्षशतं सुखेन**

**स्वर्ग नरस्तिष्ठति कल्पमेकम्।।**

**वास्तुपूजाविहीनश्च सूत्रधारैर्विना तथा।**

**सप्तजन्म भवेत्कुष्ठी सकर्ता नरकं ब्रजेत्।।**

2. दिक्साधनम् -

सर्वप्रथमं निर्धारणमावश्यक भवति। विना निर्धारणेन सम्यक् निर्माणकार्यं न भवितुं शक्यते। सर्वप्रथमं भूमि समतलं कृत्वा मध्ये शंकु स्थापयेत् तदा शंकुछायया दिङनिर्धारणं कर्त्तव्यम्। प्रातःकाले शंकोः छाया पश्चिमदिशि सायङ्काले च पूर्वदिशि भवति। प्रसङ्गेस्मिन् प्रायः सर्वैः आचार्यैः निगदितं दिङनिर्धारणम्। यथा- गणेशदैवज्ञेन लिखितम् -

**वृत्ते सम्भूतगते तु केन्द्रस्थितशंकोः क्रमशो विशत्यपैति।**

**छायाग्रमिहापरा च पूर्वा ताभ्यां सियति मेरुदिक् च याम्या।**

दिङनिर्धारणार्थं सर्वाधिकोपयुक्तः समयोऽस्ति मध्याह्नकालः। मध्याह्ने शंकोः छाया सदा याम्योत्तरा भवति। क्रान्ति-आक्षांशयोः भेदात् छाया उत्तरा याम्या च भवति। यदि क्रान्ति-अक्षांशाः समाः भवन्ति तदा तद्देशे स्थाने वा छाया शून्या भवति। एकस्मिन्नेव गोले अक्षांशतः यदि कान्तिः न्यूना स्यात् तर्हि छाया उत्तरा भविष्यति परन्तु यदि अक्षांशतः क्रांतिः अधिका स्यात् तर्हि छाया दाक्षिणगा भवति। दक्षिणक्रान्तौ उत्तरगोले छाया उत्तरा, उत्तराक्रान्तौ दक्षिणगोले छाया सदा दक्षिणगा भवतीति। यथा

**दिनमानदले सप्ताङ्गुलच्छामाग्रतो हि यत्।**

**शंकुमूले नीयमानं सूत्रं स्यादुत्तर दिशा ।।**

अधुना कम्पासयंत्रेण दिङज्ञानं भवति परन्तु अनेनापि दिङ्मूढ़ता भवितुं शक्यते।

मध्याह्ने दिङनिर्धारणं यदि स्यात् तर्हि समीचीनं दिग्ज्ञानं भवति।



3. मानविचार: -

वास्तुविन्यासे हस्तमापनप्रक्रिया मौलिकासीत्। वास्तुपदेषु निवेश्यभवनादीनां भवनेषु च प्रकोष्ठादीनां मानं प्रमाण वा कि स्यात्? इत्यस्यां प्रक्रियायां प्राचीनकालादेव हस्तागुंलिप्रमाणानि प्रचलितानि सन्ति। सम्प्रति नगरेषु इयं प्रक्रिया प्रवर्तिता दृश्यते। निर्माणात् पूर्वं मापनमानदण्डस्य सम्यक् निर्धारणं यदि न स्यात् तर्हि प्राक्कल्पनानुरूपं भवनपुरादीनां निवेश: न भवितुं शक्नोति। अत: सर्वप्रथमं मापनमानदण्डस्य निर्धारणं करणीयम्। अस्माकं परिकल्पनायां वास्तुपदविन्यासं नितान्तम् अव्यक्तमस्ति। व्यक्तरूपे परिणिताय मापनम् एका आवश्यकप्रक्रियाऽस्ति। दार्शनिकदृष्टया कथितुं शक्यते यत् यथा निराकारब्रह्म मायाशक्तेरभावेन सगुणेश्वरस्य रूपं न भवितुं शक्यते तथैव अव्यक्त-वास्तुम् अपि मापनप्रक्रियया विना व्यक्तरूपे परिवर्तितं न भवितुं शक्यते।

यथा माया दृश्यवत: जगत: मूलशक्तिरस्ति तथैव मापनप्रक्रियाऽपि कस्यचिद् वास्तुन: मूलाधारशक्ति: प्रतीयते। मापनप्रक्रियां विना कस्यापि वास्तौ पूर्णता नागच्छति। यथा मयेनोक्तम्।

**मानं धामनस्तु सम्पूर्ण जगत् सम्पूर्णता भवेत्।। 5**

समराङ्गसूत्रधारानुसार मापनप्रक्रियाया: निश्चितमानदण्डानां परिमाणेन एव मन्दिरेषु स्थापिता देवा पूजना: भवन्ति। यथा- **प्रमाणे स्थापिता देवा: पूजार्हाश्च भवन्ति ते। 6**

## २.५ आयादिविचार:

वास्तुशास्त्रदृष्टया आयादिसाधानप्रक्रिया महत्वपूर्णा अस्ति। आयादिसाधनम् अपि मानप्रक्रियाया: मूलाधारे षडङ्गमाननाम्ना अन्तर्हितम् अस्ति। तानि षडङ्मानानि सन्ति इमानि- 1. आय:, 2. व्यय:, 3. अंश:, 4. ऋक्ष:, 5. योनि:, 6. वार: तिथिश्च।

मुहूर्त्तचिन्तामणौ आयादिषड्वर्गाणां स्थाने आयादिनववर्गाणां परिकल्पा आचार्यै: कृता। मुख्यरूपेण आयस्यावश्यकता द्वारस्थापनार्थं भवति। गृहस्य विस्तारेण दैर्व्यमानं हतं कृत्वा गुणनफलं अष्टभिर्विभज्य शेषं एव ध्वजादिरायो भवति। यथा

**विस्तारेण हतं दैर्घ्यं विभजेदष्टभिस्तत:।**

**यच्छेषं स: भवेदायो ध्वजाद्यास्ते स्युरष्टधा।।**

आयनामानि -

**ध्वजो धूम्रो हरि: श्वा गौ: खरेभौ वायसोष्टम:।**

**पूर्वादिदिक्षु चाष्टानां ध्वजादीनामवस्थितिः।।**

एषां फलानि -

**कीर्तिः शोको जो वैरं धनं निर्धनता सुखम्।**

**रोगश्चेति गृहारम्भे ध्वजादीनां फलं क्रमात्।।**

अन्योऽपि -

**ध्वजे बहुधन प्रोत्तं धूम्रे चैव भ्रम भवेत्।**

**सिंह च विरला लक्ष्मीः श्वाने च कलहं भवेत्।।**

**धनं धान्यं वृषे चौव खरेषु स्त्रीविनाशनम्।**

**गजाख्ये पुत्रलाभाश्च ध्वांक्षे सर्वस्य शून्यता।।**

ध्वजाये चतुर्दिक्षु सिंहाये पूर्वोत्तरदक्षिणदिक्षु गजाये पूर्वदक्षिणदिशोः गौ आये पूर्वी-दिशि द्वारं करणीयम्। आयसाधानार्थं पिण्डस्य ज्ञानं आवश्यकं भवति। पिण्डसाधानार्थं नक्षत्रस्य आवयकता भवति। गृहस्य कृते आर्द्रा- पुनर्वसु- पुष्य- आश्लेषा- मघा- पूर्वाफाल्गुनीशतभिषा- पूर्वाभाद्रपदा- उत्तराभाद्रपदा शुभनक्षत्राणि सन्ति। येषु नक्षत्रेषु तस्य नक्षत्रस्य चयनं करणीयं यस्यनाडी गृहपतेः नक्षत्रशदृशा नाडी एका एव स्यात् परन्तु गृहपतेः गृहस्य च नक्षत्रमेक कदाऽपि न स्यात्। उभयोर्नक्षत्रैक्यम् मृतिप्रदं भवति। यथोत्तम् -

**सेव्यसेवयोश्चौव गृहतत्स्वामिनोरपि।।**

**परस्परं मियोश्च एका नाडी प्रशस्यते।।**

## २.६ पतकादिविचार

प्राचीनानामाचार्याणां धारणा आसीत् यत् कमपि निवेशं दृष्ट्वा एव ज्ञानं भवेत् यत् अस्मिन् कि कार्यं भवति। प्राचीनवास्तुशास्त्राचार्यैः 'इत्थभूतलक्षणेश् इति मतं स्वीकृत्य एव कथयन्ति यत् कस्याऽपि पिण्डस्य वास्तोः वा बाह्य स्वरूपं दृष्ट्वैव तस्य मूलस्वरूपस्याभिज्ञा भवति तथैव कस्यापि भवनस्य दर्शनेन तस्य ज्ञानं भवितव्यम् यत् अयं शिक्षालयोऽस्ति अयं शिवालयोऽस्ति इत्यादयः। एतादृशं ज्ञानं एव पताकादि विचारोऽस्ति।

## २.७ वास्तुनिवेश

निवेश: वास्तुशास्त्रस्य महत्वपूर्ण प्रक्रियाऽस्ति। समरांगणसूत्रधारानुसारं निवेशपूर्ण वास्तुशास्त्रस्य समग्रमूलभूतसिद्धान्तानां पालनमवश्यं कर्त्तव्यम्। निवेशस्यान्तर्गतं मुख्यकार्य भवननिवेश एव भवति। पुरस्यान्तर्गतं जनभवनानां राजभवनानां च विन्यास: कुत्र स्यादिति विचार: प्रमुखरूपेण भवति। जनभवननिवेशे वास्तुशास्त्रस्य भवनिनिवेशप्रक्रियाया अनुपालन सामान्यरूपेण भवति परन्तु राजभवने देवभवने च विशिष्टप्रक्रियाया अनुपालं भवति। भारतीयस्थापत्ये भवननिवेश अष्टभागेषु विभक्तो वर्तते।

1. भूमिचयनम्

2. विधा भवनप्रकारो वा

3. प्रतिकृति:

4. विनियोजनम्

5. द्रव्यम् चयविधिश्च

6. भवनांगम्

7. सज्जा

8. दोषा:

1. भूमिचयनम् -

विन्यासात् पूर्णं निवेशार्थं भूमे: चयनं सर्वप्रथमं कर्त्तव्यम्। भूमिचयने अनेका: विधय: सन्ति। पञ्चमहाभूतानां तन्मात्राभि: भूमे: परीक्षणं भवति। आकाशवायुतेजजलपृथिवीनां तन्मात्रा क्रमश: शब्दस्पर्शरूपरसगन्धा: सन्ति। पञ्चज्ञानेन्द्रियेभ्य: एतेषां तन्मात्रणां ज्ञानं भवति। अत:ज्ञानेन्द्रियै: भूमे: परीक्षणं सर्वप्रथमतया भवति।

वर्णपरत्वे भूमिलक्षणानि सन्ति। वर्ण चक्षु इन्द्रियस्य विषयोऽस्ति। यथा

**शुभस्य शुभदा ज्ञेया दशा पापस्य चाधमा।**

**शुक्ला मृत्स्ना च या भूमिर्बाह्मणी सा प्रकीर्तिता।**

**क्षत्रिया रक्तमृत्स्ना च हरिद्वैश्या उदाहृता।**

**कृष्णा भूनिर्भवेच्छूद्रा चतुर्धा परिकीर्तिता।**

पुन: वर्णपरत्वे भूमिलक्षणानि -

**श्वेता शस्ता द्विजेन्द्राणां रक्ता भूमिर्महीभुजाम्।**

**विशां पीता च शुद्राणां कृष्णान्येषां विमिश्रिता।।**

स्पर्शपरत्वे भूमिलक्षणानि। स्पर्श त्वक् इन्द्रियस्य विषयोऽस्ति।

**ब्राह्मणी भू: कुशोपेता क्षत्रिया स्याच्छराकुला।**

**कुशकाशकुला वैश्या शुद्रा सर्वतृणाकुला।।**

गन्धापरत्वे भूमिलक्षणानि। गन्धा: जिघ्राणेन्द्रियविषय: ।।

**सुगन्धा ब्राह्मणी भूमी रक्तगन्धा तु क्षत्रिया।**

**मधुगन्धा भवेद्वैश्या मद्यगन्धा च शूद्रिका।।**

रसपरत्वे भूमिलक्षणानि। रस: जिह्वेन्द्रियविषय:।।

**अम्ला भूमिर्भवेद्वैश्या तित्ता शूद्रा प्रकीर्तिता।**

**मधुरा ब्राह्मणी भूमि: कषाया क्षत्रिया मता।।**

अष्टदिक्प्लवत्कलम्। अयं विषय चक्षु-इन्द्रिय: -

**शम्भूकोणे प्लवाभूमि: कर्तु: श्रीसुखदायिनी।**

**पूर्वप्लवा वृद्धिकरी धनदा तूत्तरप्लवा ।**

**मृत्युशोकप्रदा नित्यमाग्नेयी दक्षिणप्लवा।**

**गृहक्षयकरी सा च भूमिर्यानिर्ऋतिप्लवा ।।**

**धनहानिकरी चौव कीर्तिदा वरुणप्लवा।**

**वायुप्लवा तथा भूमिर्नित्यमुद्वेगकारिणी।।।**

आकारत्वेन भूमे: लक्षणम् चक्षु-इन्द्रियविषयोऽयम् -

**आयते सिद्धस्सर्वाश्चतुरस्त्र धनागम:।।**

**वृत्ते तु बृद्धिवृद्धि:स्याद्भद्रं भद्रासने भवेत्।**

**चक्रे दारिद्रयमित्याहुर्विषये शोकलक्षणम्।**

**राजभीतित्रिकोणे स्याच्छकटे तु धनक्षय:।।**

**दण्डे पशुभयं प्राहु: शूर्पे वासे गवां क्षय:।**

**क्रूमे तु बन्धनं पीडा धनुक्षेत्रे भयं महत्।**

**कुन्भाकारे कुष्ठरोगो भवत्येव न संशय:।**

**पवने नश्यति नेत्रं धनञ्च बन्धुक्षयो मुरजे।।**

**एवं भूमिविचारं कृत्वा वासं नरः कुर्यात्।**

अनेन बहुभिः प्रकारैः भूमेः परीक्षणं भवति। भूमेः परीक्षणं कृत्वैव नरः निवास कुर्यात्।

2. विधा भवनप्रकारो वा -

भवननिर्माणप्रकारेषु तिस्रः विधाः सन्ति। प्रथमं सामान्यजनानां कृते भवनम् द्वितीयं राजकीयजनानां कृते भवनम् तृतीयं देवभवनं मन्दिरं वेति। येषु अत्र सामान्यजनभवनस्य वर्णन प्राचीनैः आचार्यैः एवं कृतम्। तच्चैव -

**ईशान्यां देवतागेहं पूर्वस्यां स्नानमन्दिरम्।**
**आग्नेय्यां पाकसदनं दक्षिणे शयनं गृहम्।।**
**राक्षसे शस्त्रसदनं वारुण्यां भोजनालयम्।**
**वायव्ये धान्यगेहं तु भाण्डारागारमुत्तरे।।**
**आग्नेयपूर्वयोर्मध्ये दधिमन्थनमन्दिरम्।**
**अग्निप्रेतशयोर्मध्ये आज्यगृहं प्रशस्यते।।**
**याम्यनैऋत्ययोर्मध्ये पुरीषत्यागसदनम्।**
**नैऋत्याम्बुपयोर्मध्ये विद्याभ्यासस्य मन्दिरम्।।**
**पश्चिमानिलयोर्मध्ये रोदनार्थं गृहं स्मृतम्।**
**वायव्योत्तरयोर्मध्ये रतिगेहं प्रशस्यते।।**
**उत्तरेशानयोर्मध्ये ओषधार्थं तु कारयेत्।**
**नैऋत्यां सूतिकागृह नृपाणां भूतिंनिच्छताम्।।।**

मुहूर्त्तचिन्तामणौ दिगनुरोधेनापि एवमेव वर्णनं मिलति। यथा

**स्नानाग्निपाकशयनास्त्रभुश्च धान्यभण्डारदैवतगृहाणि च पूर्वतः स्युः।।**
**तन्मध्यतस्तु मथनाज्यपुरीषविद्याभ्यासाख्यरोदनतौषधसर्वधान्यम्।।**

उत्तरम्

| | | | | |
|---|---|---|---|---|
| अन्नगृहम् | रतिगृहम् | भण्डारक | औषधिकक्षः | पूजागृहम् |
| कोपागृहम् | | | | सर्ववस्तुगृहम् |
| भोजन स्थानम् | | | | स्नानकक्षः |

अध्ययन कक्षः दधिमन्थनम

शरत्रागारः पुरीषत्याग स्थानम् शयनकक्षः आज्यगृहम् पाकसदनम्

3. प्रतिकृतिः -

शालाभिः भवनानां मुख्यतः चतस्त्रः प्रतिकृतयः भवन्ति। एक-द्वि-त्रि-चतुश्शालानां परस्परविन्यासैः षट् शालतः दशशालं यावत् भवनानां वर्णनं प्राचीनग्रन्थेषु मिलति। अनेन असंख्यानि गृहाणि भवन्ति। प्रत्येक शाले कियन्मितानि भवनानि विर्निमितानि भवन्तीति समरांगणसूत्रधारे मिलति।।

4. विनियोजनम् -

भवनविनियोजनं सम्प्रति श्विल्डिंग बाईलाजश् इति नामना जना जानन्ति। कदा भवननिर्माणं स्यात्। कस्मिन् भवने कति द्वाराणि भवेयुः, कासु दिक्षु द्वाराणि स्युः। निवासभवने कतितलानि भवेयुः। गवाक्षा कुत्र स्युः इत्यादयः विचारः विनियोजने भवति।।

5. द्रव्यं चयविधिश्च -

भवननिर्माणे द्रव्यस्य आवश्यकता कदा कति भविष्यतीति विचारं कृत्वा भित्ते :चयविधीनां विचारोऽपि अत्रैव भवतीति।

6. भवनाङ्गम् -

अलिन्द-पीठ- द्वार- स्तम्भ- कुड्य (भिन्नेः लेपनादयः) छाद्यादीनां निर्णयोऽस्मिन् विभागे भवति।

7. सज्जा -

प्रकृतिचित्रणादिभिः गृहद्वारसज्जादीनां विचारोऽत्र भवति।

8. भवनदोषः -

भवनदोषानां वर्णनं विशदरूपेण प्राप्यते। भवनदोषानां बहव्यः श्रेण्यः सन्ति। प्रायः दोषज्ञानाय आचार्याः कथयन्ति यत् वास्तुशास्त्रस्य मूलप्रमाणानां विचारः सम्यक् करणीयम्। समराङगणसूत्रधारे एक गृहदोषप्रकरणमस्ति। तत्र बहवः दोषा आचार्यैः कथिताः परन्तु तेष्वपि द्वाविंशति प्रमुखदोषाः सन्तीति आचार्याणाम्मतमस्ति।

इदानीं समाजे वास्तुशास्त्रस्य चर्चा सर्वाधिकरूपेण दृश्यते । सम्प्रति जनाः वास्तुशास्त्रस्य सन्दर्भ दृग्भ्रमिता अपि दृश्यन्ते । अत आवश्यकताऽस्ति यत् पूर्व वास्तुशास्त्रस्य स्वरूपं कीदृशमासीत् ? तथा च सम्प्रति कीदृशमस्ति ? इत्यस्य सम्यक् ज्ञानं स्यात् । आवैदिककालात् प्राचीनकाले वास्तुशास्त्रस्य स्वरूपं कीदृशमासीद् इत्यस्य चर्चा अद्य

अस्मिन् पाठ्यंशे भविष्यतीति।।

समाजे वास्तुशास्त्रस्य कल्पना वैदिककालादेव दृश्यते। यदा मानवाः कुजेषु गह्वरेषु च निवसन्ति स्म तदा भूमौ आवासीयव्यवस्था नासीत्। तस्मिन् कालेऽपि मानवः स्वसुरक्षादृष्टया सम्यक् निवासस्थानस्य चयनं करोति स्म।

नृपतिपृथः प्रयासः

सर्वप्रथमं पृथुना पृथिवीं समीकृत्वा सुव्यवस्थितावासस्य परिकल्पना कृता। अस्यानन्तरं पृथुना ब्रह्माणं प्रत्युत्तम् यत् हे ब्रह्मन्! भवतामादेशेनैव मया पृथिवी निर्माणार्थं समीकृता। अतोऽग्रे तत्र ग्रामनगरादीनां निर्माणार्थं मामादिशन्तु इति वर्णनं वास्तुशास्त्रस्य मानकग्रन्थेषु पुराणेषु च मिलति। इतः परं ब्रह्मणा सृष्टिनिर्माणस्य योजना विहिता।

विश्वकर्मादीनामुत्पतिः -

ब्रह्मणा स्वचतुर्भिर्मुखैः विश्वकर्मादीनां रचना कृता। ब्रह्मणः पूर्वमुखं विश्वभूः दक्षिण-मुखं विश्वविद् पश्चिममुखं विश्वस्रष्टा तथा चोत्तरमुखं विश्वस्थ इति कथयन्ति पौराणिकाः। ब्रह्मणः विश्वभूमुखात् विश्वकर्मणः विश्वविन्मुखात् मयस्य विश्वस्रष्टामुखात् मनोः तथा च विश्वस्थमुखात् त्वष्टायारुत्पतिः जाता। यथा-

स एवायं विश्वकर्मा ब्रह्माण्ड सूजते मुहुः।

पूर्वोत्तवत्रचत्वारिवक्ष्येऽहन्तु पृथक्-पृथक्।।

विश्वभूरिति नानैतत्पूर्ववर्त्तं प्रकीर्तितम्।

दक्षिणे विश्वविद्वत्रं विश्वस्थं च तथोत्तरे।।

पश्चिमे विश्वग्रष्टाख्यं वर्त्तमेव चतुर्विधम्।

एतेभ्यः प्रथमं जातं विश्वकर्मचतुष्टयम्।।

पूर्वानने विश्वकर्मा जायते दक्षिणे मयः।

-उत्तरस्य मुखे त्वष्टा पश्चिमे तु मनुः स्मृतः ।।

वास्तुसारसंग्रहप्राक्कथनम् पृ0 8

ब्रह्मा

| | | | |
|---|---|---|---|
| पूर्वमुखम् | दक्षिणमुखम् | पश्चिममुखम् | उत्तरमुखम् |
| विश्वभूः | विश्वविद् | विश्वस्रष्टा | विश्वस्थः |
| विश्वकर्मा | मयः | मनुः | त्वष्टा |

स्थपतिः   सूत्रग्राही तक्षक   वार्धकिः

ब्रह्मा स्वपुत्रान् प्रति कथयति यत् भवन्तः पृथिव्यां गत्वा पृथोरभिलाषानुसारं तत्र नगर-ग्राम-पुरादीनां पृथक् पृथक् रचनां कुर्वन्तु। विश्वकर्मणा जगत्स्त्रष्टारं ब्रह्माणं प्रति कथितं यदहं तत्र गत्वा स्वबुद्ध्या सुर-असुर-उरग-नागाणां कृते तथा च सह एव पृथोः मनुष्याणाञ्च कृतेऽपि निवासाय सुन्दरपुरीनगरग्रामादीनां निर्माणं करिष्यामि। यथोक्तम् -

गत्वोर्विवैन्यनृपतेः  प्रियं तव   करिष्यति।

नगर-ग्राम-खेटादीन् करिष्यति च पृथक् पृथक्।।

स्वयं  करिष्येऽहमथो  निवासाय पृथः पुरीम्।

विचित्र -  नगर - ग्राम -  खेटामतिमनोहराम्।।

-वास्तुसारसंग्रहप्राक्कथनम् पृ.-6

## २.६ स्थपत्यादीनामुद्भव

विश्वकर्मा चिन्तयति यत् ब्रह्मणराज्ञानुपालने केषाञ्चन दक्षशिल्पीनामावश्यकता भविष्यति। एतदर्थं तैः सर्वैः विश्वकर्मादिभिः एकैकः पुत्रः उत्पादितः। विश्वकर्मणः स्थपतेः मयात् सूत्रग्राह्याः मनोः तक्षकस्य त्वष्टुः च बार्धकेरुत्पतिः जाता।

**विश्वकर्मणः पुत्रः स्यात् स्थपतिश्चैव स स्मृतः।**

**मयस्य  तनयः  सुत्रग्राहीति  परिकीर्तितः।।**

**त्वष्टुर्देवऋषेः  पुत्रो  वार्धकिरिति  विश्रुतः।**

**मनोः   पुत्रस्तक्षः   स्यात्स्थपत्यादिचतुष्टयम्।।**

-वास्तुसारसंग्रह प्राक्कथनम् पृ.-9

सर्वविदितमस्ति यत् कस्यापि निर्माणाय विभिन्नानां शिल्पीनामावश्यकता भवति। यथा- पाषाणविशेषज्ञस्य काष्ठविशेषज्ञस्य धातुविशेषज्ञस्य निर्माणविशेषज्ञस्य च। एतेषां सर्वेषां विशेषज्ञानां संयुक्तप्रयासैरेव किमपि निर्माणकार्य पूर्ण भवितुं शक्यते। प्राचीन-वास्तुशास्त्रे स्थपतेः सूत्रग्राह्याः बार्धकः तक्षकस्य च कार्याणि निर्धारितानि भवन्ति स्म।

स्थपत्यादीनां कार्याणि -

1. स्थपतिः सर्वेषां वेदशास्त्रणां ज्ञाता समस्तनिर्माणकार्येषु च पारंगतो भवति स्म। स्थपतेराज्ञया एव सूत्रग्राह्यादयः समस्तनिर्माणकार्याणि कुर्वन्ति।

**स्थपतिः  सर्वशास्त्रज्ञो  वेदविच्छालपारगः।**

**स्थापयत्याधिपतिर्यस्मात् तस्मात् स्थपतिरुच्यते।।**

**स्थपत्राज्ञा सर्वे सूत्रग्राह्यादयः सदा।।**

**कुर्वन्ति शास्त्रदेशेन वास्तुवस्तु प्रयत्नतः।।**

**आचार्यलक्षणैर्युत्तः स्थपतिः स्यादिति विश्रुतः।**

-वास्तुसारसंग्रह प्राक्कथनम् पृ.-9

2. सूत्रग्राही - रेखाचित्र-मानचित्रनिर्माण योजनाकार्येषु च कुशलो भवति स्म।

श्रुतज्ञ सूत्रग्राही च रेखाज्ञः शास्त्रवित्तमः।।

-वास्तुसारसंग्रह प्राक्कथनम् पृ.-9

3. बाकिः - केष्वपि योजनाकार्येषु निपुणः वेदज्ञः चित्रकलाविशेषज्ञश्च भवति।

विचारज्ञः श्रुतिज्ञश्च चित्रकर्मज्ञवार्धकिः।

-वास्तुसारसंग्रह प्राक्कथनम् पृ.-9

4. लक्षकः सर्वेषु निर्माणकार्येषु दक्षः कुशलकर्मिभिः युत्तः धीरः सर्वेषां शिल्पीनां गुरुः भवति।

तक्षकः कर्मवित्सभ्यः सबान्धवदयापरः।।

इहैव लोकस्य यत्कर्म सर्वं तल्पीनां गुरुः।

-वास्तुसारसंग्रह प्राक्कथनम् पृ.-9

एतेषां सर्वेषां सहयोगेन एव गृह-ग्राम-नगरादीनां सर्वेषां निर्माणं भवति। येषु कोऽपि एकः सर्वं निर्माणकार्य पूर्ण कर्तुं शक्नोति यतो हि एते सर्वे सर्वगुणसम्पन्नाः भवन्ति। यथोत्तम्।-

न लभ्यते तु यत्तस्मादेभ्यः सर्वं प्रसाधायेत्।।

-वास्तुसारसंग्रह प्राक्कथनम् पृ.-9

उपर्युत्तचतुर्णा शिल्पीनामेकत्रोपलब्धिः यदि न स्यात्तर्हि एकोऽपि निर्माणकार्यासाधाने दक्षः पारंगतश्च भवति स्म। एते सर्वे सर्वेषां ज्ञानेनापूरिता भवन्ति। अत एव सर्वे पृथक् पृथगपि समग्रनिर्माणकार्य पूरयितुं समर्था भवन्ति। येषु सर्वेषु स्थपतिः सर्वज्ञो भवति स्म। स्थपतिरेव शेषान् सर्वानादिशति। अतः स्थपतिः सर्वेषां गुरुः सिद्धयति। द्वितीयः सूत्रग्राही शेषद्वयस्य गुरुः निदेशकश्च तथा च बार्धकिः तक्षकस्य आदेशकः गुरुर्वेति भवति स्म। यथोत्तम् -

स्थपतिस्तु स्वतुर्येभ्यस्त्रियो गुरुरिति विश्रुतः।

सूत्रग्राही गुरुभ्यां तुर्थेभ्योऽथ प्रकीर्तितः।।

तक्षकस्य गुरुनाम्ना बाकिरिति विश्रुतः।।।

येषु सर्वेषु तक्षकस्य विशिष्टं स्थानं वर्तते। तक्षकः काष्ठविशेषज्ञः वनात्काष्ठाह-रणविधिना काष्ठं गृहीत्वा तं काष्ठं निर्वल्कलं कृत्वा मासत्रयं जले निक्षिप्य पश्चाज्जल-ान्नि:सारयति स्म। अनेन काष्ठस्य जीवनं दीर्घकालिक कीटच्छिन्नप्रभृतिदोषनिर्मुत्तञ्च भवति स्म। ततश्चतुरस्त्रविदारणेन काष्ठं सर्वोपयोगी भवतीति।

वास्तुपुरुषस्योद्भवः -

अनेन सुव्यवस्थितविधिना सह पृथोः मनोनुकूलं पृथिव्यां ग्राम-नगर-पुरादीनां निर्माण विश्वकर्मणा सम्पादितम्। इत एव वास्तुशास्त्रस्योद्भवोऽभवत्। आरम्भकालादेव वास्तुशास्त्रे वास्तुपुरुषस्यावधारणा मिलति। वैदिककाले वास्तुपुरुषस्यावधारणा वास-तोस्पतिदेवविशेषस्य रूपे मिलति यस्याराधाना यज्ञे गृहशान्त्यर्थं भवति। पौराणिककाले वास्तोस्पतेः द्वौ रूपौ मिलतः प्रथमः वास्तुपुरुषरूपे द्वितीयः वास्तुचक्ररूपे वास्तुचक्रे पञ्चचत्वारिंशतद्देवाः सन्ति। ये वास्तुशान्तिकर्मणि पूज्यन्ते। पुराणेषु वास्तुपुरुषस्य सन्दर्भ एका कथा प्रचलिताऽस्तीति। यथा एकदा भगवाशिवान्धकयोर्मध्ये घनघोर युद्धमभ-वत्। युद्धे भगवतः शिवस्य ललाटात् स्वेबिन्दुः भूमौ अपतत्। तस्मादेकः विशालकायः पुरुष उत्पन्नोऽभवत्। तेन झटिति अन्धकासुरस्य बधं कृत्वा स्वनिवासाय स्थानस्य याचना कृता। प्रसन्नो भूत्वा भगवता शिवेन तस्य कृते आवासयोग्यभूमौ निवासस्यादेशः कृतः। तदन्तरं भयेनाक्रान्तैः सर्वैः देवैः तं गृहीत्वा भूमौ अधोमुखं विनिविश्य यत्र येन गृह्यते तत्रैव स्थितो भूत्वा तस्य प्रतिष्ठा वास्तुपुरुषरूपे विहिता। यथोत्तम्।

संग्रामेऽन्धकद्रयोश्च पतितः वेदो महेशात् क्षितौ,

तस्माद्भूतमभूच्च भीतिजननं याबा पृथिव्योर्महत्।

तदेवैः सहसा निगृह्य निहितं भूमावधी वक्त्रकं

देवानां वचनाच्च वास्तुपुरुषस्तेनैव पूज्यो बुधैः।।

वास्तुपुरुषपूजनस्योद्देश्यम् -

भवन-पुर-ग्राम-तडाग-वापी-वन-उद्यान-यज्ञमण्डपादीनां निर्माण तथा च जीर्णोद्धा-रेऽस्यैव वास्तुपुरुषस्य पूजनं भवति। अस्य पूजनं विना गृहे सुखशान्तिः नागच्छति। यथोत्तम् -

प्रासादे भवन तडागखनने कूपे च बाप्टयां बने,

जीर्णोद्धारे पुरे च यागभबने प्रारम्भनिर्वर्तने।

वास्तोः पूजन सुखाय कथितं पूजा विना हानये।।

वेदेषु वास्तुविद्देवगणाः -

प्रजापतिः

सम्पूर्णेयं सृष्टिः स्थापत्यस्याद्भुतं निदर्शनमस्ति। सृष्टिप्रक्रियायां सर्वे देवाः सहायकाः भवन्ति। ऋग्वेदस्य हिरण्यगर्भसूत्तस्यानुसारं श्कश् संज्ञकः प्रजापतिः प्रथमः वास्तु देवोऽस्ति। येन द्यु-अन्तरिक्ष-पृथिवीनां रचना कृता। स्वयंभूपरमेश्वरः सर्वप्रथम विश्वोत्पत्तये प्रजापतिमसृजत्। श्रुतिषु प्रजापतिरेव हिरण्यगर्भः। यथा

हिरण्यगर्भः समवर्ततात्रे भूतस्य जातः पतिरेक आसीत्।

-ऋग्वेद संहिता - 10.129.03।

ऋग्वेदस्य नासदीयसूत्ते वर्णनं मिलति यत् सृष्टेरादौ न 'सत्' आसीत् न 'असत्' आसीत् न आकाशमासीत् न वायुमण्डलमासीत् न दिवसमासीत् न रात्रिरासीत् केवलं ब्रह्मण एव सत्ता आसीत्। ब्रह्मणः संकल्पमात्रेण सृष्टिरभूत्। संकल्प एव ज्वाजल्यमानतप आसीत्।

विश्वकर्मा

विश्वकर्ता विश्वकर्मा वाजसनेयिसंहितानुसारं प्रजापतिना सम्बद्धोऽस्ति। निरुत्तकारः यास्कः विश्वकर्माणं विश्वकर्मा भौवनः तथा च सर्वस्य कर्ता कथयति। शौनकैः विश्वकर्मणः अर्थः विश्वस्य कर्म जनयन् स विश्वकर्मा इति क्रियते। ऋग्वेदे परमेश्वर एव स्रष्टा, परमेश्वरस्य गुणानां संज्ञा एव देवताः ब्रह्माण्डस्य सृजनं देवा एव कुर्वन्ति। ते देवाः सन्ति विश्वकर्मा, विष्णुः सविता त्वष्टा, इन्द्र वरुणादयः। एते देवाः सृष्टिनिर्माणे विभिन्नानि कार्याणि कुर्वन्ति तदैव भवति पूर्ण ब्रह्माण्डनिर्माणकार्यम्। तैः सृजने यस्य पदार्थस्योपयोगः कृतः स आसीद् अन्तरिक्षधूलिः (कास्मिकडस्ट) मेघसदृशः कश्चन पदार्थः। अस्य सृष्टेः धारकः परमेश्वरपरब्रह्म एवास्ति स एव जानात्यस्य रहस्यम्। यथा

इयं विसृष्टिर्यंत आवभूव यदि वा दधे यदि वा न्।

यो अस्याध्यक्षः परमे व्योमन् त्सो अंग वेद यदि वा न वेद।।

अर्थात् जगङ्ग्रष्टापरमेश्वरः योऽस्याः सृष्टेरध्यक्षः सः एवास्याः सृष्टेः धारकोऽस्ति। पूर्णतः स एव जानाति काऽस्तीय विसृष्टिरिति ? -

ऋग्वेद- 10/129/7

त्वष्टा

वैदिकसाहित्येऽस्य देवस्य वर्णनं तक्षणकर्मणा वस्तूनां रूपनिर्माणे आगच्छति। यास्कस्यानुसार त्वष्टा शब्दः त्विष त्वक्ष् धातुभ्यां निष्पन्नो भवति।

(निरुत्त-8/13)

शौनकोऽपि यास्कस्य मतस्य पुष्टिं करोति । ऋगवेदे वर्णनं मिलति यत् तक्षण-कार्यकुशलः त्वष्टा मानवपशूनां कृते आवश्यकवस्तूनां निर्माणं करोति स्म। वास्तु-शिल्पज्ञानां वाहन-आयुध- धेनुदिव्यत्रिबन्धुर-रथ-हरिसंज्ञकाश्वाः प्रसिद्धरचनाः सन्ति। त्वष्टा अग्निकला प्रदर्शने वज्रलोहकुठाराणाञ्च तीक्ष्णीकरणे अपि कुशल आसीत्। अनेन सिद्धयति यत् त्वष्टा देवानां निष्णातशिल्पी आसीत् ।।

ऋभुदेवगणः

हस्तकलाकुशलाः ऋभुगणाः सुधन्वांगिरः पुत्राः त्वष्टु त्वष्टकर्मकुशलशिष्या सन्ति। एतैः रथः रथस्य चक्रम् चक्रधारा वल्गा (लगाम) मातुः निधनकारणेन कृशरूपाय गो-वत्साय त्वचा मातृरूपायाः धेनोः निर्माणं कृतम्। अनेनैव स्ववृद्धमातृपितृभ्यां पुनर्योवनं प्रदत्तम्।

वास्तोष्पतिः

अस्य देवस्य वास्तुशिल्पकार्यनिर्माण किमपि योगदानं नावलोक्यते परन्तु गृहस्य रक्षणे पालने चास्य भूमिका सर्वोपरि दृश्यते। यथोत्तम् -

वास्तोष्पते प्रति जानीह्यस्मान्त्स्वादेशो अनमीवो भवा नः।

यत् त्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे।।

अर्थात् हे वास्तोष्पते ! अस्मान् प्रति जानीहि। नः स्वावेशः अनमीवः भवः ।।

यत् त्वा ईमहे तत् नः प्रति जुषस्व । नः द्विपदे चतुष्पदे शं भव। -ऋग्वेद-7.54.01

वास्तुशास्त्रस्याप्रतिमवर्णनम् -

रामायणे महाभारते च वास्तो वर्णनं बहुषु स्थलेषु दरीदृश्यते। अनयोः द्वयोः ग्रन्थयोः नागरद्रविणपरम्पराया अनेकानि उदाहरणानि उपलभ्यते। रामायणे विविधपुरीणां चर्चा उपलभ्यते । किष्किन्धाकाण्डे वर्णितायाः विचित्रगुहायाः वर्णनं मयस्य शिल्पकौशलस्य अद्वितीयमुदाहरणमस्ति। रामायणे वास्तुशिल्पशास्त्रस्य अनेकानि उदाहरणानि दृश्यन्ते। यथापुष्पकविमानम् सेतुबन्धम् इत्यादयः। अनेन महाभारतेऽपि वास्तुशास्त्रस्य अप्रतिमानि उदाहरणानि मिलन्ति। यथा- इन्द्रप्रस्थपुरी द्वारकापुरी मिथिलापुरी विभिन्नसभाभवनानि लाक्षागृहम् इत्यादयः। पुराणेषु वास्तुशास्त्रस्य वर्णनं मुख्यरूपेण मत्स्य-अग्नि-स्क-

न्द-गरुड़-विष्णुधर्मोत्तरेषु मिलति।

वास्तुविौराणिकदेवता -

वैदिकदेवपरिवारस्योपयुत्ताः वर्णिताः देवाः वास्तुकर्मणा सम्बद्धास्तु सन्ति परन्तु तेषां तत्र वास्तुविद्यया सह साक्षात्सम्बन्धास्योल्लेखः नावलोक्यते। पुराणेषु देवाधिदेवानां ब्रह्मा-विष्णु- महेशानां साक्षात्सम्बन्धः वास्तुशास्त्रेण सहास्तीति वर्णनमुपलभ्यते। सृष्टेः मूलकारणं परब्रह्म एव, यः पुराणेषु विष्णु-ब्रह्म-शिवाख्याः वर्णिताः। इमे देवाः क्रमेण जगतः संचालनं कुर्वन्ति।

ब्रह्मा -

सृष्टिकर्तारं ब्रह्माणं विद्वभिः स्थापत्यस्य वास्तुशास्त्रस्य वा प्रोत्तारः कथ्यन्ते। मानसारानुसारं ब्रह्मणः चत्वारि मुखानि सन्ति। तेभ्यः क्रमशः विश्वकर्मणः मयस्य त्वष्टुः मनोश्चोत्पत्तिः जाता। नारद-भृगु-पुलस्त्य-अत्रि-वशिष्ठादयः ब्रह्मणः मानसपुत्रः एतेऽपि वास्तुशास्त्रस्य ज्ञातारः सन्ति ।

विष्णुः -

भगवतः विष्णोः मत्स्यावतारेण मनवे वास्तुशास्त्रस्योपदेष्टाः कृतः। भगवता विष्णुना एव विश्वकर्माणं चित्रशास्त्रस्य ज्ञानं प्रदत्तम्। भगवतः विष्णोः वराहविग्रहेणैव वास्तुसन्दर्भ पंके निमनायाः भूमेरुद्धारः कृतः। तदैव भूमौ ग्रामनगरादीनां निर्माणं जातम्।

शिवः -

सर्वेषां ज्ञानराशीनां मूलस्रोतांसि शिव एव। भगवान् शिवः दक्षिणामूर्तिविग्रहेण भत्तानां कृते ज्ञानं प्रददति। एत एव मूलरूपेण वास्तुशास्त्रस्योपदेष्टारः सन्ति। यतो हि पुराणानुसार वास्तुमण्डलस्याधिदेवस्य वास्तुपुरुषस्य जन्म शिवस्य स्वेदबिन्दोरभवत्।

वास्तुशास्त्राचार्याः -

वास्तुशास्त्रस्य प्रवर्तकाचार्याणामुल्लेखः पुराणेषु वास्तुग्रन्थेषु शुल्वग्रन्थेषु चोपलभ्यते। मत्स्यपुराणे वास्तुशास्त्रस्य अष्टादशोपदेशकाचार्याणां वर्णनं मिलति। यथा- भृगुः अत्रिः वशिष्ठः विश्वकर्मा मयः नारदः नग्नजित् विशालाक्षः पुरन्दरः ब्रह्माकुमारः नदीशः शौनकः गर्गः वासुदेवः अनिरुद्धः शुक्रः वृहस्पतिश्च।।

भृगुरत्रिवशिष्ठश्च विश्वकर्मा मथस्तथा।

नारदो नग्नजिच्चौव विशालाक्षः पुरन्दरः।

ब्रह्मा कुमारी नन्दीशः शौनको गर्ग एव च।

वासुदेवोऽनिरुद्धश्च तथा शुक्रबृहस्पती।

अष्टादशैते विख्याता: वास्तुशास्त्रोपदेशका:।।

संक्षेपेणोपदिष्टं यन्ननबे मत्स्यरूपिण:।।

अग्निपुराणे पञ्चविंशति आचार्याणामुल्लेखो मिलति। (अग्निपुराण-39.1-5)। उतथ्यपुत्र: आचार्यगर्ग: ज्योतिषशास्त्रस्याचार्य आसीत्। प्राचीनचरितकोशे वर्णनं मिलति यत् गर्गाचार्येण शेषनागात् ज्योतिर्विद्यायारध्ययनं कृतम्। अत: ते वास्तुशास्त्रस्याचार्या अप्यासन्। अग्निपुराणे उल्लिखितं वर्तते यदेतेषां गायतन्त्रनामक: ग्रन्थ आसीत्। महर्षिनारदस्य नारदीयतन्त्रम् नारदसंहिता नारदीयपाञ्चरात्रम् नारदवास्तुविधानञ्चेत्यादयो ग्रन्था: मिलन्ति येषु सर्वेषु ग्रन्थेषु वास्तुविषयकं वर्णनमुपलभ्यते। ब्रह्मण: मानसपुत्रस्य अत्रे: आत्रेयतन्त्रम् अत्रिसंहिता अत्रिस्मृति: शुक्राचार्यस्य शुक्रनीति: वृहस्पते: बृहस्पतिस्मृति: बार्हस्पत्यशास्त्रञ्च येषु ग्रन्थेषु एतेषामाचार्याणां वास्तुविषयक विचारा उपलभ्यन्ते। नग्नजिताचार्यस्य चित्रलक्षणनामक: ग्रन्थ: प्रसिद्धोऽस्ति। अयमाचार्य: चित्रकर्मणि कुशल: आसीत्।

वास्तोरन्या आचार्या: -

बाल्मीकिरामायणस्य युद्धकाण्डे वास्तुविदो: नलनीलयो: वर्णनं मिलति। नल: कृताच्या: गर्भादुत्पन्न: विश्वकर्मण: पुत्र आसीत्। नलोऽपि विश्वकर्मणा सदृश:, वास्तुकर्मणि कुशल आसीत्। एतै: एव समुद्रोपरि दशयोजनदैर्घ्यसेतो: निर्माणो विधेय: । विश्वकर्मण: द्वितीयवानरपुत्र: नीलोऽपि नलस्य सहायक आसीत्। महाभारते वर्णनं मिलति यत् वास्तुविद् पुरोचन: लाक्षागृहस्य कर्ता आसीत्। तस्य लाक्षागृहे दहनेन मृत्युरभवत् (महाभारत- 132. 8-13)। मानसारे वास्तुशास्त्रस्य बहूनामाचार्याणां वर्णनं मिलति। यथा- विश्वकर्मा विश्वेश: विश्वेश्वर: प्रबोधाक: वृत: मय: त्वष्टा: मनु: नल मानवित् मानकल्प: मानसार: प्रष्टा मानबोधा: विश्वबोध: नय: आदिसार:, विशाल: विश्वकाश्यप: वासुबोध: महातन्त्रम् वास्तुविद्यापति: पाराशरीयक: कालयूप: चौत्य: चित्रक: आवर्ध: भानु: साधकसार: इन्द्र: लोकज्ञ: सूर्यश्च वराहमिहिरेण वृहत्संहितायां स्थानेख्रस्थाने प्रसंगानुसारं गर्ग- मनु- वशिष्टपराशर- विश्वकर्मा- नग्नजित्- मयादीनां वर्णनं कृतम् वास्तुकौस्तुभग्रन्थे शौनक- रामरावण- परशुराम- हरि- गालव- गौतम- शोभित- वैद्याचार्य- मयपुत्र- कार्तिकेय च्यवनानामुल्लेखो मिलति। विश्वकर्माप्रकाशे गर्ग: पराशर: बृहद्रथश्च वास्तु प्रवर्तकाचार्या: सन्ति। ऋषे: कश्यपस्य काश्यपशिल्प: ऋषेरगस्त्यस्य सकलाधिकार: तथा चर्षे: मरीचे: वैखानसागम: प्रसिद्धा: ग्रन्था: सन्ति। येषु सर्वेषु ग्रन्थेषु वास्तुशिल्पशास्त्रयो: प्रतिपादनं कृतमाचार्यै:।

वास्तुशास्त्राग्रगण्याचार्यों -

वास्तुविदा प्रसंगे वास्तुशास्त्रस्य आचार्येषु विश्वकर्मामयौ अग्रगण्यौ आचार्यों स्तः। भारतीयसंस्कृतौ अनयोः वर्णनं दरीदृश्यते।

विश्वकर्मा

देवशिल्पी विश्वकर्मा वास्तुशास्त्रे नागरपरम्परायाः प्रवर्तकोऽस्ति। एतेषां कृते वास्तुशिल्पयोः ज्ञानं ब्रह्मणः प्राप्तम् वैदिकसंहिताब्राह्मणग्रन्थयोः वर्णितसृष्टिकार्ये प्रवृत्तः देवः विश्वकर्मा दृश्यते। एते एव ब्रह्मणा मानसीसृष्टिं रूपं प्रददति। शिल्पशास्त्रे एतेषां कृते विष्णोरवतारभूता मन्यन्ते जनाः। शिल्पशास्त्रे वर्णनं प्राप्यते यत् विश्वकर्माणः चतुःषष्टिकलानामधिपतयः ऐरावतगजे आरूढाः प्रसन्नवदनाः आभूषणैराभूषिताः चतुर्भुजाकाराः शान्तरूपा पीतवसनावृताः हस्योश्च मानसूत्राधारिता स्तूयमाना सन्ति। विश्वकर्मणः जन्मनः विषये वास्तुग्रन्थेषु विविधविचाराः उपलभ्यते। धर्मस्य दशभार्यासु एका दक्षस्य पुत्री आसीत् यस्या अष्टवसूनां जन्म अभवत्। येषु सर्वेषु वसुषु कनिष्ठः प्रभ-ासवसुः विश्वकर्मणः जनक आसीत्। प्रभासवसोः पुत्रः विश्वकर्मा एव शिल्पविद्यानिष्णात आसीत्। यैः प्रसाद-भवन-उद्यान-प्रतिमा-भूषण-तडाग-आराम- कूपादीनां रचना कृता। समराणिसूत्रधारस्यानुसारमेतेषां माता बृहस्पतेः भगिनी आसीत् (विष्णुपुराण-1.15.118)। अतः विश्वकर्मा बृहस्पतेः भागनेयः। यथा- सुतः प्रभासस्य वसोः स्वस्नीयश्च बृहस्पतेः (समरांगण सूत्रधार )। ब्रह्मवैवर्तपुराणे वर्णनं मिलति यत् विश्वकर्मणः नव शिल्पकर्मणि दक्षाः पुत्र आसन्। ते सन्ति-मालाकारः कर्मकारः शंखकारः कुविन्दकः कुम्भकारः कांस्यकारः सूत्रधारः चित्रकारः स्वर्णकारश्च। यथा -

ततो बभुवः पुत्रश्च नवैते शिल्पकारिणः।

कुभकारः कांस्यकारः डेतेशिल्पिनां वरः।

सूत्रधारश्चित्रकारः स्वर्णकारः तथैव च।

पतितास्ते ब्रह्मशापात् आज्या वर्णसंकरा।।

अपराजितपृच्छा शिल्पग्रन्थे विश्वकर्मणः कुलपरिचयः पृथगवलोक्यते। तत्र विश्वकर्मणः जन्म चाक्षुषमनोः वंशे अभवत्। जयः विजयः सिद्धार्थः अपराजितश्च एते तेषां मानस पुत्राः सन्तीति तत्रोल्लिखितं वर्तते। येषु जयः अपराजितश्च वास्तुविद्याविदौ आस्ताम्। जयविश्वकर्माणोः प्रश्नोत्तररूपः ग्रन्थः जयपृच्छा संज्ञकः तथाऽपराजितविश्व-कर्मणोः प्रश्नोत्तररूपः ग्रन्थः अपराजितसंज्ञकः। एतौ द्वौ ग्रन्थौ वास्तुविषयकौ स्तः। प्रसंगेऽस्मिन् बहवः सन्दर्भाः उपलभ्यन्ते। विश्वकर्मणा प्रोत्ताः कतिपयवास्तुग्रन्थाः सन्ति। यथा- वास्तुशास्त्रम्, विश्वकर्माप्रकाशः दीपार्णवः क्षीरार्णवः वृक्षार्णवः अपराजितपृच्छा

जयपृच्छा वास्तुप्रदीपादयः।

मयः

वास्तुविद्यानिष्णातोऽसुराणां शिल्पी मय दक्षिणभारते प्रचलित द्राविड़ परम्परायाः उद्भावक आचार्योऽस्ति। महाभारते एकस्मिन् प्रसंगे मयः कथयति यत- अहं हि विश्वकर्मा दानवानां महाकविः। यथा विश्वकर्मा देवानां शिल्पी आसीत् तथैव मयोऽसुराणां शिल्पी आसीत्। रामायणे एतेषां कुलपरिचयः वर्णितोऽस्ति। मय दितेः पुत्रः आसीत् स्वर्गस्याप्सरा हेमा तस्य पत्नी आसीत्। हेमायाः गर्भात् मायावी-दुन्दुभिसंज्ञकौ द्वौ पुत्रौ तथा च मन्दोदरी संज्ञका पुत्री उत्पन्ना जाता। यस्या विवाहः रावणेन सह बभूव। अतः मयः रावणस्य श्वसुर आसीत् । महाभारते मयः दनुकश्यपयोः पुत्रः मनुचेः भ्राता आसीदिति वर्णनं मिलति। मयदानवः मायाविद्यायाः अप्रतिम ज्ञाता कुशलप्रयोत्ता चास्ति मयरचितवास्तोः शिल्पस्य च ग्रन्थेषु अनेकानि अप्रतिमोदाहरणानि दरीदृश्यन्ते। यथा- पाण्डवसभाभवनम् सुवर्ण-वनम्, सुवर्णभवनम् मायानगरम् त्रिपुरम् वैहायसविमानम् पुष्पकविमानञ्च । मयेनोत्तः प्रधानग्रन्थः मयमतमिति। वर्णनं मिलति यत् मयसंहिता अपि एतेषां कृतिरासीत्।

परवर्तीसाहित्ये वास्तुवर्णनम् -

कौटिल्य-अर्थशास्त्रे वास्तुविषयं वर्णनं प्राप्यते। तत्र वास्तो परिभाषा दुर्गनिवेशः ग्रामनगरराष्ट्रादीनां स्थापना भवने द्वारस्थापना तथा च पुर-तोरण-प्रतोली इत्यादिशब्दानां प्रयोगः ग्रन्थकारस्य वास्तुशास्त्रयज्ञानं प्रदर्शयति। मनुस्मृतौ ग्राम-गुल्म-राष्ट्र-दुर्गादीनां प्रसंगे वास्तुशास्त्रस्य चर्चा मिलति शुक्रनीतौ अपि भूमिभवनम्, राजधानीप्रकल्पनम्, राजप्रासादः, दुर्गः राजमार्गः प्रतिमानिर्माणम् तथा च मन्दिरनिर्माणादयः वास्तु-शास्त्रीयविषयाणां चर्चा उल्लिखिता सन्तीति । आगम साहित्येऽपि प्रचुर वास्तुशास्त्रस्य परिचर्चा उपलभ्यते। आगमसाहित्येष्वपि कामिकागमस्य अष्टचत्वारिंशद्-पटलेषु वास्तु-विद्यायाः वर्णनं मिलति। अस्यातिरित्तं कर्णागमस्य तालमानं सुप्रभेदागमस्य च प्रासादपटलः विशेषोल्लेखनीयौ स्तः। आगमग्रन्थेषु मूर्तिनिर्माणं विशेषरूपेण लिंगोद्भवशैवप्रतिमानां सांगोपांगविवेचनं प्राप्यते । अग्निपुराणे मूर्तिस्थापनप्रसंगे पञ्चविंशतितन्त्राणामुल्लेखः कृतो विद्यते। मेरुतन्त्रे शक्तिग्रामशिवलिंगानां विशेषरूपेण विशदवर्णनमुपलभ्यते । बौद्धसाहित्येष्वपि प्रासाद-हर्त्य-गुहा-विहार-मण्डपादीनां प्रसंगे वास्तुशास्त्रस्य वर्णनं मिलति। वराहमिहिरस्य वृहत्संहितायामपि पञ्चाध्यायाः वास्तुसम्बन्धिनः सन्ति। ज्योतिषशास्त्रदृष्ट्या वास्तुशास्त्रम् ज्योतिषशास्त्रस्य एको भागोऽस्ति अस्योल्लेखः संहिताविभागे भवतीति।

वास्तुशास्त्रीयग्रन्था: -

वास्तुशास्त्रीयग्रन्था: द्वौ श्रेण्यौ उपलभ्येते। प्रथमा विश्वकर्मापरम्परा नागररीति: वा द्वितीया मयपरम्परा द्राविणरीति: वा। विश्वकर्मापरम्पराया: प्रमुखा: ग्रन्था: सन्तिवास्तुशास्त्रम् अपराजितपृच्छा जयपृच्छा कृष्णार्णव: विश्वकर्मामत्, अपराजितप्रभा (विश्वकर्मसंहिता) आयतत्त्वम् ज्ञानरत्नकोष: वास्तुप्रकाश: वास्तुनिधि: वास्तुसंग्रह: वास्तुसमुच्चय: विश्वकर्मीय: सनत्कुमारस्य वास्तुशास्त्रम् समरांगणसूत्रधार: युक्ति-कल्पतरु: वास्तुशास्त्रबल्लभ: (राजवल्लभमण्डनम्) प्रासादमण्डनम् रूपमण्डनम् राजसिंहस्य वास्तुशास्त्रम् भुवनप्रदीप: बृहत्छिल्पशास्त्रम् मानसोल्लास: वास्तुरत्नावली, वास्तुमुक्तावली दीपार्णव: क्षीरार्णव: वृक्षार्णव: स्वर्गार्णव: परिणाममंजरी, वास्तुकौस्तुभ: कलानिधि: रत्नतिलक: सूत्रप्रतान: देव्याधिकार: शिल्पप्रकाशादय: ।।

मयपरम्पराया प्रमुखा: ग्रन्था: सन्ति- मयमतम् मानसार: चित्रलक्षणम् कश्यपशिल्पम् सकलाधिकार: वास्तुपुरुषविधानम् प्रयोगमञ्जरी प्रयोगपारिजात: शिल्प-रत्नम् शिल्पसंग्रह: शुक्रनीति: ईशानशिवगुरुदेवपद्धति: हरिभक्तिविलास: मठप्रतिष्ठा मनुष्यालयचन्द्रिका चतुर्वर्गचिन्तामण्यादय: ।।

वास्तुकोषे डॉ. प्रसन्नकुमाराचार्येणापि वास्तुशास्त्रीयनूतनग्रन्थानामेका विस्तृता सूची प्रदत्ता। येषां ग्रन्थानां सूची आचार्येणात्र संकलिता कृता ते सर्वे आधुनिकदृष्ट्या वास्तुशास्त्रस्य विचारका सन्तीति। तेषां नामानि- स्टेलाक्रेमरिश: कुमारस्वामी प्रसन्नकुमाराचार्य: वासुदेव-उपाध्याय: वासुदेवशरण-अग्रवाल: गोपीनाथराव: जितेन्द्रनाथबनर्जी रामकृष्णदास: द्विजेन्द्रनाथशुक्ल: तारावदभट्टाचार्य: मल्लाया विनयतोषभट्टाचार्य: वृन्दावनभट्टाचार्य: सरस्वती हैवेलस्मिथ मार्शललागहर्स्ट चान्दावत्स: पर्सीब्राउन श्रीनारायणचतुर्वेदी ढाके लोवरड्राविडदेश: जेम्सफगुर्सन जेम्सबर्गेस: सतीशग्रोवर: एन.एम. गांगुली देवलमिश्र: अखनजानसन: वाल्टरहेननिस्मर: यजदानी सुरेन्द्रस्टुटली एलिसबोनर: इत्यादय:।

शालाविधानम

निवासायोपयुक्तस्थानस्य चयनस्य कृते वास्तोरावश्यकता भवति। यत्र प्राणिन: मानवाश्च निवसन्ति तद् एव वास्तु:। अस्यानेक भेदा: भवन्ति। यथा- गृहम् देवालय: ग्राम: नगरम् पुरादयश्च। भारतीयचिन्तनपरम्परायां कस्मिन्नपि वास्तौ वास्तुदेवस्याराधना निवासकर्तु: सुखशान्त्यारोग्यार्थ भवति। अत्र प्रत्येक वस्तुनि पिण्डे वा देवत्वस्य परिकल्पना एव हिन्दूसंस्कृते: एका उदात्तभावना अस्ति। अस्यां संस्कृतौ साकारनिराकारौ द्वौ एव पूजाविधानौ स्त:। वैदिकसंहितानुसारं वास्तोष्पति साक्षात् परमात्मन: नामान्तरमेव यतोहि त एव विश्वब्रह्माण्डरूपिण: वास्तुनोऽधिपतय: सन्ति।

वास्तुपुरुषस्य प्रार्थना

ऋग्वेदस्य एकस्मिन वर्णनप्रसङ्गेन वास्तोष्पतेः प्रार्थनायामेका ऋचा मिलति यथा--

वास्तोस्पते प्रति जानीहयस्मान्त्स्वावेशो अनमीवो भवा नः।

यत् त्वेमहे प्रति तन्नो जुषस्य शं नो भव द्विपदे शं चतुष्पदे ।।

हे वास्तोस्पते ! अस्मान् प्रति जानीहि। नः स्वावेशः अनमीवः भवः। यत् त्वा ईमहे तत् नः प्रति जुषस्व। नः द्विपदे चतुष्पदे शं भवः।

वास्तुशास्त्रस्याचार्याः -

सहस्रवर्षेभ्यः अस्माक आचार्याः अस्य शास्त्रस्य विकासाय प्रयासरत्ता आसन्। पुराणानुसारं भुगु- अत्रि- वशिष्ट- विश्वकर्मा- मय- नारद- नग्नगित्- विशालक्ष- पुरन्दरनन्दीश- शौनक- गर्ग- वासुदेव- अनिरुद्ध- शुक्र- बृहस्पति- अश्विनीकुमारैः वास्तुशास्त्रस्य विस्तृता व्याख्या कृता। येषु बहवो वैदिका ऋषयः ।।

वास्तुशास्त्रस्य प्रभागाः -

स्थापत्यं नामोपवेदोऽत्र वास्तुशास्त्रं शिल्पशास्त्रं वेति नाम्ना प्रथितमासीत्। वास्तुशास्त्रीयाः प्रसिद्धा आचार्या शिल्पशास्त्रं वास्तुशास्त्रस्य पर्यायरूपेण स्वीकुर्वन्ति। वास्तुशास्त्रं गृहनिर्माणविषयक शिल्पशास्त्रं प्रतिमादिनिर्माणविषयकम् चित्रशास्त्रम् आलेख्यादिनिर्माणविषयकम् शास्त्रमस्तीति।।

शालाशब्दस्याभिप्रायः -

अत्र मुख्य विचारणीय विषयोऽस्ति शालाविधानम्। अत्र शालाशब्दस्याभिप्रायः सामान्यरूपेण आर्चार्येः कक्ष इति कृतः परन्तु प्रसिद्धा आचार्या शब्दस्यास्यार्थः खण्डम् प्रखण्डम् भाग इत्यपि स्वीकुर्वन्ति। सर्वेषां जनानामुपयोगार्थं येषां भवनानां निर्माणं भवति तेषां सर्वेषां निर्माणं प्रखण्डरूपेण भवति। यथा- विद्यालयभवनम्, चिकित्सालयभवनम्, व्यावसायिक भवनमित्यादयः। विन्यासे प्रखण्डस्य विन्यासः भूखण्डे कुत्र स्यादित्यत्र अयं मुख्यविचारणीयो विषयोऽस्ति। वास्तुशास्त्रे मुख्यरूपेण एकशाल- द्विशाल- त्रिशालचतुश्शालभवनानां वर्णनं मिलति। एतेषां सर्वेषां संयोजनेन पञ्चशालतः दशशालं यावत् भवनानां निर्माणं भवितुं शक्यते।

एकशालभवनम्

एकस्य शालस्याभिप्रायः प्रखण्ड कक्षः वा भवति। अतोऽस्य विन्यासः भूखण्डस्य पश्चिमे दक्षिणे वा स्यादिति वास्तुशास्त्रस्याचार्याणां मतमस्ति।

एकशालभवनानां प्रकारस्य मुख्याधारोऽलिन्दोऽस्ति। अलिन्दविन्यासेनास्य गृहस्य षोडशप्रमुखभेदा भवन्ति। अत्र गुरुः (ै) इति संकेताक्षरेण शालायाः तथा च लघुः (प्)

इति संकताक्षरेण अलिन्दस्य बोधो भवति। यथास्ति एकशालगृहेषु अलिन्दविन्यासप्रकार:

एकशालभवनानि

| क्र सं0 | गृहम् | पूर्वा | दक्षिणा | पश्चिमा | उत्तरा | अलिन्ददिशा | फलम् |
|---|---|---|---|---|---|---|---|
| 1 | ध्रुवम् | ˀ | ˀ | ˀ | ˀ | अलिन्दहीनं गृहम् | जयम् |
| 2 | धान्यम् | प् | ˀ | ˀ | ˀ | पूर्वेऽलिन्द: | धान्यम् |
| 3 | जयम् | ˀ | प् | ˀ | ˀ | दक्षिणेऽलिन्द: | जयम् |
| 4 | नन्दम् | । | प् | ˀ | ˀ | पूर्वदक्षिणयोरलिन्द: | समृद्धि: |
| 5 | खरम् | ˀ | ˀ | प् | ˀ | पश्चिमेऽलिन्द: | आयासदम् |
| 6 | कान्तम् | प् | ˀ | प् | ˀ | पूर्वपश्चिमयोऽलिन्द: | श्रीप्राप्ति: |
| 7 | मनोरमम् | ˀ | प् | प् | ˀ | दक्षिणपश्चिमोलिन्द: | मनसंतुष्टि: |
| 8 | सुमुखम् | प् | प् | प् | ˀ | पूर्वदक्षिणपश्चिमेष्वलिन्द: | राज्यसम्मानम् |
| 9 | दुर्मुखम् | ˀ | ˀ | ˀ | प् | उत्तरेऽलिन्द: | कलह: |
| 10 | क्रूरम् | प् | ˀ | ˀ | प् | पूर्वोत्तरयोरलिन्द : | क्रूरव्याधिभयम् |
| 11 | सुपक्षम् | ˀ | प् | ˀ | प् | दक्षिणोतरयोरलिन्द: | गोत्रवृद्धि: |
| 12 | धनदम् | प् | प् | ˀ | प् | पूर्वदक्षिणोतरेष्वलिन्द: | सुवर्णादिप्राप्ति: |
| 13 | क्षयम् | ˀ | ˀ | प् | प् | पश्चिमोत्तरयोरलिन्द: | सर्वक्षयम् |
| 14 | आक्रन्दम् | प् | ˀ | प् | प् | पूर्वपश्चिमोत्तरेष्वलिन्द: | मृत्युकारक: |
| 15 | विपुलम् | ˀ | प् | प् | प् | दक्षिणपश्चिमोतरेष्वलिन्द: | आरोग्य: |
| 16 | विजयम् | प् | प् | प् | प् | सर्वेषुदिक्ष्वलिन्द: | सर्वसम्पद् |

यथोत्तम् समराङ्गणेसूत्रधारे -

**ध्रुवं धान्यं जयं नन्दं खरं कान्तं मनोरमम् ।**

**सुमुखं दुर्मुख क्रूर सुपक्षं धनदं क्षयम् ।।**

**आक्रन्दं विपुलं चौव विजयं गृहमुत्तमम् ।।**

एतेषां गृहाणां यथा नामानि तथैव तेषां फलानि अपि सन्ति । यथा समराङ्गणे--

**ध्रुवे जयमवाप्नोति धान्ये धान्यागमो भवेत् ।**

**जये सपत्नाञ्जयति नन्दे सर्वाः समृद्धयः ।।**

**खरमायासदं वेश्म कान्ते च लभते श्रियम् ।**

**आयुरारोग्यमैश्वर्यं तथा वित्तस्य सम्पदः ।।**

**मनोरमे मनस्तुष्टिहभर्तुः प्रकीर्तिता ।।**

**सनुखे राज्यसम्मानं दुर्मुखे कलहः सदा ।।**

**क्रूरव्याधिभयं क्रूरे सुपक्षं गोत्रवृद्धिकृत् ।**

**अनदे हेमरत्नादि गाश्चौव लभते पुमान् ।।**

**क्षयं सर्वक्षयं गेहमाक्रन्दं ज्ञातिमत्युदम् ।**

**आरोग्यं विपुले ख्यातिर्विजये सर्वसम्पदः।।**

ध्रुवादिषोडशगृहेषु आदित एकेक विहाय धान्यादि-अष्टगृहाणाम्मुखभागे एकैकं अलिन्दं संयोज्य रम्य-श्रीधर-मुदित-बर्धमान-कराल-सुनाभ-ध्वांक्ष-समृद्धनामकानि गृहाणि भवन्ति। नामानुसारं तेषां फलमपि भवति। अनेन एषु षोडशगृहेषु षड्दारुयोजनैरपि षोडशगृहाणि भवन्ति। तानि सन्ति- सुन्दरम् वरदम् भद्रम् प्रमुदम् विमुखम् शिवम् सर्वलाभम् विशालम् विलक्षम् अशुभम् ध्वजम् उद्योतम् भीषणम् शून्यम् अजितम् कुलनन्दनम् । यथा

**सुन्दरं वरदं भद्रं प्रमोद विमुखं शिवम् ।**

**सर्वलाभं विशालं च विलक्षमशुभं शुभम् ।**

**उद्योतं भीषणं शून्यमजितं कुलनन्दनम् ।**

**नामादिवेश्मनामैषां गुणदोषान् प्रकल्पयेत् ।।**

यथैव यदि ध्रुवादिषोडशगृहेषु शालालिन्दयोर्मध्ये तिर्यकरूपेण षड्दारुसंयोजनैः हंससुलक्षण- सौम्य- जयन्त- भव्य- उत्तम- रुचिर- संभृत- क्षेम- अक्षेम- सुकृत- वृष उच्छन्न- व्यय- आनन्द- सुनन्दनामानि षोडशगृहाणि अपवरकषड्दारुयोजनैः प्रभवभ्ाािवक- क्रीड- तिलक- क्रीडन- सुख- यशोद- कुमुद - काल- भासुर- सर्वभूषण- वसुन्धर- धनहर- कुपित- वित्तवृद्धि- कुलोदयनामानि षोड़शगृहाणि, चतुर्दिक्षु अलिन्द विनियोजनभेदैः चूडामणि- प्रभद्र- क्षेम- शेखर- अद्‌भुत- विकाश- भूतिद्- हृष्ट- विरोध- कालपाशक- निराभय- सुशाल- रौद्र- मोघ- मनोरथ- सुभद्रनामानि षोडशगृहाणि तथाच शालामध्यविन्यस्तषड्दारुकल्पनाभेदैः अलंकृत- अलङ्कार- रमण- पूर्ण- अम्बर- पुण्यसगर्भ- ईप्सित- शलश- दुर्गत- रित्त- सुभद्र- वञ्चित- दीन- विभव- सर्वकामद

नामानि षोड़शगृहाणि भवन्ति। एतेषां सर्वेषां भवनानां फलं नामवदस्ति। अनेनप्रकारेण एकशालगृहस्य चतुरधिकशतभेदा: वर्णिता: सन्ति। हंसक- चक्र- सारस- कौकिल भेदसंयोजनैः एकशालगृहाणां संख्या अष्टाधिकशतम् भवति।

यथोत्तम् - **वेश्मनामेऊशालानां शतकष्टाधिक स्मृतम् ।**

द्विशालभवनानि

द्वयो: खण्डयो: कक्षयो: वा प्रभेदेन चतुर्णा गृहाणां वर्णनं प्राप्यते। एतेषां संयोजनेन अनेके भेदा: भवन्ति। शालभवनेषु चतुर्दिक्षु स्थितशालानां सर्वाधिकमहत्त्वं भवति । वास्तुशास्त्रस्य ग्रन्थेषु चतुर्दिक्षु स्थितशालानां पृथक् पृथक् नामानि भवन्ति। एताभि: शालाभि: पारस्परिकसमायोजनेनैव शालभवनानां विनियोजनं भवति। अत: चतुर्दिक्षु स्थितानां शालानां परिभाषा अधोलिखिता वर्तते । यथा

1. हस्तिनी- इयं शाला आग्नेयकोणत: आरभ्य नैऋत्यं यावद् गत्वा दक्षिणदिशि स्थितं भूत्वा उत्तराभिमुखी भवति ।।

2. महिषी- इयं शाला नैऋत्यकोणत: आरभ्य वायव्यकोणं यावद् गत्वा पश्चिमे पूर्वाभिमुखी भवति।

3. गावी- इयं शाला वायव्यकोणत: आरभ्य ईशानकोणं यावद् गत्वा उत्तरे स्थितं भूत्वा दक्षिणाभिमुखी भवति।

4. छागी- इयं शाला ईशानत: आरभ्य अग्निकोणं यावद् गत्वा पूर्वदिशि स्थितं भूत्वा पश्चिमाभिमुखी भवति।।

येषु चतुषु द्वयो: द्वयो: योगेन षट्द्विशालगृहानां निर्माणं भवति। यथा

1. सिद्धार्थम्,

2. यमसूर्यम्

3. दण्डम्

4. वातम्

5. काचम्

6. चुल्ली

यथोत्तमाचार्येण -

**सिद्धार्थं यमसूर्यं च दण्डाख्यं वातसंज्ञितम्।**

**चुल्ली काचं च मुख्यानि द्विशालानि षडेव हि।।**

1. सिद्धार्थम् इदं शुभकारकम् द्विशालगृहं हस्तिनी-महिषी शालयोः योगेन भवति।

**हस्तिनी महिषी चेति हे शाले मात्र बेश्मनि**

**तत् सिद्धार्थीमति ज्ञेयं वित्तसम्पत्तिकारकम् ।।** स.सू 22/07

पुनश्च

**सिद्धार्थ तु भवेच्छुभ्रं यामयापरयुतं यदि।**

2.यमसुर्यम्- इदं कष्टकारकम् द्विशालगृहं गावी-महिषी शालयोः योगेन भवति।

**मृत्युदं महिषीगावीभ्यां भवेद् यमसूर्यकम् ।** स.सू 22/08

पुनश्च

**पश्चिमोत्तरसंयुत्तं यमसूर्य तु मृत्युदम्।।**

3. दण्डम्- इदं दण्डकारकम् द्विशालगृहं गावी-छागी शालयोः योगेन भवति।

दण्ड स्याच्छगलीगावीशालाभ्यां दण्डभीतिदम् । स.सू 22/08

पुनश्च

उदकपूर्वयुतं यत् स्यात् दण्डाख्यं दण्डकारकम्।

4 वातम्- इदं क्लेशकारकम् द्विशालगृहं छागी-हस्तिनीशालयोः योगेन भवति।

वातं करेणुच्छागलीयुत्तमुद्वेगकारकम् । स.सू 22/09

पुनश्च

पूर्वयाम्ययुतं ज्ञेयं वाताख्यं कलहप्रियम्।

5.चुल्ली- इदं संतापकारकम् द्विशालगृहं महिषी-छागीशालयोः योगेन भवति।

महिष्यजाभ्यामुद्वेगकरी चुल्ली धनापहा।। स.सू 22/09

पुनश्च

पूर्वापरयुतं गेहं चुल्लीनामार्थ नाशकृत्।

6.काचम्- इदं बन्धुद्वेषकारकम् द्विशालगृहं गावी-हस्तिनीशालयोः योगेन भवति।

काचं करेणुगावीभ्यां सुहृत्यप्रीतिविनाशनम् ।          स.सू 22/010

पुनश्च

दक्षिणोत्तरशालाढ्यं काचसंज्ञ विरोधकृत् ।।

उपर्युत्त द्विशालगृहेषु सिद्धार्थ द्विशालगृहं विहाय सर्वाणि गृहाणि अशुभानि भवन्ति। द्विशालगृहेषु यदि द्वयोः शालयोः द्वारं एकस्यां दिशि स्यात् तर्हि तेषाम् अपि चत्वारः भेदा भवन्ति। यथा -

सन्ततीदिशालगृहम् - इदं गृहं द्वयोः हस्तिनीशालयोः योगेन भवति।

शान्तिदद्विशालगृहम् - इदं गृहं द्वयोः महिषीशालयोः योगेन भवति।

वर्धमानद्विशालगृहम् - इदं गृहं द्वयोः गावीशालयोः योगेन भवति।

कुक्कुटद्विशालगृहम् - इदं गृहं द्वयोः छागीशालयोः योगेन भवति।

नामान्यतः सन्ततः शान्तिदं च स्यात् बर्धमानं त्वथ कुक्कुटाख्यम्।

हस्त्यादितो नाम चतुष्टयं च ह द्विशाल प्रथमं तथैव ।।     -वा.सा.8/27

अनेन प्रकारेण द्विशालगृहाणि द्विपञ्चाशत् संख्यकानि भवन्ति। यथा -

द्विशालानि द्विपञ्चाशत् स्युः शुभान्बशुभानि च।

लक्षणनि क्रमात् तेषां इदानीं सम्प्रचक्ष्महे।

त्रिशालभवनानि

भूखण्डस्य त्रिषु दिक्षु गृहस्य निर्माणमेव त्रिशालभवनं त्रिशालगृहं वा भवति। एतेषां त्रिशालगृहाणां चत्वारः भेदाः वर्णिताः सन्ति। यथा -

1. हिरण्यत्रिशालभवनम् ।

2. सुक्षेत्रत्रिशालभवनम्

3. चुल्लीत्रिशालभवनम्

4. पक्षघ्नत्रिशालभवनम्

ऐतेषां सर्वेषां वर्णनं प्रायः सर्वेषु वास्तुशास्त्रग्रन्थेषु मिलति। यथा -

मुख्यानि तेषु चत्वारि कथ्यन्ते तानि नामतः।

हिरण्यनाभं सुक्षेत्रं चुल्ली पक्षघ्नमेव च।।

1. हिरण्यत्रिशालभवम्- हिरण्यनामक त्रिशालगृहम् उत्तरशालया हीनं भवति। इदम् त्रिशालगृहम् शुभफलकारकं भवति।

2, सुक्षेत्रत्रिशालभवनम् - सुक्षेत्रनामक त्रिशालगृहम् वृद्धिकारकम् भवति। अस्मिन् त्रिशाले प्राच्यां शाला न भवति।

3. चुल्लीत्रिशालभवनम्- चुल्लीनामके त्रिशाले दक्षिणस्यां दिशि शाला न भवति। इदं त्रिशालगृहम् धनार्थप्राणनाशकारकं भवति।

4. पक्षघ्नत्रिशालभवनम्-पक्षघ्ननामके त्रिशाले पश्चिमदिशि शाला न भवति। अस्य फलं अपि अशुभं भवति। विशेषरूपेण सन्ततिपक्षस्य कृते त्रिशालगृहमिदं हानिकारक भवति।

यथोत्तम्

शस्तं हिरण्यनाभाख्यं हीनं चोत्तरशालया।
सुक्षेत्र पूर्वतो हीनं शालया वृद्धिदं मतम्।।
चुल्ली दक्षिणया हीनं धनार्थ प्राणनाशनम्।
यत् स्याद्परयाहीनं पक्षघ्नं तत् सुतान्तकृत्।।

प्रतित्रिशालस्य अष्टादश उपभेदा अपि भवन्ति। अनेन सर्वेषां त्रिशालानां द्वि-सप्ततिभेदा भवन्ति। यथा

अथ द्वासप्ततेर्ब्रूमस्त्रिशालानां यथाक्रमम् ।

अभिधानानि कात्स्न्र्येन लक्षणानि पृथक्-पृथक् ।।

चतु:शालभवनानि -

भूखण्डस्य चतुषु दिक्षु शालानां प्रखण्डानां गृहस्य वा निर्माण एव चतु:शालाभवनं भवति। अस्य चतु:शालाभवनस्य पञ्चप्रमुखा भेदा: वास्तुनाम्ना व्यवहृयन्ते। यथा -

1. सर्वतोभद्रवास्तु

2. नन्द्यावर्त्तवास्तु

3. वर्धमानवास्तु

4. स्वस्तिकवास्तु

5. रूचकवास्तु

1. सर्वतोभद्रवास्तु

यस्य चतुसृषु दिक्षु अलिन्दा द्वाराणि च भवन्ति तस्य नाम सर्वतोभद्रवास्तु भवति । इदं वास्तु देवानां नृपाणां विबुधसमूहानां कृते उपयुत्तो भवति ।।

**प्रतिसिञ्चालिन्दं समन्ततो वास्तु सर्वतोभद्रम् ।**

**नृपतिबुधसमूहानां कार्य द्वारैश्चतुर्भिरपि ।।**

सर्वतोभद्रम्

प्ड।ळमै्

2. नन्द्यावर्तनास्तु

शालाभित्तेरारभ्य प्रदक्षिणान्तर्गतैरलिन्दैनन्द्यावर्त नाम वास्तु भवति। प्रदक्षिण्येनान्तं ये गता अलिन्दास्तैरूपलक्षितै:। चतसृषु शालासु शालाप्रदक्षिणान्तर्गतास्तत्रालिन्दा भवन्ति। अस्मिन् नन्द्यावर्तिनि पश्चिमद्वारं विहाय शेषाणि त्रीणि द्वाराणि पूर्वदक्षिणोत्तराणि कार्याणि । यथोत्तं वराहेण

नन्द्यावर्तमलिन्दैः शालाकुड्यात् प्रदक्षिणान्तगतैः ।।

द्वारं पश्चिममस्मिन् विहाय शेषाणि कार्याणि ।।।

पुनः गर्गेणोत्तम्

प्रदक्षिणां गतैः सर्वैः शालाभित्तेरलिन्दकैः ।

विना परेण द्वारेण नन्द्यावर्तमिति स्मृतम् ।।

नन्द्यावर्तम्

प्ड।ळमै्

3. वर्धमानवास्तु

अस्य वास्तुनः यद् द्वारं तत्र यः अलिन्दः स द्वारालिन्दः । स चान्तगतः कार्यः दक्षिणोत्तरशालासंलग्नः इत्यर्थः । अन्यो द्वितीयः अलिन्दः प्रादक्षिण्येन गतः स च शोभनः । ततः चान्यस्तस्मात् प्रदक्षिणादन्तर्गत एव । एवं विधैरलिन्दैरुपलक्षितं वर्धमानवास्तु । वर्धमाने दक्षिणं द्वारं न कार्यम् । अन्यानि त्रीणि द्वाराणि पूर्वपश्चिमोत्तराणि कार्याणि । यथोत्तं वराहेण

द्वारालिन्दोऽन्तगतः प्रदक्षिणो न्यः शुभस्ततश्चान्यः ।

तस्मिंश्च वर्धमाने द्वारं तु न दक्षिण कार्यम् ।।

पुनश्च गर्गेणोत्तम् -

द्वारालिन्दो न्तगस्तेषां ये त्रयो दक्षिण गताः ।

विहाय दक्षिणं द्वारं वर्धमानमिति स्मृतम् ।।

वर्धमानम्

प्ड।ळमै्

4. स्वस्तिकवास्तु

स्वस्तिके पश्चिमः अलिन्दः अन्तगतः कार्यः दक्षिणोत्तरशालासंलग्नः । अन्यौ तु दक्षिणोत्तरौ द्वौ अलिन्दौ पश्चिमालिन्दादुत्पन्नौ पूर्वस्यां दिश्यन्तगतौ शालासंलग्नौ कार्यौ। अथ चतुर्थ पूर्वालिन्दः दक्षिणोत्तरद्वयोरलिन्दयोर्मध्ये कार्यः । अस्मिन् वास्तुनि केवलं प्राग्द्वारं शुभदं भवति । यथोत्तं वराहेण

अपरोऽन्तगतोऽलिन्दः प्रागन्तगतौ तदुत्थितौ चान्यौ ।

तद्वधिविधृतश्चान्यः प्राद्वारे स्वस्तिके शुभदम् ।।

स्वस्तिकम्

प्ड ।ळमै

5. रुचकवास्तु

रुचके पूर्वापरौ द्वौ अलिन्दौ दक्षिणोत्तरशालासंलग्नौ कार्यौ । शेषौ द्वौ तयोः मध्ये संलग्नौ कार्यौ इत्यर्थः । रुचके द्वारमुत्तरे न शुभदं भवति । अन्यानि पूर्वपश्चिमदक्षिणद्वाराणि शस्तानि भवन्ति । यथोत्तं वराहेण

प्राक्पश्चिमावलिन्दावन्तगतौ तदवधिस्थितौ शेषौ ।

रुचके द्वारं न शुभदनुत्तरतोऽन्यानि शस्तानि ।।

रूचकम्

प्ड ।ळमै

सर्वेषां वर्णानां कृते नन्द्यावर्तवर्धमानसंज्ञकौ श  ुभौ श्रेष्ठौ वा भवत:।

स्वस्तिकरूचके मध्यमे शुभफलदायके भवत:। शेषं सर्वतोभद्रं केवलं देवनृपादीनां कृते शुभफादायकं भवति। यथोक्तं वराहेण

श्रेष्ठं नन्द्यावर्त सर्वेषां वर्धमानसंज्ञ च।

स्वस्तिकरूचके मध्ये शेष शुभदं नृपादीनाम्।।

दशशालभवनेषु मुख्यरूपेण पूर्वोक्ता: चत्वार: एव भेदा: मुख्या: सन्ति। अन्ये षड्भेदा: चुतुर्णा शालभवनानां पारस्परिकसंयोजनैरेव निर्मिता: भवन्ति। यथा

पञ्चशालभवनानि

पंचशाले

1. द्विशालत्रिशालयो संयोग:।

2. एकशालचतु:शालयो: संयोग:।

षष्टशालभवनानि

षष्टशाले

1. एकद्वित्रिशालानां संयोग: ।।

2. त्रित्रिशालयो: संयोग: ।

3. द्विशालचतुश्शालयो: संयोग: ।

सप्तशालभनानि

सप्तशाले

1. एकद्विद्विशालानां संयोग: ।।

2. त्रिचतुश्शालयो: संयोग: ।।

3. एकद्विचतुश्शालयो: संयोग: ।

अष्टशालभवनानि

अष्ट्रशाले

1. चतुश्चतुश्शालयो: संयोग: ।।

2. द्वित्रिशालानां एकद्विशालानां च संयोग: ।

4. एकद्वित्रिशालानां द्विशालानां च संयोग:।

नशालभवनानि

नवशाले

1. एकशालद्विचतुश्शालाना सयोग: ।

2. त्रित्रिशालानां संयोग: ।

3. एकचतुश्शालद्वित्रिशालानां संयोग:।

दशीलभदनानि

दशशाले

1. एकद्विशालद्विचतु:शालानां संयोग:।

2. एकैकशालत्रित्रिशालानां संयोग: ।।

3.एकचतुश्शालद्वित्रिशालानां संयोग: ।

अनेन प्रकारेण शालभवनानां संख्या प्रभूता: भवन्ति ।

## २.२ उपहार

भारतीयं वास्तुशास्त्रं सर्वाधिक प्राचीनं शास्त्रमस्ति। अस्मिन्नैव शास्त्रे सर्वविध्ानिर्माणस्य समाहारो भवति। प्राचीन भारते वास्तुशास्त्रस्य दृष्टिकोणं व्यापकमासीत् अनेनैव कारणेनास्य शास्त्रस्य समाहारोऽथर्ववेदस्योपवेद वेदांगेषु च ज्योतिषशास्त्रस्य संहितास्कन्धेऽभवत्। कस्याऽपि पिण्डस्य वस्तुनश्च इष्टानिष्टे: पूर्वानुमानमेव ज्योतिष-शास्त्रस्य मुख्योद्देश्योऽस्ति । मानव: किमस्ति ? किम् मानवस्य शरीरमेव मानवोऽस्ति ? न हि मानवस्तु शरीरे निवसति। अत: कथितुं शक्यते यत् मानवस्तु पार्थिवापार्थिवयो: समिश्रणमस्ति तथैव गृहमपि केवलं पाषाणमृतिकादिभि: निर्मितं पिण्डं नास्ति। वस्तुतस्तु गृहमपि पार्थिवापार्थिवयो: समिश्रितरूपोऽस्ति। वास्तुशास्त्रे मुख्यरूपेण सुखमयजीवनस्य विचारो भवति। अयं पार्थिवापार्थिवरूपमानव: कस्मिन् पार्थिवापार्थिवरूपगृहे निवसेत् येन पुरुषार्थचतुष्टयस्य सिद्धि: स्यादिति वास्तुशास्त्रस्य विचारणीय: विषयोऽस्ति। वास्तविकरूपेण समग्रविश्वोऽयं वास्तुज्योतिषशास्त्रयो: चिन्तनस्य प्रतिफलमेवास्ति यतो हि अणुपरमाण्वो: संमिश्रणेनैव वस्तुन: पिण्डस्य वा निर्माणं भवति। वस्तुन: नि-र्माण निर्माणप्रक्रिया च वास्तुशास्त्रमेवास्ति। परमाणुभ्य: अणो: अणुभ्य: दृश्यजगत: निर्माणं कस्मिन् कालेऽभवदिति विचारणीयविषयोऽस्ति। अत: कथितुं शक्यते यत् अणो: वास्तुशास्त्रस्य क्षणात् ज्योतिषशास्त्रस्य शुभाशुभत्वस्य चिन्तनं भवतीति ।। वास्तुशास्त्रस्य ऐतिहासिकवर्णनं दृष्ट्वा ज्ञानं भवति यत् वास्तुशास्त्रं प्राचीनतम शास्त्रं वर्तते । आदिकाले शास्त्रस्यास्य नाम स्थापत्यमासीत्। तदन्तरं उत्तरोत्तरमस्य विकास: जात:। अर्थववेदस्योपवेदस्य स्थापत्यवेदस्य विकास: वैदिककालादेवारभ्यते । सृष्टे-रारम्भकाल एव वास्तुशास्त्रस्यारम्भकालोऽस्ति। सर्वप्रथमं कस्यापि जीवनस्य कृते आश्रयस्यावश्यकता भवति। विना आश्रयेण मानव: किमपि न कर्तुं शक्यते। अस्माकं वास्तुशास्त्रीयपरम्परातीवोदात्तोत्कर्षा च वर्तते। अत: वास्तुशास्त्रस्यैतिहासिकज्ञानं सर्वेषां कृते आवश्यकमस्तीति। एकखद्विखत्रिखचतुश्शालानां परस्परविन्यासै: षट् शालत: दशशालं यावत् भवनानां वर्णनं प्राचीनग्रन्थेषु मिलति । अनेन असंख्यानि गृहाणि भवन्ति। प्रत्येक शाले कियन्मितानि भवनानि विर्निमितानि भवन्तीति सराङ्गणसूत्रधारे मिलति ।❖❖❖

**अध्याय : 3**

# ज्योतिष:

## ३.० प्रस्तावना

राशी: भावान् ग्रहाञ्च आधारीकृत्य फलितज्योतिषशास्त्रस्य प्रवृत्ति: इति विपश्चित प्रतिपत्ति:। शुभाशुभफलविषयिणी ज्ञप्ति: एतेषां त्रयाणामध्ययनेनैव प्रवर्तते। राश्यश्च चर्चिता:। द्वादशभावविषयकवर्णनमपि सञ्जातम्। इदानीं ग्रहविषयिणी चर्चा क्रियते। ग्रहाणां पूर्णपरिचयानन्तरमेव कस्मिन्नपि जन्माङ्गे ग्रहाणां शुभाशुभफलं ज्ञातुं शक्यते। अत: सर्वप्रथम जन्माङ्गे ग्रहस्य स्थिति: विचार्यते। विचारणीयो ग्रह: स्वराशौ, स्वोच्च-राशौ, मूलत्रिकोणराशौ, नीचराशौ, शत्रुराशौ वा विषया इमे महत्त्वपूर्णा: सन्ति। अत: फलकथनात् पूर्वमेव ग्रहस्य स्थिति: विचार्यते। पुनरपि ग्रहस्य अंशात्मक मानं किम्? अंशात्मकमानेन षड्वर्गेषु ग्रहस्थिति: ज्ञायते। विविधेषु भावेषु राशिषु च स्थित्यानुसारं ग्रहाणां शुभाशुभफलमपि परिवर्त्यते। यथा एक एव जन: स्वगृहे, मित्रगृहे, शत्रुगृहे, देवगृहे वा भिन्न-भिन्नरीत्या व्यवहरति तथैव स्वोच्च-नीच-मित्र-शत्रु-मूलत्रिकोणराशौ वा स्थित्यानुसारं गहाणां फलेऽपि भेदो भवति। यथा चन्द्र: कर्कराशौ यत् फलं ददाति, वृश्चिकराशौ तद् फलं न ददाति। अष्टमस्थचन्द्रस्य फलं भिन्नं, नवमस्थचन्द्रस्य फलं भिन्नं भवति। गुरुयुतचन्द्रस्य फले अथवा शनियुतचन्द्रस्य फलेऽपि साम्यं न दृश्यते। पाठ्यां-शेऽस्मिन् ग्रहपरिचय:, ग्रहाणामुच्च-नीच-राशय:, ग्रहाणां मूलत्रिकोणराशयश्च वर्ण्यन्ते।

## ३.१ ग्रहपरिचय:

सूर्य- चन्द्र- भौम- बुध- गुरु- शुक्र- शनयश्च सप्तग्रहा: मेषादीनां द्वादशराशीनां स्वामिन:। सिंहस्याधिपति: सूर्य:, चन्द्र: कर्कस्याधिपति:, मेषवृश्चिकयो: स्वामी भौम:, कन्यामिथुनयो: स्वामी बुध:, धनुमीनयो: बृहस्पति:, तुलावृषयो: स्वामी शुक्र:, शनि: मकरकुम्भयोश्च स्वामी वर्तते। एषां ग्रहाणामुच्चराशय: नीचराशय:, मित्रराशय:, शत्रुराशय:, मूलत्रिकोणराशयश्च भवन्ति। तत्सर्वं वर्ण्यते-

**ग्रहाणामुच्चस्थानानानि**

मेष- वृष- मकर- कन्या- कर्क- मीन- तुलाराशय: यथाक्रमं सूर्य- चन्द्र- भा-ैमबुध- गुरु- शुक्र- शनीनां ग्रहाणामुच्चराशय: सन्ति। सूर्य: मेषराशौ उच्चसंज्ञक: परञ्च मेषस्यादिन्तमे दशमे अंशे परमोच्चसंज्ञक:। चन्द्र: वृषराशौ उच्चसंज्ञक: परञ्च

वृषस्यादिन्तमे तृतीये अंशे परमोच्चसंज्ञक:। भौम: मकरराशौ उच्चसंज्ञक: परञ्च मकरस्य अष्टाविंशे अंशे परमोच्चसंज्ञक:। बुध: कन्याराशौ उच्चसंज्ञक: परञ्च कन्याया: पञ्चदशे अंशे परमोच्चसंज्ञक:। बृहस्पति: कर्कराशौ उच्चसंज्ञक: परञ्च कर्कस्य पञ्चमे अंशे परमोच्चसंज्ञक:। शुक्र: मीनराशौ उच्चसंज्ञक: परञ्च मीनस्य सप्तविंशे अंशे परमोच्चसंज्ञक:। शनि: तुलाराशौ उच्चसंज्ञक: परञ्च तुलाराशे: विंशे अंशे परमोच्चसंज्ञको भवति। तद्यथा

अजवृषमृगाङ्गनाकर्किमीनवणिजांशकेष्विनाद्युच्चा:।
दशशिख्यिष्टाविंशतितिथीन्द्रियत्रिनवविंशेषु।।

**ग्रहाणां नीचस्थानानि**

तुला वृश्चिक- कर्क- मीन- मकर- कन्या- मेषराशय: यथाक्रमं सूर्य- चन्द्रभौम- बुध- गुरु- शुक्र- शनीनां ग्रहाणां नीचराशय: भवन्ति। सूर्यादीनां ग्रहाणां स्वोच्चराशे: सप्तम: राशि: नीचसंज्ञको भवति। तद्यथा

"उच्चान्नीचं सप्तममर्कादीनाम्''

सूर्यादयो ग्रहा: यथा मेषादीनां दशमादिषु भागेषु परमोच्चसंज्ञका: भवन्ति तथैव तुलादीनां दशमादिषु भागेषु परमनीचसंज्ञका: भवन्ति। सूर्य: तुलाराशे: दशमे अंशे परमनीचसंज्ञको भवति। चन्द्रो वृश्चिकस्य तृतीये अंशे परमनीचसंज्ञक:। भौम: कर्कस्य अष्टाविंशे अंशे परमनीचसंज्ञको वर्तते। बुध: मीनस्य पंचदशे अंशे परमनीचसंज्ञक:। बृहस्पति: मकरस्य पंचमे अंशे परमनीचसंज्ञको भवति। शुक्र: कन्याराशे: सप्तविंशे अंशे परमनीचसंज्ञको वर्तते। शनि: मेषस्य विंशे अंशे परमनीचसंज्ञको भवति। चक्रं यथा

**उच्चनीचबोधकचक्रम्**

| ग्रह: | उच्चराशि: | परमोच्चाश: | नीचराशि: | परमनीचांश: |
|---|---|---|---|---|
| सूर्य: | मेष: | 100 | तुला | 100 |
| चन्द्र: | वृष: | 30 | वृश्चिक: | 30 |
| भौम: | मकर: | 280 | कर्क: | 280 |
| बुध: | कन्या | 150 | मीन: | 150 |
| गुरु: | कर्क: | 50 | मकर: | 50 |
| शुक्र: | मीन: | 270 | कन्या | 270 |
| शनि: | तुला | 200 | मेष: | 200 |

जन्माङ्ग, प्रश्नलग्ने, मुहूर्तलग्ने वा ग्रहाः स्वोच्चराशौ प्रशस्ताः शुभाश्च, नीचराशौ निर्बला अशुभाश्च मन्यन्ते। एत एव ग्रहाः स्वपरमोच्चांशे परमप्रशस्ताः भवन्ति। परमन्ीचांशे परमनिर्बलाः अशुभफलदाश्च कथ्यन्ते। जन्माङ्गे यो ग्रहः स्वपरमोच्चांशे भवति तस्य ग्रहस्य दशा सम्पूर्णसंज्ञका। सम्पूर्णसंज्ञकायां दशायां ग्रहः पूर्णतः शुभं फलति। सम्पूर्णा दशा अत्यन्तशुभा मन्यते। स्वोच्चराशौ स्थितस्य ग्रहस्य दशा पूर्णा कथ्यते। इयं दशाऽपि शुभफलदा। एवमेव स्वनीचराशौ परमनीचांशे वा स्थितस्य ग्रहस्य दशा अशुभफलदा भवति।

इदानीं मनसि शङ्का उत्पद्यते यत् यदि कोऽपि ग्रहः परमोच्चांशेऽपि नास्ति, परमनीचांशेऽपि नास्ति तर्हि फलकथनस्य कः विशिष्टः क्रमः? वराहमिहिराचार्यः शामिमां निवारयितुमारोहावरोहभेदेन ग्रहाणां भेदद्वयं विदधाति। परमनीचांशात् 180 परमोच्चांशं यावत् ग्रहस्य संज्ञा आरोही विहिता। आरोहिग्रहो नीचांशात् परमोच्चं प्रति गच्छन् भवति। अस्य ग्रहस्य दशार्तदशा शुभफलदा कथिता। परमोच्चांशात् परमनीचे प्रति गच्छतः ग्रहस्य अवरोही क्रमो भवति। अत एव सोऽवरोही ग्रहः कथ्यते। अस्य ग्रहस्य दशान्तर्दशा अशुभफलदा भवति। तद्यथा

भ्रष्टस्य तुङ्गादवरोहि संज्ञा

मध्य भवेत्सा सुहृदुच्चभांशे।

आरोहिणी निम्नपरिच्युतस्य,

नीचारिभांशेष्वधमा भवेत्सा।।

ख ग्रहाणां मूलत्रिकोणस्थानानि

सूर्यादिग्रहाणां सिंहादयो मूलत्रिकोणस्थानानि भवन्ति। जन्माङ्गे मूलत्रिकोणस्था ग्रहाः शुभफलदायकाः भवन्ति। कदाचित् एक एव राशिः अंशभेदेन कस्यापि ग्रहस्य मूलत्रिकोणराशिः, स्वराशिः, उच्चराशिर्वा भवितुमर्हति। यथा कन्याराशिः पंचदशांशं यावत् । बुधस्य उच्चराशिर्भवति। अस्य एव राशेः पञ्चदशांशात् पंचविंशत्यंशं यावत् बुधस्य मूलत्रिकोणम् । ततः परं त्रिंशदंशं यावत् च बुधस्य स्वराशिः कथ्यते। एवमेव सिंहस्य प्रथमादेशाद् विंशं अंशं यावत् सूर्यस्य मूलत्रिकोणम्। वृषस्य तृतीयात् अंशाद् त्रिंशदंशं यावत् । चन्द्रस्य मूलत्रिकोणं भवति। मेषस्य प्रारम्भात् द्वादशं अंशं यावत् भौमस्य मूलत्रिकोणं निगदितम्। धनुराशेः आरम्भात् विंशं अंशं यावत् बृहस्पतेः मूलत्रिकोणं कथितम्। तुलाराशेः

प्रारम्भात् विंशं अंशं यावत् शुक्रस्य मूलत्रिकोणं वर्णितम्। कुम्भस्य आरम्भात् विंशं अंश यावत् शनेः मूलत्रिकोणं गदितम् तद्यथा

त्रिकोणसंज्ञानि सिंहवृषाजप्रमदा-कार्मुकभृत्तौलिकुम्भधरा।

इमानि त्रिकोणस्थानानि शुभानि भवन्ति। मूलत्रिकोणस्थो ग्रहः शुभफलकरो भवति। तस्य ग्रहस्य शुभत्वं स्वराशिस्थ ग्रहादप्यधिकं मन्यते। अत एव मूलत्रिकोणस्थाः ग्रहाः प्रशस्ताः मन्यन्ते। चक्रेण ज्ञायते।

मूलत्रिकोणबोधकचक्रम्

| ग्रहः | उच्चराशिः | | परमोच्चाशः | | नीचराशिः |
|---|---|---|---|---|---|
| सूर्यः | मेषः | 00-200 | सिंहः | 200-300 | सिंहः |
| चन्द्रः | वृषः 00-30 | 3-300 | वृषः कर्कः | | |
| भौमः | मकरः | 00-120 | मेषः | 120-300 | मेषः |
| बुधः | कन्या 00-150 | 150 -250 | कन्या | 250 -300 | कन्या |
| गुरुः | कर्कः | 00-200 | धनुः | 200-300 | धनुः |
| शुक्रः | मीनः | 00-200 | तुला | 00-200 | तुला |
| शनिः | तुला | 00-200 | कुम्भः | 200-300 | कुम्भः |

राहुकेतोः परिगणनं वराहमिहिरेण ग्रहेषु न कृतम् अत एव द्वयोरपि मूलत्रिकोणउच्च-नीचविषयिणी चर्चाऽपि वराहमिहिरस्य ग्रन्थेषु नैवोपलभ्यते परञ्च ज्योतिषशास्त्रस्य केचन् आचार्याः राहुकेतोः गणनाऽपि ग्रहेषु कुर्वन्ति। तन्मतानुसारं मेष-वृष-कर्कराशिषु राहुः प्रशस्तः। यथोत्तं सारावलीकारेण

अज- वृष- कर्कि- विलग्ने रक्षति राहुः समस्तपीडाभ्यः।
पृथ्वीपतिः प्रसन्नः कृतापराधं यथा पुरुषम् ।।

**ग्रहाणां आत्मादिविभागकथनम्**

"यत् पिण्डे तत् ब्रह्माण्डेश्श् अथवा विपर्ययेण यद् ब्रह्माण्डे तत्पिण्डेश्श् सिद्धान्तेनानेन जीवात्मब्रह्माण्डयोः साम्यत्वमभिव्यज्यते। अक्ष्णोः, मुखस्य, श्रवणेन्द्रियस्य, नसः, हस्तयोः, पदोश्च समुदितरूपमेव शरीरं कथ्यते। तथैव सूर्यचन्द्रमसां, नक्षत्राणाञ्च समुचितमेव कालपुरुषस्य शरीरमिति। विष्णुपुराणेऽपि ग्रहनक्षत्रादीनां भगवता विष्णुना अवयव-अवयवित्वमिति वर्णितम्। मनुष्यस्य शरीरे यत् स्थानं आत्मनः वर्तते तदेव स्थान कालपुरुषस्य शरीरे सूर्यो भजति। यथोत्तं वेदेऽपि-

''सूर्यात्मा जगतस्तस्थुषश्च'' एवमेव चन्द्रः कालपुरुषस्य मनः वर्तते। यथोत्तम्'चन्द्र-मा मनसो जातःश्श् भौमः कालपुरुषस्य बलं वर्तते। बुधो वाणी, जीवः कालपुरुषस्य

ज्ञानं सुखञ्च, शुक्रो वीर्य, शनि: कालनरस्य दु:खं वर्तते।

'आत्मा रवि: शीतकरस्तु चेत:

सत्त्वं धराज: शशिजोऽथ वाणी।

ज्ञानं सुखं चेन्द्रगुरुर्मदश्च

शुक्र: शनि: कालनरस्य दु:खम्।।

आत्मादिबोधकचक्रम्

| | |
|---|---|
| सूर्य: | आत्मा |
| चन्द्र: | मन: |
| भौम: | सत्वं |
| बुध: | वाणी |
| गुरु: | ज्ञानं सुखञ्च |
| शुक्र: | मद: |
| शनि: | दु:खम् |

**अत्मादीनां बलाबलम्**

कालपुरुषस्य आत्मादिभूतानां सूर्यादीनां बलाबलं विचार्यते। सूर्य: कालपुरुषस्य आत्मा वर्तते। कस्यापि जन्माङ्गे सूर्यो बली भवेच्चेत् तस्य मनुष्यस्य आत्माऽपि बलयुतो भवति। सूर्यस्य बलाबलेन तस्य मनुष्यस्य आत्मविश्वासो निर्णीयते। बलिना सूर्येण मनुष्यस्य आत्मविश्वासो वर्धते। एवमेव सूर्यस्य बलहीनता मनुष्ये आत्म-विश्वासस्य हीनतां द्योतते। चन्द्र: मनस: कारकोऽस्ति। बलिना चन्द्रेण मनुष्यस्य मानसिक बलमपि वर्धते। चन्द्रस्य बलहीनता मनुष्ये मानसिकबलस्य हीनतां द्योतते। एतादृश: जन: सर्वेषु कार्येषु द्वन्द्वयुतो भवति। तस्मिन् जने निर्णयात्मकक्षमताया अभावो भवति। भौम: सत्त्वकारकोऽस्ति। सत्त्वशब्दस्यार्थो भवति पराक्रम:। अत: बलिना भौमेन मनुष्यस्य सत्त्वं वर्धते। भौमस्य बलहीनता मनुष्यस्य पराक्रमं नाशयति। सो जनो दीर्घसूत्री भवति। सत्त्वयुतजन: सिंहवत्कार्याणि सम्पादयति। बुधो वाण्या: कारकोऽस्ति। कालपुरुषस्य शरीरे बुध एव वास्थाने राजते। बलिना बुधेन मनुष्यो वाग्मी भवति। बलहीनेन बुधेन मनुष्ये वाग्दोषा: जायन्ते। बृहस्पति: ज्ञानसुखयो: कारकोऽस्ति। बलिना वृहस्पतिना मनुष्यस्य ज्ञानं सुखञ्च वर्धते। वृहस्पते: बलहीनता ज्ञानसुखयो: नाशं करोति। यदि कस्यापि जन्माङ्गे बुधो बलयुत: बृहस्पतिश्च निर्बलस्तदा सो जन: प्रगल्भस्तु भवति परञ्च

पण्डितो न भवति। जीवो यदि बली बुधश्च निर्बलस्तदा सो जनः ज्ञानवान् परञ्च वाग्मी न भवति अर्थात् सर्वं ज्ञात्वाऽपि वत्तुं न पारयति। आङ्ग्लभाषायां (म्गचतमेपदह च्वूमत) उपस्थापनकौशलं तस्य पार्वे न भवति। शुक्रः कामस्य प्रतीकोऽस्ति। बलिना शुक्रेण मनुष्यस्य कामशत्तिः वर्धते। बलहीनेन शुक्रेण मनुष्यस्य शरीरे कामरोगा उत्पद्यन्ते। शनिः कालनरस्य दुःखमस्ति। सूर्य-चन्द्र-भौम- बुध- गुरु- शुक्रादयः ग्रहाः बलिनः भवन्ति चेत् मनुष्याणां शरीरे आत्मादयः कारकोऽपि बलिनो भवन्ति। शनेः विपरीतं फलमुत्तम्। सर्वे ग्रहाः स्वकारकानां वृद्धिकराः भवन्ति परञ्च शनेः बलं दुःखस्य हानि करोति। बलहीनेन शनिना मनुष्यस्य दुःखं वर्धते। तद्यथा

आत्मादयो गगनगैर्बलिभिर्बलवत्तराः।

दुर्बलैर्दुर्बला ज्ञेया विपरीतः शनिः स्मृतः।।

**ग्रहाणां नृपत्वादिकथनम्**

कालपुरुषस्यावयविनो सूर्यादय आत्मादिभूता अवयवाः। सूर्यादीनां ग्रहाणां नृपत्वमेवं निरूपितमाचार्येण। लोके यथा नृप- सचिव- भृत्यादयः दृश्यन्ते तथैव ग्रहेष्वपि नृप- सचिवभृत्यादयः भवन्ति। ग्रहेषु सूर्यचन्द्रमसौ राजानौ मन्येते। केषाञ्चन् आचार्याणां मतानुसारं सूर्यो नृपः, चन्द्रः तस्य भार्या परञ्च वराहमिहिराचार्यस्य मतमस्ति यत् सूर्यचन्द्रमसौ राजानौ, जीवशुक्रौ सचिवौ, बुधो युवराजः, भौमः सेनानायकः, शनिश्च भृत्योऽस्ति। तद्यथा

राजा रवि शशधरश्च बुधः कुमारः।

सेनापतिः क्षितिसुतः सचिवौ सितेज्यौ

भृत्यस्तथा तरणिजः सबला ग्रहाश्च।

कुर्वन्ति जन्मसमये निजमेव रूपम्।।

सूर्यचन्द्रमसौ राजानौ कथितौ। यतो हि भगणे सिंहस्याधिपतिः सूर्यः, कर्कस्याधिपतिः चन्द्रो वर्तते। सिंहमारभ्य मकरपर्यन्तं षण्णां राशीनां स्वामित्वं सूर्यस्य पार्वे तथा च कुम्भमारभ्य कर्कपर्यन्तं षण्णां राशीनां स्वामित्वं चन्द्रस्य पार्श्वेऽस्ति। सूर्येणैव कन्या-तुलावृश्चिक- धनु- मकरादयो राशयः बुध-शुक्र- भौम- गुरु- मन्देभ्यः प्रदत्ताः। चन्द्रेण मिथुनवृष- मेष- मीन- कुम्भादयो राशयो बुध- शुक्र- मंगल- गुरुमन्देभ्यः प्रदत्तः। इति आख्यायिका। अत एव सूर्यचन्द्रमसौ राजानौ मन्येते। बुधो ग्रहेषु युवराजसंज्ञकः। चन्द्रपुत्रस्य बुधस्य कुमारावस्था कथिता। येषां जन्मकाले बुधो बली भवति, तेषां स्वभावः

कुमारवत् भवति। येषां जन्मकाले सूर्यचन्द्रमसौ बलिनौ, ते राजावदाचरन्ति। सूर्यस्य प्रभावेण तेषां स्वभावे शूरता- तेजस्- पराक्रमादिगुणानामाधिक्यं, चन्द्रस्य प्रभावेण मृदुता- सौम्यतादीनां गुणानामाधिक्यञ्च भवति। ग्रहेषु क्षितिसुतो भौमः सेनानायको वर्तते। मेषवृश्चिकयोः राश्योः अधिपतिः भौमः। भौमस्य स्वभावे पराक्रम- साहस- क्रोध- शारीरिकबलादयो गुणाः भवन्ति। एकस्य सेनानायकस्य कृते इमे सर्वे अपि गुणा आवश्यकाः, अत एव ये जनाः सैनिको भवितुमिच्छन्ति तेषां जन्माङ्ग भौमस्य प्रबलता आवश्यकी। बुधो यदि बली भवति जन्मकाले तदा मनुष्यः कुमारवदाचरति। एकः कुमारः यथा चिन्तारहितो भवति तथैव यस्य जन्माङ्ग बुधो बली भवति सो जनः आजीवनं चिन्तारहितं भवति। गुरुशुक्रौ सचिवौ मन्येते। बृहस्पतिः देवानामाचार्यः शुक्रश्च दैत्यानामाचार्यों वर्तते। द्वयोः कार्येषु साम्यं वर्तते। द्वावेव मार्गदर्शकौ मन्त्रिणौ वा स्तः। अत एव ये जनाः मार्गदर्शकरूपेण (।कअपेमत) कार्य कर्तुमिच्छन्ति तेषां जन्माझे गुरुशुक्रयोः प्राबल्यमावश्यकम् । शनिः ग्रहेषु भृत्यसंज्ञकः। शनेः प्रभावेण जनाः सफलाः भृत्याः भवन्ति। येषां जन्माङ्ग शनिः स्वराशौ स्वोच्चराशौ वा भवति ते जनाः भृत्यकर्मणि कुशलिनः भवन्ति। ग्रहाणां नृपत्वादिविभागत्वं चक्रेणानेनापि ज्ञायते-

| | |
|---|---|
| सूर्यः | राजा |
| चन्द्रः | राजा |
| भौमः | सेनापतिः |
| बुधः | कुमारः |
| गुरुः | सचिवः |
| शुक्रः | सचिवः |
| शनिः | भृत्यः |

**दिगीशकथनम्**

चतस्रो दिशः भवन्ति। चतस्रश्च विदिशः। तासां नामानि- प्राच्यवाचीप्रतीच्युदीच्यश्च। ईशान- आग्नेय- वायव्य- नैऋतविदिशश्च। एतासां दिशां विदिशाञ्च स्वामिनो ग्रहाः वर्तन्ते। यथा पूर्वस्य स्वामी सूर्यो वर्तते। आग्नेयकोणस्याधिपतिः शुक्रः। दक्षिणदिक्पतिः भौमः कथितः। नैऋत्यकोणस्याधिपतिः राहुः अथ च पश्चिमदिक्पतिः शनिः कथ्यते। वायुकोणस्याधिपतिः चन्द्रः कथितः। उत्तरदिक्पतिः बुधः अथ च ईशानकोणस्याधिपतिः बृहस्पतिः भवति। तद्यथा

''प्राच्यादीशा रविसुतकुजराहुयमेन्दुसौम्यवाक्पतयः''

अस्य प्रयोजनं वास्तुशास्त्रे भवति यतोहि ज्योतिषशास्त्रस्य संहितास्कन्धान्तर्गतं वास्तुशास्त्रे दिक्ज्ञानस्य अत्यन्तं महत्त्वं वर्तते। यदा भवन निर्मीयते तदा भवनस्य विविधाः कक्षाः दिक्पतेः प्रकृत्यानुसारमेव निर्मीयन्ते। वराहमिहिराचार्येण बृहत्संहितायाः वास्तुविद्याध्याये विषयेऽस्मिन् विस्तरेण चर्चा चर्चिताः। ज्योतिषशास्त्रस्य सिद्धान्तग्रन्थेष्वपि दिक्साधनस्य प्रक्रिया वर्णिता। वास्तुशास्त्रीयग्रन्थेषु वर्णितं यत्कस्यापि भवनस्य निर्माणात् पूर्वं सर्वप्रथम दिक्साधनं क्रियते। तदनन्तरमेव भवनस्य निर्माणमारभ्यते। निर्माणकाले दिगीशस्य प्रकृत्यानुगुणं विविधाः कक्षाः निर्मीयन्ते। यथा ईशानकोणे बृहस्पतेः प्रकृत्यानुगुणं मन्दिर निर्मीयते। एवमेव विविधेषु दिक्षु विविधाः कक्षाः निर्मीयन्ते। ग्रहाणां दिक्स्वामित्वं चक्रेणानेन ज्ञायते

**ग्रहाणां शुभाशुभत्वनिरूपणम्**

संसारेऽस्मिन् प्रत्येक जीवस्य नैसर्गिकः कश्चन स्वभावो भवति। सः स्वभाव एव तस्य जीवस्य प्रकृतिः कथ्यते। कश्चित् मनुष्यः स्वभावेन् सौम्यो भवति, कश्चित् मनुष्यः स्वभावेनैव दुष्टो भवति। प्रत्येक मनुष्यस्य सर्वेषु कार्येषु तस्य स्वभाव एव दृश्यते यथा सज्जनः पुण्यरतो भवति, दुष्टश्च पापरतो दृश्यते। "यत् पिण्डे तद् ब्रह्माण्डेश् इत्यानुसारं ग्रहाणामपि कश्चन् स्वभावो वर्णितः। एकस्तु नैसगिकस्वभावः अपरस्तु भावाधीशत्वात्। शुभाशुभस्वभावः। यो ग्रहः त्रिकोणेशो भवति सो ग्रहः शुभः कथितः। यो ग्रहः षष्ठस्य अथवा अष्टमस्य अथवा द्वादशभावस्य स्वामी भवति सो ग्रहः पापग्रहः कथ्यते। शुभग्रहाणां फलं शुभमुत्तम् पापग्रहाणां फलमशुभमुत्तम्।

वराहमिहिराचार्येण स्वग्रन्थे लघुजातके ग्रहाणां नैसर्गिक शुभाशुभत्वं स्वीकृतम्। तदनुसारं रवि-शनि-भौमग्रहाः नैसर्गिकरूपेण पापग्रहाः मन्यन्ते। पूर्णचन्द्र- बुध- गुरुशुक्रास्तु शुभाः कथिताः। पापयुतबुधः क्षीणचन्द्रश्च पापग्रहौ मन्येते। तद्यथा

''क्षीणेन्द्रर्कयमाराः पापास्तैः संयुतः सौम्यः।''

पक्षद्वयं भवति शुक्लः कृष्णश्च। पूर्णिमायां चन्द्रः पूर्णो भवति। पूर्णचन्द्रः सर्वाधिकः शुभः कथितः। अमावस्यायां चन्द्रः पूर्णरूपेण क्षीणो भूत्वा न दृश्यत एव। अतः तस्य गणना पापग्रहेषु कृता। शुक्लपक्षस्य प्रतिपदं आरभ्य दशमीं पर्यन्तं चन्द्रो मध्यबली भवति। शुक्लदशमीतः कृष्णपक्षस्य पंचमीं पर्यन्तं चन्द्रः पूर्णबलयुतः शुभप्रदो मन्यते। कृष्णपक्षस्य पंचमीतः अमावस्यां पर्यन्तं चन्द्रः क्षीणबली जायते। एषु दिवसेषु चन्द्रः पापग्रहः कथितः। चन्द्रबुधौ यदि शुभग्रहयुतौ दृष्टौ वा स्यातां तदा द्वयोः गणना शुभग्रहेषु क्रियते तद्यथा-

शुक्लादिरात्रिदशकेऽहनि मध्यवीर्य

शाली द्वितीयदशकेऽतिशुभप्रदोऽसौ।

चन्द्रस्तृतीयदशके बलवर्जितस्तु ।

सौम्येक्षणादिसहितो यदि शोभनः स्यात्।।

अस्य शुभाशुभकथनस्य प्रयोजनं किम्? अस्य विचारो जन्माङ्गे क्रियते, यदि कस्यापि जन्माङ्गे पापाः ग्रहाः बलिनः तदा सः जनः पापात्मको जायते यदि शुभाः बलिनः तदा सः सौम्यश्च भवति। विभिन्नेषु भावेषु शुभाशुभग्रहाणां स्थितिवशादपि तद्-भावसम्बन्धिशुभाशुभत्वं प्राप्यते।

| ग्रहः | नैसर्गिकशुभाशुभत्वम् |
|---|---|
| सूर्यः | पापग्रहः |
| पूर्णचन्द्रः | शुभग्रहः |
| क्षीणचन्द्रः | पापग्रहः |
| भौमः | पापग्रहः |
| शुभयुतबुधः | शुभग्रहः |
| पापयुतबुधः | पापग्रहः |
| बृहस्पतिः | शुभग्रहः |
| शुक्रः | शुभग्रहः |
| शनिः | पापग्रहः |

एकादशे भावे यदि शुभग्रहाः भवेयुः तदा शुभमार्गेण धनस्य लाभो जायते, पापग्रहाः यदि भवेयुः तदा पापमार्गेण धनस्य लाभो भवति। एवमेव द्वादशे भावे यदि शुभग्रहाः भवेयुः तदा शुभस्थाने धनस्य व्ययो जायते, पापग्रहाः यदि द्वादशे भवेयुः तदा धनस्य व्ययो पापस्थानेषु जायते।।

**ग्रहाणां पुंस्त्वं-स्त्रीत्वं नपुंसकत्वञ्च**

"क्लीबपती बुधसौरी चन्द्रसितौ योषितां नृणां शेषाः"

ग्रहेषु सूर्यभौमगुरवः पुरुषग्रहाः, चन्द्रशुक्रौ स्त्रीग्रहौ, शनिबुधौ नपुंसकौ कथितौ। सूर्यः पितृकारकः, भौमो भ्रातृकारकः, बृहस्पतिश्च पुत्रकारकोऽस्ति। इमे सर्वे पुरुषाः। अत एव सूर्यभौमगुरवोऽपि पुरुषसंज्ञकाः । चन्द्रो मातृकारकः, शुक्रेण पत्निविषयकचिन्तनं प्रवर्तते। इमे महिले। अतः शुक्रचन्द्रौ स्त्रीग्रहो। शनिबुधयोः बुधः स्त्रीनपुंसको, मन्दः पुरुषनपुंसकश्च वर्तेते। ग्रहाणां पुंस्त्वं- स्त्रीत्वं- नपुंसकत्वञ्चक्रेणानेन ज्ञायते

| | |
|---|---|
| ग्रह: | नैसर्गिकशुभाशुभत्वम् |
| सूर्य: | पुरूषग्रह: |
| चन्द्र: | स्त्रीगृह |
| भौम: | पुरूषग्रह: |
| बुध | नंपुसकग्रह: |
| गुरू | पुरूषग्रह: |
| शुक्र: | स्त्रीगृह |
| शनि: | नंपुसकग्रह: |

अस्य प्रयोजनं किम्? यस्य जन्माङ्ग पुरुषग्रहा: बलिनो भवन्ति तस्मिन् मनुष्ये पौरुषादिगुणानामाधिक्यं दृश्यते। यस्य जन्माङ्गे चन्द्रशुक्रौ स्त्रीग्रही बलिनौ भवत: तेषां जनानां स्त्रैणी प्रवृत्ति:। लोकेऽपि दृश्यते यत् कश्चन् पुरुषोऽपि स्त्रीवत् लज्जाशील: सौम्यश्च भवति। कदाचित् महिलाऽपि पुरुषवत् साहसी भवति। सर्वमिदं ग्रहाणां प्रभावेण भवति।

**ग्रहाणा शाखेशत्वम्**

इदानीं ग्रहाणां शाखेशत्वं विचार्यते। चत्वारो वेदा: ऋग्यजुसामथर्वाख्या:। ऋग्वदस्याधिपति: जीव:, यजुर्वेदस्य शुक्र:, सामवेदस्य भौम:, अथर्ववेदस्याधिपति: बुधो वर्तते। तद्यथा

"ऋगथर्वसामयजुषामधिपा गुरुसौम्यभौमसिता:''

अस्य प्रयोजनमिदं यत् केन मनुष्येन कस्य वेदस्य अध्ययनं कार्यम्। यस्य जन्म ब्राह्मणकुलेऽभवत् वेदाध्ययनं तस्य निष्कारणो धर्म: । यथोत्तं पतञ्जलिना

''ब्राह्मणेन निष्कारणो धर्म: षड्ङ्गो वेदाध्येयो ज्ञेयश्च''

वेदादीनां ये शाखेशा: कथिता: जन्माङ्गे तेषां बलाबलमेव तस्य वेदस्य अध्ययने हेतु:। बृहस्पतिना ऋग्वेद:, शुक्रेण यजुर्वेद:, भौमेन सामवेद:, बुधेनाथर्ववेद: विचार्यते। जन्माङ्गे चतुर्णा ग्रहाणां बलाबलं ज्ञात्वा चतुषु वेदेषु कस्य वेदस्य अध्ययनं प्रशस्तमिति ज्ञायते।

पुनश्च ऋग्वेदस्यारम्भ: जीववासरे तस्यैव होरायां प्रशस्त:। यजुर्वेदस्य प्रथमपाठारम्भ: शुक्रवासरे शुक्रस्य होरायां प्रशस्त:। सामवेदस्याध्ययनारम्भ: भौमवासरे तस्यैव होरायां पुनश्च अथर्ववेदस्याध्ययनारम्भ: बुधवासरे बुधस्य हारोयां प्रशस्त:। ग्रहाणां शाखेशत्वं चक्रेणानेन ज्ञायते

| | |
|---|---|
| वेद: | शाखेश: |
| ऋग्वेद: | बृहस्पति: |
| यजुर्वेद: | शुक्र: |
| सामवेद: | भौम: |
| अथर्ववेद: | बुध: |

**ग्रहाणां वर्णेशकथनम्**

संसारेऽस्मिन् प्रत्येक मनुष्यस्य कोऽपि वर्णो भवत्येव, काऽपि जाति: भवत्येव तथैव ग्रहाणां विभागोऽपि वर्णेषु कृत:। जीवशुक्रयो: ब्राह्मणवर्ण:, रविभौमयो: क्षत्रियवर्ण: चन्द्रस्य वैश्यवर्ण: बुधस्य शूद्रवर्ण: कथित:। शनि: सङ्करवर्णीयो भवति। तद्यथा

जीवसितौ विप्राणां क्षत्राणां रविकुजौ विशां चन्द्र:।

शूद्राधिप: शशिसुत: शनैश्चर: सङ्करभावानाम्।।

अस्य प्रयोजनमिदं यत् कस्यापि जन्माङ्ग लाभस्थाने यो ग्रहोऽस्ति तस्य ग्रहस्य यो वर्ण: तस्मात् वर्णविशेषात् लाभो जायते यथा जीवोऽस्ति चेत् ब्राह्मणजनेभ्य: लाभो भवति। चतुर्थे यो ग्रहो भवति तदनुगुणं वर्णजनै: सह मैत्री भवति यथा चतुर्थे जीवे सति ब्राह्मणै: सह मैत्री, भौमे सति क्षत्रियै: सह मैत्री भवति। एवमेव षष्ठे भावे यो ग्रहो भवति तदनुगुणं वर्णै: सह शत्रुताजायते। चक्रेणानेन ग्रहाणां वर्णा: ज्ञायन्ते-

| ग्रह: | वर्ण |
|---|---|
| सूर्य: | क्षत्रियवर्ण: |
| चन्द्र: | वैश्यवर्ण: |
| भौम: | क्षत्रियवर्ण: |
| बुध | शूद्रवर्ण: |
| गुरू | ब्रह्मणवर्ण: |
| शुक्र: | ब्रह्मणवर्ण: |
| शनि: | सड्करवर्ण: |

**विषयसङ्ग्रह:**

ज्योतिषशास्त्रे ग्रहाणाम् अत्यधिक महत्त्वमस्ति। फलादेशे ग्रहाणां स्थित्यादिविचारो महात्म्यं बरीभरीति। ग्रहाणामुच्चस्थानानि कानि ? नीचस्थानानि कानि ? कानि मूलत्रि-

कोणभवनानि ? ग्रहाणामात्मादयः विभागाः के ? नृपत्वादयः विभागाः के ? एतादृशानां विषयाणां ज्ञानमत्यावश्यक वर्तते। अत एव पाठ्यांशेऽस्मिन् ग्रहाणामुच्चनीचमूलत्रि-कोणभवनानि वर्णितानि, पुनश्च ग्रहाणां प्रकृतिरपि निरूपिता। को ग्रहः कस्याः दिशः स्वामी भवति ? कस्य ग्रहस्य को वर्णः ? तस्य शाखा का ? इत्यादयः विषयाः पाठ्यांशेऽस्मिन् प्रतिपादिताः।

## ३.२ राशिस्वरूपनिरूपणम्

ज्योतिषशास्त्रस्याधारः राशय एव वर्तन्ते। मेषादयो द्वादशराशयो भवन्ति। ग्रहा एव राशीशाः कथ्यन्ते। ग्रहाणां सञ्चरणमार्गः राशिनाम्ना द्वादशभागेषु विभक्तोऽस्ति। यथा कालपुरुषस्य आत्मादिस्थानीयाः सूर्यादयो ग्रहाः सन्ति तथैव कालपुरुषस्य अङ्ग-ास्थानीयाः मेषादयो द्वादशराशयो भवन्ति। कस्यापि मनुष्यस्य जन्मकाले चन्द्रो यस्मिन् राशौ संचरति स एव तस्य मनुष्यस्य चन्द्रराशिः जन्मराशिर्वा कथ्यते। संसारेऽस्मिन् एकोऽपि जीव एतादृशो नास्ति यस्य राशिर्नास्ति। जीवैः ग्रहाणां गोचरवशात् शुभ-ाशुभफलं प्राप्यते। अतः वक्तुं शक्यते यत् राशय एव ज्योतिषशास्त्रस्याधारः। 360 अंशात्मकक्रांतिवृत्तस्य द्वादशविभागाः क्रियन्ते। एकस्मिन् राशौ 30 अंशाः भवन्ति। त्रिंशंदशात्मकस्य राशेः विभागः होरादिषड्वर्गेषु विधीयते। त्रिंशदंशात्मकराशेरधं होरा उच्यते। एवं एकस्याः होरायाः मानं 15 अंशं भवति। सूर्यचन्द्रयोः होरा भवति। राशेः तृतीयो भागो द्रेष्काणः कथ्यते। एकस्मिन् द्रेष्काणे दश अंशाः भवन्ति। राशेः नवमो भागः नवमांशःश्श् कीर्तितः। एकस्य नवमांशस्य मानं 39.20श् उत्तम्। राशेद्वुदशो भागो ‘‘द्वादशांशःश्श् कथितः। एकस्य द्वादशांशस्य मानं 2.30श् कथितम्। राशेः पञ्चमभागः त्रिशांशः कथिताः। विषमसमराशिभेदात् त्रिंशांशानामंशात्मके मानेऽपि भेदो भवति। अनेन षड्वर्गेण सूक्ष्मफलं विचार्यते।

**राशिस्वरूपनिरूपणम्**

राशिशब्दस्यार्थो वर्तते समूहः। यथा धनस्य समूहो धनराशिः कथ्यते। तथैव नक्षत्राणां समूहो राशिरिति कथ्यते। नक्षत्राणां समूहवशात् गगनमण्डले कस्या अपि विशिष्टाकृत्याः निर्माणं भवति। सा विशिष्टाकृतिरेव तस्य सञ्ज्ञाकरणे हेतुः। यथा नक्षत्राणां समूहेन मेषाकृतिः निर्मीयते सा आकृतिरेव मेषराशिः कथ्यते। कर्कट-सिंह-वृश्चिकादयोऽपि स्वनामसदृशाः स्वसंज्ञाविहिताकृतयः। मत्स्यौ मीनराशेः स्वरूपम्। स्वस्मिन् स्कन्धे रिक्तघटधारी पुरुषः कुम्भः, धनुषधारी नरोऽश्वजंघः धनुराशेः स्वरूपम्, मृगमुखो मकरः, तुलायुतपुरुषः तुलाराशिः, ससस्यदहना कन्या कन्याराशे स्वरूपं भवति। एवं मेष- वृष-मिथुनं- कर्कसिंह- कन्या- तुला- वृश्चिक- धनु- मकर- कुम्भ- मीनादयो द्वादशराशयो भवन्ति। एकस्य राशेर्मानं 30 अंशात्मक वर्तते। इदमेव क्रांतिवृत्तस्य मानमस्ति। ऋक्ष,

क्षेत्रं, भं, राशिशब्दस्य पर्याया: सन्ति। तद्यथा-

ऋक्षं भवननामानि राशि: क्षेत्रं भमेव वा।

उत्तानि पूर्वमुनिभिस्तुल्यार्थप्रतिपत्तये।। (सारावली 3.8)

सर्वप्रथमं भारत एव ज्योतिषशास्त्रस्य सूत्रपातोऽभवत् तदनन्तरं शास्त्रस्यास्य विश्वस्य विविधेषु राष्ट्रेषु प्रसारो जात:। अस्य प्रमाणमस्ति विश्वस्य विविधासु भाषासु राशिसंज्ञकशब्दा:। तद्यथा

**नक्षत्रपरिचय:**

न क्षरतीति नक्षत्रम्। बृहदाकाशे यानि हि तेजोमयानि बिम्बानि नित्यैकैवगतिमन्ति तानि सर्वाणि नक्षत्रश्श् शब्देन व्यवह्रियन्ते। तानि च नक्षत्राणि ज्योतिषशास्त्रानुसारं सप्तविंशति: सन्ति। प्रत्येकस्य नक्षत्रस्य चत्वार: पादा: निर्धारिता: सन्ति। मतान्तरेण अष्टाविंशतितमं नक्षत्रं अभिजितोऽस्ति। उत्तराषाढानक्षत्रस्य चतुर्थचरण: श्रवणनक्षत्रस्य पञ्चदशांशश्च द्वयो: मेलनं अभिजित: कथ्यते। एकस्य नक्षत्रस्य मानं 130.20श् भवति। नक्षत्रस्य एकस्य पादस्य मानं 30.20श् भवति। सप्तविंशतिनक्षत्राणां समाहृत्य मानं 3600अंशात्मको भवति।

**राशिनक्षत्रयो: सम्बन्ध:**

षष्ट्याधिकं त्रिंशदंशात्मकं (3600) क्रांतिवृत्तं वर्तते। तत् वृत्तं त्रिंशदंशात्मकेषु द्वादशभागेषु विभक्तमस्ति। 3600/12-30 । त्रिंशत् अंश (300) एव एकस्य राशेर्मानं वर्तते। नक्षत्रमण्डले नक्षत्राणां संख्या सप्तविंशति:, राशीनां संख्या च द्वादश वर्तते। 3600+27 = 130.20श् एकस्य नक्षत्रस्य मानमस्ति। एकस्मिन् राशौ सपादनक्षत्रद्वयं भवति। प्रत्येकस्य नक्षत्रस्य चत्वार: पादा: सन्ति। एकस्य पादस्य मानं 130.20श्/4-30.20श् वर्तते। एवं एकस्मिन् राशौ नक्षत्राणां नवपादा: भवन्ति। 30.20श् ग9-300 त्रिंशदंश एकस्य राशेर्मानमस्ति। तद्यथा-

'अश्विनी भरणी कृत्तिकापादमेक मेष:।।१।।

कृत्तिकायास्त्रय: पादा रोहिणी मृगशिरोऽयं वृष:।।२।।

मृगशिरोऽर्धमार्दापुनर्वसुपादत्रयं मिथुन:।।३।।

पुनर्वसुपादमेकं पुष्याश्लेषान्तं कर्क:।।४।।

मघा च पूर्वाफाल्गुन्युत्तरफाल्गुनीपादमेक सिंह:।।५।।

उत्तरायास्त्रय: पादा हस्तचित्रार्ध कन्या।।६।।

चित्रार्ध स्वाती विशाखापादत्रयं तुला।।७।।

विशाखापादमेकमनुराधा-ज्येष्ठान्तकं वृश्चिक:।।८।।

मूलं च पूर्वाषाढोत्तेराषाढापादमेकं धनु:।।९।।

उत्तराषाढात्रय: पादा: श्रवणधनिष्ठार्धं मकर:।।१०।।

धनिष्ठार्ध शतभिषापूर्वाभाद्रपादत्रयं कुम्भ:।।११।।

पूर्वाभाद्रपदापादमेकमुत्तरभाद्रपदारेवत्यन्तं मीन:।।१२।।

अनेन प्रकारेण सप्तविंशतिनक्षत्राणां विभागो द्वादशराशिषु कृत:। राशिनक्षत्रयो: पारस्परिकसम्बन्ध: चक्रेणाऽनेनापि ज्ञायते

**ग्रहपरिचय:**

नवग्रहा: प्रसिद्धा:। परञ्च वराहमिहिराचार्यमतानुसारं सप्त एव ग्रहा:। ते च - सूर्यचन्द्र- मंगल- बुध- गुरु- शुक्र- शनयश्चेति। राहुकेतो: गणना वराहमिहिरेण ग्रहेषु न कृता। तन्मतानुसारं एतौ द्वावेवुपग्रहौ स्त:। अत: वराहमिहिरेण कस्मिन्नपि ग्रन्थे एतयो: द्वयो: फलमपि न कथितम्। एतौ द्वावेव सूर्यचन्द्रयो: भ्रमणपथयो: सम्पाबिन्दू वर्तेते। राहुकेतो: स्थिति: चित्रेणानेन ज्ञायते

सर्वे ग्रहा: गगनमण्डले सूर्यस्य प्रदक्षिणां कुर्वन्ति। तेषु चन्द्र: पृथ्व्या: परिक्रमा करोति। सर्वे ग्रहा अनुशासिता:। एतेषां प्रदक्षिणा सदैव स्वकक्षायामेव भवति। एतेषां कक्षाक्रम: शास्त्रेषु एवमुल्लिखित:

कक्षायां क्रमशो दिनेशतनयाज्योतिर्भचक्राश्रिता।

छायासूनुगुरुक्ष्माजदिनकृन्शुक्रेन्दुपुत्रेन्दव:।।

चित्रेणानेन ग्रहाणां कक्षाक्रम: ज्ञायते

**राशीनां ग्रहाणाञ्च पारस्परिकसम्बन्ध:**

सप्त एव ग्रहा: । ते च - सूर्यचन्द्रभौमबुधगुशुक्रशनय:। मेषादयो द्वादशराशय: सन्ति। प्रत्येकस्य ग्रहस्य द्वाभ्यां राशिभ्यां सह सम्बन्धो भवितुं न शक्यते। ऋषय: राशिवृत्तस्य विभागद्वयं कृतवन्त:। एकस्य विभागस्याधिपति: सूर्य अपरस्य चन्द्रो वर्तते। स्वविभागे सूर्य: सिंहराशे: अधिपति:। एवमेव स्वकीये विभागे चन्द्र: कर्कराशे: अधिपति:। परिशिष्टानां राशीनां स्वामित्वं सूर्यचन्द्राभ्यां अन्येभ्य: ग्रहेभ्य: प्रदत्तम्। तद्यथा

द्वादशमण्डलभगणं तस्यार्थे सिंहतो रविर्नाथ:।

कर्कटकात्प्रतिलोमं शशी तथान्येऽपि तत्स्थानात्।।

सिंहस्याधिपतिर्भानुश्चन्द्र: कर्कटेश्वर:।

मेषवृश्चिकयोम: कन्यामिथुनयोर्बुध:।।

धनुर्मीनयोर्देवेन्य: शुक्रो वृषतुलेश्वर:।।

शनिर्मकरकुंभेश: इत्येते राशिनायका:।।

अनेन प्रकारेण कर्कमारभ्य कुम्भं यावत् चन्द्रस्याधिकार: तथा च सिंहमारभ्य मकरपर्यन्तं सूर्यस्याधिकारो वर्तते। अत एव ग्रहेषु सूर्यचन्द्रौ राजानौ वर्तेते। अत: सूर्यक्षेत्रे कन्याया: चन्द्रक्षेत्रे मिथुनस्य च अधिपति: बुध: कथित:। उभयो: क्षेत्रे अग्रिमराश्यो: स्वामित्वं मन्त्रिशुक्रस्य पार्वेऽस्ति। अत: सूर्यक्षेत्रे तुलाया: चन्द्रक्षेत्रे च वृषस्य स्वामी शुक्रोऽस्ति। तदनन्तरं सूर्यक्षेत्रे वृश्चिकराशे: चन्द्रक्षेत्रे मेषराशेश्च स्वामित्वं सेनापते: भौमस्य पार्वेऽस्ति। तदनन्तरं सूर्यस्याधिकारक्षेत्रे धनुराशे: चन्द्रस्याधिकारक्षेत्रे च मीनराशेरधिपति: सचिव: गुरुरस्ति। अन्तिमे सूर्यक्षेत्रे मकरस्य चन्द्रक्षेत्रे कुम्भस्य च स्वामित्वं भृत्यशने: पार्श्वेऽस्ति। अनेन प्रकारेण मेषादीनां द्वादशराशीनां स्वामित्वं सूर्यादीनां सप्तग्रहाणां पार्वेऽस्ति। तद्यथा

कुजशुक्रज्ञेन्द्वर्कज्ञशुक्रजजीवसौरियमगुरव:।।

मेषादीनां राशीनां स्वामिन: क्रमश: कुज- शुक्र- बुध- चन्द्र- सूर्य- बुध- शुक्रभ्ौम- गुरु- शनि-

शनि- गुर्वादय: सन्ति।।

**नवमांशेशज्ञानम् ।**

एकस्मिन् राशौ 300अंशा: भवन्ति। राशेर्नवमो भागो नवमांश: कथ्यते। नवमांशज्ञानाय प्रत्येकस्य राशे: नवखण्डानि क्रियन्ते। प्रत्येकस्य नवमांशस्य मानं 39.20श् वर्तते। षोडशवर्गेषु नवमांशस्य महत्त्वं सर्वाधिकमस्ति। एकस्मिन् राशौ प्रथमो नवमांश: 00.30.20' यावत् भवति

द्वितीयो नवमांश: 30.20'-6.40' यावत् भवति। तृतीयो नवमांश: 640'- 100. 00' यावत् भवति। एवमेव अग्रेऽपि नवमांशा: ज्ञेया:। धनुषसिंहराशीनां प्रथमो नवमांश: मेषस्य भवति। उत्तराशीनां प्रथमो मेषस्य, द्वितीयो वृषस्य, तृतीयो मिथुनस्य एवं धनुरन्ता नव-नवमांशा: ज्ञेया:। तेषामधिपाश्च नवमांशेशा उच्यन्ते। वृषकन्यामृगाणां च मकराद्या नव-नवमांशा: भवन्ति। मिथुनतुलाकुम्भानां च तुलाद्या नवमांशा: नव ज्ञातव्या:। कर्किवृश्चिकमीनानां कर्काद्या: नवमांशा: भवन्तीति। उत्तञ्च-

मेषा नवांशकानामजमकरतुलाकुलीराद्या:।

उदाहरणम्

कस्यापि जन्मलग्ने सूर्यस्पष्टं- 07.200.10'.8'' वर्तते। अनेन ज्ञायते यत् सूर्यः वृश्चिकराशेः विंशे अंशे (200) दशम्यां कलायां (10') अष्टम्यां विकलायाञ्च (8'') वर्तते। एकस्य नवमांशस्य मानं 3.20श् कला भवति। अतः 2Ợ अंशमारभ्य 23.20 कलापर्यन्तं सप्तमो नवमांशोऽस्ति। वृश्चिकराशौ प्रथमो नवमांशः कर्कस्य भवति। कर्कात् गणनां कुर्मश्चेत् सप्तमो नवमांशो मकरस्य प्राप्यते। अतः सूर्यः मकरनवमांशेऽस्ति। मकरस्य स्वामी शनिरस्ति। अतः सूर्यः शनेः नवमांशे वर्तते।

अनेन प्रकारेण प्रत्येकस्मिन् राशौ नव नवमांशाः भवन्ति। प्रत्येकस्य मानं 3.20श् भवति। राशौ यस्य राशेः नवमांशो भवति तस्य राशीश एव नवमांशेशो भवति यथा मेषराशौ प्रथमो नवमांशः मेषस्य अतो भौमः प्रथमनवमांशेशः, द्वितीयो नवमांशो वृषस्य अतः शुक्रो द्वितीयो नवमांशेशः, तृतीयो मिथुनस्य अतः बुधः तृतीयो नवमांशेशः। एवमेव अग्रेऽपि ज्ञेयाः। सर्वेषु राशिषु नवमांशज्ञानस्य एष एव क्रमः।

**वर्गोत्तमनवमांशः**

एकस्मिन् राशौ यदा तस्य राशेरेव नवमांशो भवेत् सो वर्गोत्तमोनवमांशः कथ्यते। यथा मेषराशौ 00-39.20श् कलां यावत् मेषस्य नवमांशो भवति अतः प्रथमो मेषनवमांशो वर्गोत्तमो नवमांशः कथ्यते, वृषराशौ 13.20 - 16.40श् कलां यावत् पंचमो नवमांशो वृषस्य भवति अतः पंचमोऽयं वृषनवमांशो वर्गोत्तमः कथ्यते। मिथुनराशौ 26.40श् - 3Ợ00श् कलां यावत् नवमो नवमांशो मिथुनस्य भवति अतः नवमोऽयं मिथुननवमांशो वर्गोत्तमनवमांशः कथ्यते। एवमपि वत्तुं शक्यते यत् चरराशौ अर्थात् मेष- कर्क- तुला- मकरराशौ प्रथमो नवमांशः

(00-300.20') वर्गोत्तमसंज्ञको भवति, स्थिरे (वृष- सिंह- वृश्चिक- कुम्भराशौ) मध्यनवांशको अर्थात् पंचमो नवमांशः (130.20' - 1640' पर्यन्तम्) वर्गोत्तमः कीर्तितः। द्विस्वभावराशौ अर्थात् मिथुन- कन्या- धनु- मीनराशौ नवमो नवमांशः (26Ợ. 40'-30Ợ.00'पर्यन्तम्) वर्गोत्तमनवमांशको भवति। वर्गोत्तमनवमांशो शुभफलदायको भवति। जन्मलग्ने प्रश्नलग्ने वा कोऽपि ग्रहः वर्गोत्तमनवमांशे भवेच्चेत् शुभफलदायको भवति। तद्यथा

वर्गोत्तमाश्चरगृहादिषु पूर्वमध्यपर्यन्ततः शुभफला नवभागसंज्ञा।

उदाहरणं यथा-

नवमांशस्य महत्त्वं षड्वर्गेषु सार्वाधिक वर्तते। यदि जन्मकुण्डल्या कोऽपि ग्रहः स्वनीचराशौ भूत्वा अशुभफलदायकोऽस्ति पुनः स एव ग्रहो यदि नवमांशकुण्डल्यां

स्वोच्चराशौ वर्तते तदा तस्य ग्रहस्य अशुभफले न्यूनत्वं दृश्यते। एवमेव कोऽपि ग्रहो जन्मकुण्डल्यां शुभस्थितौ वर्तते परञ्च नवमांशकुण्डल्यां सः स्वनीचराशौ अस्ति तदा तस्य शुभफलेऽपि न्यूनत्वमायाति। अतः नवमांशं विचार्य एव शुभाशुभफलं वक्तव्यम्।

**द्वादशांशज्ञानम्**

एकस्य राशेर्नवमो भागो यथा नवमांशः कथ्यते तथैव द्वादशो भागो द्वादशांशः कथ्यते। राशेर्मानं 3Q अंशो भवति। राशेः समानद्वादशभागाः क्रियन्ते चेत् 3Q : 12 = 2.30श् कला एकस्य द्वादशांशस्य मानं लभते। प्रत्येकस्मिन् राशौ प्रथमो द्वादशांशः तस्य एव राशेर्भवति यथा मेषराशौ प्रथमो द्वादशांशो मेषस्य, द्वितीयो द्वादशांशो वृषस्य, तृतीयो द्वादशांशो मिथुनस्य भवति। एवं मेषराशौ मेषमारभ्य मीनान्ताः द्वादशांशाः भवन्ति। एवं विचारणीयराशिमारभ्य द्वादशांशाधिपतयो भवन्ति। यस्य राशेर्वादशांशो भवति तस्य राशीश एव द्वादशांशेशः कथ्यते। तद्यथा

''स्वगृहाद् द्वादशभागा''

अर्थात् द्वादशांशः स्वराशितो गण्यते। उदाहरणं यथा- सूर्यस्पष्टः - 7.20.10. 08ष् वर्तते। अनेन ज्ञायते यत् सूर्यः वृश्चिकराशेः विंशे अंशे, दशम्यां कलायां, अष्टम्यां विकलायाञ्च वर्तते। एकस्य द्वादशांशस्य मानं सार्धद्वयमंशात्मकं भवति। विंशतिमारभ्य सार्धद्वाविंशतिं पर्यन्तं (20-22.30श्) नवमो द्वादशांशो भवति। वृश्चिकराशौ नवमो द्वादशांशः कर्कस्य भवति। अतः कर्काधिपतिः चन्द्रः एव द्वादशांशेशो वर्तते। सूर्यः चन्द्रस्य द्वादशांशे वर्तते।

**देष्काणज्ञानम्**

एकस्य राशेः भागत्रयं विधीयते। एक एको भागो द्रेष्काण इत्युच्यते। एवं एकस्मिन् राशौ त्रयो द्रेष्काणाः भवन्ति। एकस्य राशेर्मानं 3Q त्रिंशदंशो भवति। अस्य मानस्य भागत्रयं कृत्वा एकस्य द्रेष्काणस्य मानं लभते। 3Q 3 = 1Q अंशो द्रेष्काणस्य मानं वर्तते। एकस्मिन् राशौ 0Q-1Q अंशं यावत् प्रथमो द्रेष्काणः, 11-2Q अंशपर्यन्तं द्वितीयो द्रेष्काणः, 21-3Q अंशपर्यन्तं तृतीयो द्रेष्काणो भवति। एकस्मिन् राशौ त्रयो द्रेष्काणाः प्रत्येक क्रमशः प्रथमपञ्चमनवमेशानां भवति। यथोक्तम्

"देष्काणाः प्रथमपञ्चनवपानाम्''

कस्मिन्नपि राशौ प्रथमो द्रेष्काणः 00-100 अंशपर्यन्तं स्वस्य भवति। 100-20Q अंशपर्यन्तं द्वितीयो द्रेष्काणः तस्मात् पंचमराशीशस्य भवति। 20-30 अंशपर्यन्तं तृतीयो द्रेष्काणः तस्मात् नवमराशीशस्य कथितः। यथा मेषराशौ प्रथमो द्रेष्काणः (09-1Q) अंशपर्यन्तं मेषपतेर्भौमस्य। ततः परं विशतिभागपर्यन्तं (1Q-2Q) मेषात्पञ्चमस्य

सिंहस्याधिपते: सूर्यस्य। तत: परं (200-300) अन्तं यावन्मेषान्नवमस्य धनुराशेरधिपतेर्गुरोद्रेष्काण:। एवमेव सर्वत्र ज्ञेयम्।

द्रेष्काणे प्रथम-पञ्चम-नवमराशीनां प्राधान्यमुत्तम्। तस्य कारणं किम्?पञ्चमो भावो विद्याद्योतकभावो नवमो धर्मद्योतकश्च। प्रथमो भाव: शरीरस्य द्योतको भवति। अत: विद्यायुत: शरीरो धर्मयुतशरीरश्चोत्तमो भवति। अत एव द्रेष्काणे प्रथम- पंचम-नवमराशीनामुल्लेख: कृत:।

उदाहरणम्

कस्यापि जन्मलग्ने सूर्यस्पष्टं - 7.200.10'.08'' वर्तते। सूर्य: वृश्चिकराशे: विंशे अंशे, दशम्यां कलायां, अष्टम्यां विकलायाञ्च वर्तते। 200-300 अंशपर्यन्तं तृतीयो द्रेष्काणो भवति। वृश्चिकराशौ तृतीयो द्रेष्काण: कर्कस्य वर्तते। अत: द्रेष्काणेश: चन्द्र:। अत: सूर्य: चन्द्रस्य द्रेष्काणे वर्तते। चक्र यथा-

द्रेष्काणचक्रम्

राशि: द्य मेष: । वृष: द्य मिथन: द्य कर्क: द्य सिंह: कन्या तुला वृश्चिक: धनु: मकर: कुम्भ: मीन:

**होराज्ञानम्**

राशेरद्ध होरा उच्यते। एकस्य राशेर्मानं 300 अंशो भवति। तस्यार्ध 150 अंशो भवति। एवमेकस्मिन् राशौ द्वे होरे भवतस्तत्रैका होरा 150 अंशमिता। विषमराशौ दिनकरशशिनो: होरा अर्थात् मेष- मिथुन- सिंह- तुला- धनु- कुम्भराशीनां 00-150 अंशपर्यन्तं सूर्यस्य, 150-300 अंशपर्यन्तं चन्द्रस्य होरा भवति। समराशौ इन्दुमार्तण्डहोरे अर्थात् वृष- कर्क- कन्यावृश्चिक- मकर- मीनराशीनां 00-150 अंशपर्यन्तं चन्द्रस्य होरा, 150-300 अंशपर्यन्तं सूर्यस्य होरा भवति। यथोत्तम्

होरे विषमेऽन्द्वो: समराशौ चन्द्रतीक्ष्णांश्वो:।

होरावर्गे सूर्यचन्द्रयो: प्राधान्यम्। अस्य कारणं किम्?ग्रहेषु सूर्य: अग्ने: द्योतक: चन्द्रश्च सोमस्य द्योतक: यतोहि सूर्य: अग्निवत् उष्ण:, चन्द्र: सोमवत् शीतलश्च वर्तते। कथितञ्च 'अग्निसोमात्मक जगत्श् । अस्य संसारस्य आधारोऽपि एष एव। अग्निसामयो: प्राधान्यत्वादैव होरावर्गे सूर्यचन्द्रयो: ग्रहणं कृतम्।

उदाहरणम्

कस्यापि जन्मलग्ने सूर्यस्पष्टं- 7.20010'.08'' वर्तते। सूर्य: वृश्चिकराशौ वर्तते। वृश्चिकराशि: समराशिरस्ति। वृश्चिकराशौ 00.150 अंशपर्यन्तं चन्द्रस्य होरा तथा

150-300 अंशपर्यन्तं सूर्यस्य होरा कथिता। सूर्य: वृश्चिकराशौ विंशे अंशे वर्तते। अत: द्वितीयायां होरायामस्ति। वृश्चिकराशौ द्वितीया होरा सिंहस्य यस्य स्वामी सूर्यो वर्तते। अत: सूर्य: स्वहोरायामस्ति। चक्र यथा

होराचक्रम्

राशि: मेष: वृष: मिथन: कर्क: द्य सिंह: कन्या तुला द्य वृश्चिक: द्य धनु: मकर: द्य कुम्भ: मीन:

**त्रिशांशज्ञानम्**

त्रिशांश: = त्रिंश+अंश:। अत: त्रिंशत्तमो भाग: त्रिशांशो भवेत् परन्तु वराहमिर्हिहरादारभ्य इदानीं यावत् त्रिंशाशशब्दस्य प्रयोगो भवति परञ्च तस्य स्थाने पञ्चमांश एव व्यवह्रियते। एकस्या: राश्या: पञ्चमांश अपि 300 : 5 - 60 अंशात्मको भवितव्य: परञ्च अत्रापि समविषमराशि भेदेन पंचमांशोऽपि 50,70,80,50,50 तथा च 50,50,80,70,5 अंशेषु विभक्त:। तदनुसारं विषमराशौ अर्थात् मेषमिथुनसिंहतुलाध्ानुकुम्भराशिषु कुजादयो ग्रहा: पंचादीनां भागानामधिपतयो भवन्ति। तदनुसारं पंचभागा: कुजस्य भवन्ति। तदग्रिम: पंच भागा: रविजस्य अर्थात् शने: वर्तन्ते। तत: अष्टौ भागा: जीवस्य, तत: सप्तभागा: बुधस्य, तत: पञ्च भागा: शुक्रस्य भवन्ति। इमे त्रिंशांशेशा: कथ्यन्ते। समराशिषु वृष- कर्क- कन्यावृश्चिक- मकर- मीनराशिषु विपरीतरीत्या त्रिंशाशपा: भवन्ति। तत्रादौ पंच शुक्रस्य तत: परं सप्तबुधस्य तत: परमष्टौ जीवस्य । तत: परं पंच शने: तत: परं पंच भौमस्य अंशा: कथिता: । तद्यथा

कुजयमजीवज्ञसिता: पंचेन्द्रियवसुमुनीन्द्रयांशानाम्।

विषमेषु समक्षेषुत्क्रमेण त्रिंशांशपा: कल्प्या: ।।

वस्तुतस्तु कुजादय: पंचग्रहा: पंचतत्त्वानां द्योतका:। प्रकृति: समराशे: द्योतका: पुरुष: विषमराशे: द्योतक:। पुरुषेषु तेजसो बलस्य च प्राधान्यं भवति अत: विषमराशिषु तेजस्द्योतकभौमस्य प्रथमं स्थानं वर्तते। एवमेव प्रकृतौ रसस्य प्राधान्यं भवति अत: समराशिषु रसद्योतकशुक्रस्य प्रथमं स्थानं कथितम्।

उदाहरणम-

कस्यापि जन्माङ्ग सूर्यस्पष्टं- 7.200.100.08'' वर्तते। वृश्चिकराशे: गणना समराशिषु क्रियते। समराशौ विंशत्यंशपर्यन्तं बृहस्पते: त्रिंशांशो भवति तद्ग्रे पंचर्विवशत्यंशपर्यन्तं शने: त्रिंशांश: कथित:। एवं सूर्य: शने: त्रिंशांशो वर्तते। चक्र यथा-

विषमत्रिशांशाधिपचक्रम्          समत्रिंशांशाधिपचक्रम्

अंशः मेषः। मिथुनः सिंहः तुला द्य धनुः द्य कुम्भः

10.0 षड्वर्ग संज्ञा-

गृहहोराद्रेष्काणा नवभागो द्वादशांशकस्त्रिंशः।

वर्गः प्रत्येतवयो ग्रहस्य यो यस्य निर्दिष्टः।।

अनेन प्रकारेण लग्न-होरा- द्रेष्काण- नवमांश- द्वादशांश- त्रिंशांशाश्चेति षड्वर्गाः निरूपिताः। अमी षड्वर्गाः शुभकर्मसु शस्यन्ते। वस्तुतस्तु सूर्यादीनां सप्तग्रहाणां षड्-वर्गाः भवितुं न अर्हन्ति। यतोहि सूर्यचन्द्रयोः त्रिंशांशवर्गों न भवति। एवमेव भौमादीनां पंचताराग्रहाणां होरावर्गों न भवति। पंचवर्गास्तु सर्वेषां ग्रहाणां भवन्ति। पाराशरस्मृत्यानुसारं गुरुरविभौमाः सूर्यहोरायाः चन्द्रशुक्रशनयश्च चन्द्रहोरायाः फलं ददति। बुधः समराशौ स्याच्चेत् चन्द्रहोरायाः, विषमराशौ स्याच्चेत् सूर्यहोरायाः फलं ददाति। त्रिंशांशवर्गे भौमवत् सूर्यस्य, शुक्रवत् चन्द्रस्य च फलं वर्णितम्।।

सप्तांशेन युत्ते सति अमी षड्वर्गाः सप्तवर्गा अभिधीयन्ते। सप्तवर्गो दशमांशषोड-शांश- षष्ट्यंशयुतो दशवर्गसंज्ञकः परंच एषु सर्वेषु षड्वर्गस्य महत्त्वं सर्वाधिक वर्तते। षड्वर्गाणां प्रयोजनमपि वर्णितमाचार्यवराहमिहिरेण। वर्गाणां प्रयोगः सूक्ष्मफलबोधाय क्रियते। यदि कोऽपि ग्रहः षड्वर्गेषु प्रत्येकस्मिन् वर्गे स्वराशौ, मित्रराशौ स्वोच्चराशौ वा भवेत् तदा तस्य ग्रहस्य बलवृद्धिर्जायते। तदनुसारमेव ग्रहस्य संज्ञाऽपि कथिता। यदि कस्यापि ग्रहस्य षड्वर्गेषु त्रयः स्ववर्गाः भवन्ति तदा तस्य संज्ञा उत्तमः, चतुर्णां वर्गाणामैक्यं गोपुरसंज्ञक, पंचवर्गाणामैक्यं सिंहासनसंज्ञकं, षण्णां वर्गाणामैक्यं पारावतांशकसंज्ञकं भवति, वर्गद्वयमैक्यं पारिजातं कथ्यते। तद्यथा

उत्तमं तु त्रिवर्गैक्यं चतुवर्गन्तु गोपुरम्

वर्गपंचकसंयोगं सिंहासनमिहोच्यते।

वर्गद्वयं पारिजातं षण्णां पारावतांशकः।।

विषयसङ्ग्रहः

ज्योतिषशास्त्रस्याधारः राशि- नक्षत्र- ग्रहाश्च। अतः सर्वप्रथमं राशि- नक्षत्र- ग्रहाणां संक्षिप्तपरिचयः प्रदत्तः। राशिनक्षत्रयोः कः सम्बन्धः ? राशीनां ग्रहाणां च कः सम्बन्धः ? ज्योतिषशास्त्रे प्रवेशाय प्रथममेषां पारस्परिकसम्बन्धज्ञानमावश्यकम्। तदर्थमेव राशिन-ाक्षत्रयोः राशिग्रहयोश्च सम्बन्धः प्रतिपादितः। तदनन्तरं षड्वर्गो निरूपितः। षड्वर्गेषु गृहं-होराद्रेष्काण- नवमांश- द्वादशांश- त्रिंशाशश्चेति। षड्वर्गाणां साधनविधिः सोदाहरणं

सचक्र प्रतिपादिता। षड्वर्गाणां प्रयोजनमपि निरूपितम्

### यवनोक्तं मित्रामित्रम्

सूर्य चन्द्र-भौम-बुध-गुरु-शुक्र-शनीनां ग्रहाणां पारस्परिकी मित्रतादिरुच्यते। लोके यथा-प्रत्येक मनुष्यस्य कानिचित् मित्राणि भवन्ति, केचन शत्रवः भवन्ति। कैश्चन सह तस्य मध्यमसम्बन्धो भवति तथैव सूर्यादीनां ग्रहाणामपि पारस्परिकी मित्रता, शत्रुता, उदासीनता च विद्यते। ग्रहाणां मैत्रीविषये ज्योतिषशास्त्रस्य आचार्याणां प्रायः मतैक्यं वर्तते। सर्वे आचार्याः सत्याचार्यस्य मतमङ्गीकुर्वन्ति परञ्च यवनाचार्यस्य मतं भिन्नं वर्तते। तद्यथा

''मित्राण्यर्किज्जीवो ज्ञगुरु ज्ञसितौ विभास्करा विकुजाः।

वीन्द्वर्का विकुजरवीन्दवश्च केषांचिदरयोऽन्ये।।

यवनाचार्यस्य मतमिदं यत् सूर्यस्य मित्रं बृहस्पतिः, शेषाः चन्द्र-भौम-बुध-शुक्र-शनयश्च शत्रवः। चन्द्रस्य ।मित्रे गुरुबुधौ शेषाः सूर्य-भौम-शुक्र-शनयश्च शत्रवः। भौमस्य मित्रे बुधशुक्रौ शेषाः सूर्य-चन्द्र-गुरु-शनयश्च शत्रवः। बुधस्य रविं विहाय सर्वे ग्रहाः मित्राणि, सूर्य एव बुधस्य शत्रुः। जीवस्य भौमं विहाय सर्वे ग्रहाः मित्राणि, केवलं भौम एव जीवस्य शत्रुः। शुक्रस्य भौम-बुध-गुरु-शनयश्च मित्राणि, रविचन्द्रौ शुक्रस्य शत्रू। शनेः बुध-गुरु-शुक्राश्च मित्राणि, रविचन्द्रभौमाश्च शत्रवो वर्तन्ते। यवनाचार्यस्य मतमिदं यत् ग्रहाणां पारस्परिकः कदापि समभावो न भवति। तेषां पारस्परिकः मित्रसम्बन्धो भवति, शत्रुसम्बन्धो वा भवति। तन्मते लोकेऽपि मनुष्याणां मित्राणि अथ च शत्रव एव भवन्ति। अतः यवनाचार्येणापि ग्रहाणां पारस्परिकानि मित्राणि शत्रवश्च वर्णिताः, न तु तं तं ग्रह प्रति समभावशालिनो ग्रहा उक्ताः चक्रेणानेन ज्ञायते - यवनाचार्य मतमिदं प्रचलितं नास्ति, इदानीं सत्याचार्यस्य मतं प्रस्तूयते।

### सत्योक्तानि मित्रामित्राणि

ग्रहाणां मित्रामित्रसम्बन्धस्य विषये सत्याचार्यस्य मतमेव सर्वमान्यं वर्तते। तदनुसारं ग्रहाणां मैत्री द्विविधा-नैसर्गिकी मैत्री तात्कालिकी मैत्री च। द्वयोः सम्मेलनेन ''पञ्चधा मैत्रीश्श् चक्रम् निर्मीयते। सर्वप्रथमं नैसर्गिकी मैत्री वर्म्यते।

### ग्रहाणां नैसर्गिकी मैत्री

लोके यथा मनुष्याणां नैसर्गिकानि मित्रामित्राणि भवन्ति तथैव ग्रहाणामपि मित्रामित्राणि भवन्ति। नैसर्गिक मित्रं नाम स्वाभाविक मित्रम्। यथा माता अस्माकं नैसर्गिक मित्रम्, पिता अस्माकं नैसर्गिक मित्रम्, पुनश्च गुरुरपि अस्माकं नैसर्गिक मित्रम् भवति।

अस्माकं केचन सम्बन्धिनः मित्राणि च एतादृशानि भवन्ति ये कदापि अस्माकं

अहितं न कामयन्ते। ते सर्वे अस्माकं नैसर्गिकानि मित्राणि भवन्ति। ये कारणं बिनाऽपि अस्मभ्यं हितं इच्छन्ति ते सर्वे अस्माकं नैसर्गिकानि मित्राणि भवन्ति। ये अकारणेन अस्मभ्यं अहितं इच्छन्ति ते सर्वे अस्माकं नैसर्गिकाः शत्रवश्च भवन्ति। केचन जना लोके एतादृशाऽपि भवन्ति, ते न तु अस्माकं मित्राणि भवन्ति, न तु अस्माकं शत्रवो भवन्ति। ते अस्मान् प्रति समभाविनो भवन्ति। ते तटस्थरूपेण अस्माभिः सह आचरन्ति, ग्रहाणामपि तथैव नैसर्गिकानि मित्राणि, नैसर्गिकाश्च शत्रवः, नैसर्गिकाः समभाविनश्च ग्रहाः भवन्ति। तदनुसारं सूर्यस्य चन्द्र-भौम-गुरवश्च नैसर्गिकाणि मित्राणि, बुधः समः, शनिशुक्रौ शत्रू भवतः। चन्द्रस्य रविबुधौ मित्रे, अवशिष्टाः समाः भवन्ति। चन्द्रस्य एकोऽपि शत्रुः नास्ति। भौमस्य शुक्र-शनी समौ, बुधः शत्रुः, गुरु-चन्द्र-सूर्याःमित्राणि भवन्ति। बुधस्य रविशुक्रौ मित्रे, चन्द्रः शत्रुः, रवि-भौम-गुरवश्च मित्राणि भवन्ति। जीवस्य बुध-शुक्रौ शत्रू, शनि समः, अवशिष्टाः रवि-भौम-गुरवश्च मित्राणि भवन्ति। शुक्रस्य बुध-शनी मित्रे, भौम-जीवौ समौ, रविचन्द्रौ शत्रू कथितौ। शनेः शुक्रबुधौ मित्रे, कुजजीवौ समौ, सूर्यचन्द्रौ शत्रू भवतः। तद्यथा

शत्रु मन्दसितौ समश्च शशिजो मित्राणि शेषा रवे-
स्तीक्ष्णांशुर्हिमरश्मिजश्च सुहृदौ शेषाः समाः शीतगोः।
जीवेन्दूष्णकराः कुजस्य सुहृदौ ज्ञोऽरिः सितार्की समौ
मित्रे सूर्यसितौ बुधस्य हिमगुः शत्रुः समाश्चापरे।।
सूरेः सौम्यसितावरी रविसुतो मध्योऽपरे त्वन्यथा ।
सौम्या सुहृदौ समौ कुजगुरु शुक्रस्य शेषावरी।।
शुक्रज्ञौ सुहृदौ समः सुरगुरुः सौरेस्तथान्येऽरय-
स्तत्काले च दशाऽयबन्धुसहजस्वाऽन्त्येषु मित्रं स्थितः।।

एवं सत्याचार्येण नैसर्गिकाणि मित्राणि, नैसर्गिकाः समाः नैसर्गिकाः शत्रवश्च वर्णिताः। केचन ग्रहा एतादृशा अपि सन्ति येषां परस्परं मैत्रीभावः शत्रुभावो वा नास्ति। केचन ग्रहा एतादृशाः सन्ति येषां परस्परं मैत्रीभावः शत्रुभावो वा विद्यते यथा शनिसूर्ययोः शत्रुता प्रसिद्धा। रविशुक्रयोरपि पारस्परिकी शत्रुता वर्तते। एवमेव केचन ग्रहाः नैसर्गिकरूपेणैव पारस्परिकाणि मित्राणि। यथा-रवि-कुज-जीवाः पारस्परिकाणि मित्राणि सन्ति। कदाचित् एवमपि भवति यत् मैत्री द्विपक्षीया न भवति, एकपक्षीया एव भवति। भौमचन्द्रयोः जीवचन्द्रयोश्च मैत्री एकपक्षीया वर्तते। भौमजीवौ चन्द्र प्रति मैत्रीभावयुत्तौ परञ्च चन्द्रः भौमजीवौ प्रति समभावयुक्तः वर्तते रविचन्द्रयोस्तु पारस्परिकी मैत्री प्रसिद्धा। एकपक्षीया मैत्री रविबुधयोरपि वर्तते। सूर्यः बुधस्य मित्रं, परञ्च बुधः सूर्य प्रति समभावशाली

वर्तते। एवमेव बुधः शनेः मित्रं परञ्च शनिः बुधं प्रति समभावशाली वर्तते केषाञ्चन ग्रहाणां पारस्परिकः समभावो विद्यते। यथा शुक्रभौमयोः पारस्परिकः समभावो विद्यते। एवमेव शनिजीवयोरपि पारस्परिकः समभावो विद्यते। यथा मैत्री एकपक्षीया भवति, तथैव शत्रुता एकपक्षीयाऽपि भवति। यथा-शनिचन्द्रयोः शुक्रचन्द्रयोश्च शत्रुता एकपक्षीया वर्तते। चन्द्रः शनिशुक्रयोः शत्रुः परञ्च शनिशुक्रौ चन्द्रं प्रति समभावशालिनौ वर्तेते। एवमेव शनिः भौम प्रति समभावशाली परञ्च भौमः शनेः शत्रुः वर्तते। बुधभौमयोः बुधजीवयोश्चापि शत्रुता एकपक्षीया वर्तते। बुधः भौमजीवयोः शत्रुः परञ्च भौमजीवौ बुधं प्रति समभावशालिनौ मन्येते। ग्रहाणां नैसर्गिकी मैत्री चक्रेणानेन ज्ञायते। तद्यथा-

ज्योतिषशास्त्रस्य प्रायशः सर्वे आचार्याः सत्याचार्योत्तं ग्रहमैत्रीचक्र स्वीकुर्वन्ति। बृहज्जातके वराहमिहिराचार्येण सत्याचार्यस्य मतमपि प्रदत्तम् एतन्मतानुसारं मैत्रीचक्रस्य निर्माण सत्याचार्येण कृतम्। मतमिदं वर्तते -

"सत्योत्ते सुहृदस्त्रिकोणे भवनात्स्वात्स्वान्त्यधीधर्मपाः।

द्य स्वोच्चायुः सुखपाः स्वलक्षणविधेर्नान्यैर्विरोधादिति।।

होराशास्त्रे सूर्यादीनां ग्रहाणां मूलत्रिकोणस्थानानि कथितानि। तद्यथा-

''सिंहो वृषः प्रथमषष्ठहयाङ्गतौलि-

कुम्भास्त्रिकोणभवनानि भवन्ति सूर्यात्''।।

स्वत्रिकोणभवनात् द्वितीयस्थानाधिपः, द्वादशस्थानाधिपः पञ्चमस्थानाधिपः, नवमाधिपः, अष्टमस्थानाधिपः, चतुर्थस्थानाधिपतिः, प्रकृतग्रहस्य उच्चस्थानस्य स्वामी च ग्रहस्य मित्राणि भवन्ति। अन्यस्थानाधिपाः ये ग्रहास्ते ग्रहस्य मित्राणि न भवन्ति। केचन ग्रहाः द्विराश्याधिपाः सन्ति। तेषां ग्रहाणां द्वौ राशी एव यदि कस्मादपि ग्रहात् पूर्वोत्तेषु सुहृदभवनेषु भवेताम् तदा सो ग्रहः तस्य ग्रहस्य मित्रं, एक एव राशिः पूर्वोत्तेषु सुहृदभवनेषु भवेच्चेत्, सो ग्रहः तस्य ग्रहस्य समः एकोऽपि राशिः पूर्वोत्तेषु सुहृदभवनेषु न भवेच्चेत् सो ग्रहः तस्य प्रकृतग्रहस्य शत्रुर्भवतीति। उदाहरणं यथा-

सूर्यस्य मूलत्रिकोण सिंहः। तस्माद्द्वादशस्थाने कर्कटः। कर्कटस्याधिपतिः चन्द्रः। सश्च चन्द्र एकराश्याधिपः तस्मादेव चन्द्रः सूर्यस्य मित्रम्। सिंहाच्चतुर्थराशिः वृश्चिकः नवमो मेषः। तयो द्वयोरेव भौमोऽधिपतिः। पुनश्च सूर्यस्योच्चोऽपि मेषः, तस्यापि भौमोऽधिपतिः। अत एव भौमः सूर्यस्य मित्रम्। सिंहात्पञ्चमाष्टमौ धन्विमीनौ तयोः द्वयोरधिपतिः बृहस्पतिः। अतः बृहस्पतिरपि सूर्यस्य मित्रम् सिंहाद्द्वितीयैकादशौ कन्यामिथुनौ, तयोः स्वामी बुधः। द्वयोः स्थानयोः द्वितीय स्थानं सुहृदस्थानेषु कथितं एकादशस्थानं न कथितम्। पूर्वोत्तेषु सुहृदस्थानेषु बुधस्य एकस्य एव राशेः स्थितिः वर्तते। अतः बुधो रवेर्मध्यमः।

सिंहात् षष्ठे स्थाने सप्तमे च स्थाने मकरकुम्भौ स्तः। द्वावेव सुहृदस्थानेषु नोत्तौ। अतः द्वयोरधिपतिः शनैश्चरः सूर्यस्य शत्रुः। एवमेव सिंहाद्दशमे तृतीये च स्थाने वृषतुले। द्वावेव सुहृदस्थानेषु नोत्तौ। अतः द्वयोरधिपतिः शुक्रोऽपि सूर्यस्य शत्रुः।

चन्द्रस्य मूलत्रिकोणमस्ति वृषः। तस्माच्चतुर्थस्थानं सिंहस्तस्याधिपः सूर्यः। द्वितीय-राशेराभावात् सूर्यः चन्द्रस्य मित्रम्। वृषादिद्वतीये मिथुनः पञ्चमस्थानं कन्या च।

द्वयोरधिपतिः बुधः। स्थानद्वयमेव सुहृदस्थानेषु उत्तम्। अतः बुधोऽपि चन्द्रस्य मित्रम्। वृषात् सप्तमे द्वादशे च स्थाने वृश्चिकमेषौ। एतयोः एकस्य एव द्वादशस्थानस्य परिगणनं सुहृत्भवनेषु कृतम्। अतः भौमश्चन्द्रस्य मध्यमः वृषादष्टमे एकादशे च स्थाने धन्विमीनौ। एतयोरपि केवलं अष्टमस्थानस्य परिगणनं सुहृत्स्थानेषु कृतम्। अतः एतयोरधिपतिः बृहस्पतिः चन्द्रस्य मध्यमः। वृषात् प्रथमे षष्ठे च स्थाने शुक्रस्य वृषतुले। द्वयोरपि स्थानयोः परिगणनं सुहृत्स्थानेषु न कृतं, परञ्च चन्द्रस्योच्चराशिः वृष एव। एकस्य राशेः सुहृत्स्थानेषु गणना कृता। अतः शुक्रः चन्द्रस्य मध्यमः। वृषान्नवमदशमौ मकरकुम्भौ वर्तेते। तयोः द्वयोः केवलं नवमस्थानस्य परिगणनं कृतं अपरस्य न कृतम्। अतः शनिरपि चन्द्रस्य मध्यमः।

भौमस्य मूलत्रिकोणमस्ति मेषः। मेषाच्चतुर्थस्थानस्याधिपश्चन्द्रः। चतुर्थस्थाने सुहृत्स्थानेषु गणितम्। अतः चन्द्रो भौमस्य मित्रम्। मेषात् पञ्चमस्य सिंहस्याधिपतिः सूर्यः। पञ्चमस्थानस्य सुहृत्स्थानेषु गणनात्वात् सूर्योऽपि भौमस्य मित्रम्। मेषात् तृतीये षष्ठे च स्थाने मिथुनकन्ये। द्वयोरपि स्थानयोः गणना सुहृत्स्थानेषु न कृता। अतः बुधो भौमस्य शत्रुः। मेषाद्वितीये सप्तमे च स्थाने वृषतुले। द्वयोः स्थानयोः गणना सुहृत्स्थानेषु कृता। अतः बृहस्पतिः भौमस्य मित्रम् मेषाद्दशमे एकादशे च स्थाने मकरकुम्भौ वर्तेते। द्वयोरपि स्थानयोः गणनं सुहृत्स्थानेषु न कृतम्। परञ्च भौमस्योच्चराशिः मकर एव अतः मकरस्य सुहृत्स्थानेषु गणना कृता, अत एव शनिः भौमस्य मध्यमः।

बुधस्य मूलत्रिकोणं कन्या। तस्माद्वादशस्थानस्य सिंहस्याधिपतिः सूर्यः। सूर्यस्य द्वितीयराशेराभावात् पुनश्च द्वादशस्थानस्य सुहृत्स्थानेषु परिगणनाऽपि कृता, अतः सूर्योऽस्ति बुधस्य मित्रम्। कन्यायाः द्वितीयनवमौ तुलावृषभौ। तयोः द्वयोरपि शुक्रोऽधिपतिः, द्वयोरपि स्थानयोः गणनं सुहृत्स्थानेषु कृता। अतः बृहस्पतिः भौमस्य मित्रम्। मेषाद्दशमे एकादशे च स्थाने मकरकुम्भौ वर्तेते। द्वयोरपि स्थानयोः गणनं सुहृत्स्थानेषु न कृतम्। परञ्च भौमस्योच्चराशिः मकर एव। अतः मकरस्य सुहृत्स्थानेषु गणना कृता, अत एव शनिः भौमस्य मध्यमः।

बुधस्य मूलत्रिकोणं कन्या। तस्माद्वादशस्थानस्य सिंहस्याधिपतिः सूर्यः। सूर्यस्य द्वितीयराशेराभावात् पुनश्च द्वादशस्थानस्य सुहृत्स्थानेषु परिगणनाऽपि कृता, अतः सूर्योऽस्ति

बुधस्य मित्रम्। कन्यायाः द्वितीयनवमौ तुलावृषभौ। तयोः द्वयोरपि शुक्रोऽधिपतिः, द्वयोरपि स्थानयोः गणनं सुहृत्स्थानेषु कृतम् अतः शुक्रोऽपि बुधस्य मित्रम्। कन्याया एकादशस्थानस्याधिपतिः चन्द्रः। एकादशस्थानस्य गणना सुहृत्स्थानेषु न कृता, अतः चन्द्रः बुधस्य शत्रुः। कन्यायाः तृतीय स्थाने अष्टमे च स्थाने वृश्चिकमेषौ। तयोः द्वयोराधिपतिः भौमः। द्वयोः स्थानयोः केवलं अष्टमस्थानस्य परिगणनं सुहृत्स्थानेषु कृतम्, अतः भौमो बुधस्य मध्यमः। कन्यायाश्चतुर्थे सप्तमे च स्थाने धन्विमीनौ। तयोः द्वयोरधिपतिः बृहस्पतिः। द्वयोः स्थानयोः केवलं चतुर्थस्थानस्य गणना सुहृत्स्थानेषु कृता। अतः जीवोऽपि बुधस्य मध्यमः। कन्यायाः पञ्चमे षष्ठे च स्थाने मकरकुम्भौ। द्वयोरधिपतिः शनिः द्वयोः स्थानयोः केवलं पञ्चमस्थानस्य गणना सुहृत्स्थानेषु कृता। अतः निरपि बुधस्य मध्यमः।

जीवस्य मूलत्रिकोणमस्ति धनुः। तस्मादष्टमस्थानस्य कर्कटस्याधिपश्चन्द्रः। चन्द्रस्य द्वितीयराशेराभावात्, पुनश्च अष्टमस्थानस्य सुहृत्स्थानेषु गणनात्वात् चन्द्रः बृहस्पतेः मित्रम्। धनुराशेः नवमस्थानस्य सिंहस्याधिपतिः सूर्यः। सूर्यस्यापि द्वितीयराशेराभावात् पुनश्च नवमस्थानस्यापि सुहृत्स्थानेषु गणनत्वात् सूर्योऽपि जीवस्य मित्रम्। धनुः राशेः पञ्चमद्वादशौ मेषवृश्चिकौ। तयोरधिपतिः भौमः। स्थानद्वयमेव सुहृत्स्थानेषु कथितम्। अतः भौमोऽपि जीवस्य मित्रम्। धनुराशेः द्वितीयतृतीयौ मकरकुम्भौ। द्वयोः स्थानयोः केवलं द्वितीयमेव सुहृत्स्थानेषु कथितम्। अतः तयोरधिपतिः शनैश्चरः बृहस्पतेः मध्यमः। धनुःराशेः षष्ठैकादशस्थाने वृषतुले। स्थानद्वयमेव सुहृत्स्थानेषु नोक्तम्। अतः तयोरधिपतिः शुक्रः जीवस्य शत्रुः।

शुक्रस्य मूलत्रिकोणमस्ति तुला। तुलायाः नवमे स्थाने द्वादशे च स्थाने मिथुनकन्ये। स्थानद्वयमेव सुहृत्स्थानेषु गदितम्। अतः तयोरधिपतिः बुधः शुक्रस्य मित्रम्। तुलायाश्चतुर्थे पञ्चमे च स्थाने मकरकुम्भौ। स्थानद्वयमेव सुहृत्स्थानेषु वर्णितम्। अतः तयोरधिपतिः शनिः अपि शुक्रस्य मित्रम्। तुलायाः द्वितीये सप्तमे च स्थाने वृश्चिकमेषौ। द्वयोः स्थानयोः केवलं द्वितीयस्थानस्य गणना सुहृत्स्थानेषु कृता। अतः तयोरधिपतिः भौमः शुक्रस्य मध्यमः। तुलायाः तृतीये षष्ठे च स्थाने धन्विमीनौ। स्थानद्वयमेव सुहृत्स्थानेषु नोक्तम्। परञ्च शुक्रस्योच्चराशिः मीनो वर्तते। स्वोच्चोऽपि सुहृदः कथितः अतः मीनस्य सुहृत्स्थानेषु गणनत्वात् जीवः शुक्रस्य मध्यमः। तुलाया एकादशः सिंहः। एकादशस्थानस्य गणनाऽपि सुहृत्स्थानेषु न कृता। अतः कर्कटस्याधिपतिः चन्द्रोऽपि शुक्रस्य शत्रुः।

शनेः मूलत्रिकोणमस्ति कुम्भः। कुम्भात् पञ्चमे अष्टमे च स्थाने मिथुनकन्ये। स्थानद्वयमेव सुहृत्स्थानेषु परिगणितम्। अतः तयोरधिपः बुधः शनेः मित्रम्। कुम्भाद्द्वितीये एकादशे च स्थाने धन्विमीनौ। द्वयोः केवलं द्वितीयस्थानस्य गणना सुहृत्स्थानेषु कृता। अतः तयोरधिपतिः जीवः शनेः मध्यमः। कुम्भात् षष्ठस्थाने कर्कटः। षष्ठस्थानस्य

गणना सुहृत्स्थानेषु न कृता, अत एव चन्द्रः शनेः शत्रुः। कुम्भात् सप्तमे स्थाने सिंहः। सप्तमस्थानस्य गणनाऽपि सुहृतृस्थानेषु न कृता। अतः सिंहस्याधिपः सूर्योऽपि शनेः शत्रुः। कुम्भात् तृतीये दशमे च स्थाने मेषवृश्चिकौ। स्थानद्वयोः गणना सुहृत्स्थानेषु न कृता। अतः तयोरधिपतिः भौमोऽपि शनेः शत्रुरिति। कुम्भात् चतुर्थे स्थाने अष्टमे च स्थाने वृषतुले। स्थानद्वयोरपि गणना सुहृत्स्थानेषु कृता। अतः तयोरधिपतिः शुक्रः शनेः मित्रम्।।

अनेन प्रकारेण ग्रहाणां नैसर्गिकी मैत्री वर्णिता। इदानीं तात्कालिकी मैत्री कथ्यते।

**तात्कालिकी मैत्री**

इदानीं तातकालिकी मैत्री व्याख्यायते। ग्रहाणां नैसर्गिकी मैत्री निश्चिता भवति। यथा-शनिसूर्ययोः शत्रुता नैसर्गिकी वर्तते। कुण्डल्या ग्रहाणां स्थितिभेदेन ग्रहाणां नैसर्गिकीमैयां भेदो न उत्पद्यते। नैसर्गिकी मैत्री सर्वेभ्यः सदैकरूपा भवति परञ्च तात्कालिकी मैत्री सदैकरूपा न भवति। जन्मकालभेदेन ग्रहाणां तात्कालिकमित्रामित्रयोरपि भेदो भवति। अतः तात्कालिकी मैत्री सर्वेभ्यः भिन्ना भिन्ना भवति। अस्य आधारः कस्यापि जनविशेषस्य जन्मकुण्डली भवति। कस्यापि जन्माङगे कस्मादपि ग्रहात् दशमैकादशचतुर्थतृतीयद्वितीयद्वादशस्थानेषु स्थिताः ग्रहाः प्रकृतग्रहस्य मित्राणि भवन्ति। तद्भिन्नस्थानेष्ववस्थिताः ग्रहाः शत्रवः। तद्यथा

"तत्काले च दशाऽयबन्धुसहजस्वाऽन्त्येषु मित्रं स्थितः"

एकादशस्थानं आयस्थानं, चतुर्थं स्थानं बन्धुस्थानं, तृतीयं स्थानं सहजस्थानं, द्वितीयं स्थानं स्व इति कथ्यते। अतः 10/11/4/3/2/12 स्थानेषु स्थिताः ग्रहाः मित्राणि उच्यन्ते। इदानीं तात्कालिकाः शत्रवः कथ्यन्ते। जन्मकुण्डल्यां कस्मादपि ग्रहात् 6/9/5/8/1/7 स्थानेषु स्थिताः ग्रहाः, पुनश्च कस्यापि ग्रहस्य मूलत्रिकोणराशौ स्थिताः ग्रहा प्रकृतग्रहस्य शत्रव इति।

तद्यथा

''मूलत्रिकोणषष्ठत्रिकोणनिधनैकराशिसप्तमगाः।

एकैकस्य यथा सम्भवन्ति तात्कालिका रिपवः।।

कस्यापि ग्रहस्य मूलत्रिकोणराशौ स्थिताः ग्रहाः शत्रवः, पुनश्च कस्मादपि ग्रहात् षष्ठे-नवमे-पञ्चमे-अष्टमे-सप्तमे-प्रथमे च स्थाने स्थिताः ग्रहाः प्रकृतग्रहस्य शत्रवः भवन्ति। तात्कालिकीमैयां मित्राणि-रिपवश्च भवन्ति। ग्रहाणां पारस्परिको मध्यमभावो न भवति। ग्रहाणां तात्कालिकी मैत्री चक्रेणानेन ज्ञायते।

एतन्मतमनुसारं कस्यापि ग्रहस्य मूलत्रिकोणराशौ स्थिताः ग्रहाः तस्य ग्रहस्य शत्रवो

भवन्ति परञ्च मतमिदं सर्वमान्यं न वर्तते। अन्येषां मतमनुसारं मूलत्रिकोणस्थो ग्रहः शत्रुः न भवतीति। तद्यथा-

"दशबन्ध्वायसहजस्वान्त्यस्थास्ते परस्परम्।।

तत्काले मित्रतां यान्ति रिपवोऽन्यत्र संस्थिताः।।

जन्माङ्गेऽस्मिन् सूर्यः पञ्चमभावस्थितः। सूर्यात् एकादशे स्थाने स्थितौ शनिभौमौ मित्रे, द्वादशे स्थाने स्थितः शुक्रोऽपि मित्रम्। सूर्यात् प्रथम स्थाने पञ्चमे स्थाने च स्थिताः बुध-गुरु-सोमाश्च सूर्यस्य रिपवः।।

कुण्डल्यामस्यां चन्द्रः मेषराशौ नवमभावस्थः। चन्द्रात् सर्वे ग्रहाः सप्तमाष्टमनवमस्थानेषु स्थिताः। अतः सर्वे ग्रहाः चन्द्रस्य तात्कालिकाः शत्रवः।

कुण्डल्यामस्यां भौमः तृतीयभावस्थितः। भौमात् द्वितीये तृतीये च स्थानस्थिताः शुक्र-सूर्य-गुरु-बुधाः-भौमस्य मित्राणि, प्रथमे सप्तमे च स्थाने स्थितौ शनिचन्दौ शत्रू।।

बुधः कुण्डल्यामस्यां धनुराशौ पञ्चमभावस्थः। बुधात् एकादशे द्वादशे च स्थाने स्थिताः शनिभौमशुक्राश्च तात्कालिकमित्राणि, प्रथमे पञ्चमे च स्थाने स्थिताः सूर्यगुरुचन्द्राश्च शत्रवः।

बृहस्पतिः कुण्डल्यामस्यां धनुराशौ पञ्चमभावस्थः। बृहस्पतेः एकादशे द्वादशे च स्थाने स्थिताः शनि-भौम-शुक्राश्च तात्कालिकमित्राणि, प्रथमे पञ्चमे च स्थाने स्थिताः सूर्यबुधसोमाश्च तात्कालिकाः शत्रवः।

शुक्रः कुण्डल्यामस्यां वृश्चिकराशौ चतुर्थभावस्थः। शुक्रात् द्वितीये एकादशे द्वादशे च स्थाने स्थिताः सूर्य-गुरु-बुध-शनि-भौमाश्च शुक्रस्य तात्कालिकमित्राणि, पञ्चमे स्थाने स्थितः चन्द्रः तात्कालिकशत्रु इति।। ।

शनिः कुण्डल्यामस्यां तुलाराशौ तृतीयभावस्थितः। शनेः तात्कालिकशत्रु इति। एवं जन्माङ्गेऽस्मिन् ग्रहाणां तात्कालिकी मैत्री वर्णिता। तात्कालिकी मैत्री चक्रेणानेन ज्ञायते

**पञ्चधामैत्रीविचारः**

ग्रहाणां मैत्री द्विविधा-नैसर्गिकी तात्कालिकी च। द्वयोः का ग्राह्या। यतोहि यो ग्रहः नैसर्गिकीमै।।यां कस्यापि ग्रहस्य मित्रं स एव ग्रहः तात्कालिकीमै।।यां तस्यैव ग्रहस्य शत्रुः अपि भवितुं शक्यते। अतः द्वयोः कस्य प्रधानत्वं कस्य च गौणत्वम्। वराहमहिराचार्येण स्वकीये लघुजातके अस्याः समस्यायाः निवारणाय पञ्चधामैत्रीचक्र प्रदत्तम्। पञ्चधामैत्रीचक्रे तात्कालिकमैत्रीचक्रस्य नैसर्गिकमैत्रीचक्रस्य च सम्योजनं कृतम्। नैसर्गिकमैत्रीचक्रे यदि क्वेऽपि ग्रहः मित्रं, तात्कालिकमैत्रीचक्रेऽपि यदि सो

ग्रहो मित्रं वर्तते, तदा पञ्चधामैत्रीचक्रे सो ग्रहः अधिमित्रं भवति। तात्कालिकमैत्रीचक्रे यदि सः ग्रहः शत्रुः तदा पञ्चधामैत्रीचक्रे सो ग्रहः समः कथ्यते। नैसर्गिकमैत्रीचक्रे यो ग्रहः समः, तात्कालिकमैत्रीचक्रे यदि सः मित्रं, तदा पञ्चधामैत्रीचक्रेऽपि सो ग्रहः मित्रं भवति, तात्कालिकमैत्रीचक्रे यदि सः शत्रुः, तदा पञ्चधामैत्रीचक्रेऽपि सः शत्रुः भवति। नैसर्गिकमैत्रीचक्रे यदि कोऽपि ग्रहः शत्रुः, तात्कालिकमैत्रीचक्रे यदि सो ग्रहः मित्रं, तदा पञ्चधामैत्रीचक्रे सो ग्रहः समः भवति, तात्कालिकमैत्रीचक्रे यदि सो ग्रहः शत्रुः तदा पञ्चधामैत्रीचक्रे सो ग्रहः अधिशत्रुः जायते। तद्यथा

मित्रमुदासीनौऽरिव्यख्याता ये निसर्गभावेन

तेऽधिसुहृनमित्रसमास्तत्कालमुपस्थिताश्चिन्त्याः।।

नैसर्गिकी मैत्री चक्रमाध्यमेन स्पष्टीकृता। पूर्वोत्तजन्माङ्गस्य तात्कालिकी मैत्री अपि प्रदत्ता। इदानीं उभयोः सम्योजनेन पञ्चधामैत्रीचक्र निर्मीयते। तद्यथा

पञ्चधामैत्रीचक्रे सूर्यादीनां ग्रहाणां अधिमित्राणि, मित्राणि, समाः, शत्रवः, अधिशत्रवश्च प्रदत्ताः। यथा नैसर्गिकमैत्रीचक्रे चन्द्रभौमजीवाः सूर्यस्य मित्राणि, तात्कालिकमैत्रीचक्रे चन्द्रजीवौ सूर्यस्य शत्रू, भौमः मित्रं, अतः पञ्चधामैत्रीचक्रे चन्द्रजीवौ सूर्यस्य मध्यमौ, भौमः अधिमित्रं। बुधः नैसर्गिकमैत्रीचक्रे मध्यमः, तात्कालिकमैत्रीचक्रे शत्रुः, अतः पञ्चधामैत्रीचक्रे अपि शत्रुः। शनि शुक्रौ नैसर्गिकमैत्रीचक्रे शत्रू, तात्कालिकमैत्रीचक्रे च मित्रे, अतः पञ्चधामैत्रीचक्रे सूर्यस्य मध्यमौ।

नैसर्गिकमैत्रीचक्रे रविबुधौ चन्द्रस्य मित्रे, तात्कालिकमैत्रीचक्रे च शत्रू, पञ्चधामैत्रीचक्रे च मध्यमौ, भौमगुरुशुक्रशनयश्च नैसर्गिकमैत्रीचक्रे चन्द्रस्य मध्यमाः, तात्कालिकमैत्रीनक्रे शत्रवः, अतः पञ्चधामैत्रीचक्रेऽपि शत्रवः।

नैसर्गिकमैत्रीचक्रे रविचन्द्रगुरवः भौमस्य मित्राणि, तात्कालिकमैत्रीचक्रे रविजीवौ मित्रे, चन्द्रश्च शत्रुः, अतः पञ्चधामैत्रीचक्रे रविजीवौ अधिमित्रे, चन्द्रः मध्यमः। नैसर्गिकमैत्रीचक्रे शुक्रशनी भौमस्य मध्यमौ, तात्कालिकमैत्रीचक्रे शुक्रः मित्रं, शनिः शत्रुः, अतः पञ्चधामैत्रीचक्रेऽपि शुक्रः मित्रं, शनिः शत्रुः। नैसर्गिकमैत्रीचक्रे बुधो भौमस्य शत्रुः, तात्कालिके मैत्रीचक्रे च मित्रं, अतः पञ्चधामैत्रीचक्रे मध्यमः।

नैसर्गिकमैत्रीचक्रे रवि शुक्रौ बुधस्य मित्रे, भौमजीवशनयश्च मध्यमाः, चन्द्रः शत्रुः। तात्कालिकमैत्रीचक्रे शनिभौमशुक्राश्च बुधस्य मित्राणि, सूर्यचन्द्रगुरवश्च शत्रवः। अतः पञ्चधामैत्रीचक्रे शुक्रः बुधस्याधिमित्रं, भौमशनी मित्रे, सूर्यः मध्यमः, बृहस्पतिः शत्रुः, चन्द्रः अधिशत्रुश्चेति।

नैसर्गिकमैत्रीचक्रे रविचन्द्रभौमाः जीवस्य मित्राणि, शनिः मध्यमः, बुधशुक्रौ शत्रू।

तात्कालिकमैत्रीचक्रे शनिभौमशुक्राश्च जीवस्य मित्राणि, रविचन्द्रबुधाश्च शत्रवः। अतः

पञ्चधामैत्रीचक्रे भौमः जीवस्याधिमित्रं, शनिः मित्रं, सूर्यचन्द्रशुक्राश्च मध्यमाः, बुधः अधिशत्रुश्चेति।

नैसर्गिकमैत्रीचक्रे बुधशनी शुक्रस्य मित्रे, भौमजीवौ मध्यमौ, रविचन्द्रो शत्रू। तात्कालिकमैत्रीचक्रे सूर्यभौमबुधगुरुशनयश्च शुक्रस्य मित्राणि, चन्द्रः शत्रुः। अतः पञ्चधामैत्रीचक्रे बुधशनी अधिमित्रे, भौमजीवौ मित्रे, सूर्यः मध्यमः, चन्द्रोऽधिशत्रुश्चेति।

नैसर्गिकमैत्रीचक्रे शुक्रबुधौ शनेः मित्रे, बृहस्पतिः मध्यम, रविचन्द्रभौमाश्च शत्रवः। तात्कालिकमैत्रीचक्रे सूर्यबुधगुरुशुक्राश्च शनेः मित्राणि, चन्द्रभौमौ शत्रू। अतः पञ्चधाम-त्रीचक्रे शुक्रबुधौ शनेः अधिमित्रे, बृहस्पतिः मित्रं, सूर्यः मध्यमः, चन्द्रभौमौ अधिशत्रू।

विषय-सङ्ग्रहः

पाठ्यांशेऽस्मिन् ग्रहमैत्री प्रतिपादिता। ग्रहाणां मित्रामित्रविषये मतद्वयं प्रचलितम्। प्रथम यवनाचार्यस्य द्वितीयं तु सत्याचार्यस्य। यवनाचार्यस्य मतमनुसार ग्रहाणां मित्राणि-शत्रवश्च भवन्ति। तन्मते ग्रहाणां पारस्परिको मध्यमभावो न भवति। परञ्च सत्याचार्यस्य मतमिदं यत् ग्रहाः परस्परं मित्राणि, समाः, शत्रवश्च भवन्ति। पुनश्च मैत्री द्विविधा-नैसर्गिकी मैत्री तात्कालिकी मैत्री च। उभयोः संयोजनेन पञ्चधामैत्रीचक्र निर्मीयते। ग्रहाणां मित्रामित्रज्ञानं आवश्यक वर्तते। मित्रामित्रज्ञानेन बिना कस्यापि ग्रहस्य दशान्तर्दशाफलं वक्तुमेव न शक्यते। अतः पाठ्यांशेऽस्मिन् मया यवनाचार्यस्य मतं, सत्याचार्यस्य मतं, नैसर्गिकी मैत्री, तात्कालिकी मैत्री, पञ्चधामैत्री च सोदाहरणं सचक्रञ्च प्रतिपादिताः।

**ग्रहाणां बलाबलज्ञानाय**

ज्योतिषशास्त्रस्य होरास्कन्धान्तर्गतं जातकशास्त्रे कस्यापि मनुष्यस्य भविष्यसम्ब-न्धिशुभाशुभं निर्णीयते। कस्यापि मनुष्यस्य भाविजीवने किम् सम्भाव्यम्?इति अनायासेन वक्तुं न शक्यते। तदर्थ तस्य जनस्य जन्माङ्गे ग्रहाः केषु भावेषु सन्ति? तेषां पारस्परिको युति-दृष्ट्यादिसम्बन्धः कीदृशः ? ते कस्मिन् राशौ वर्तन्ते ? तेषामवस्था का? ग्रहाणां तात्कालिक गोचरम् किम्। ?के ग्रहाः बलिनः, के च निर्बलाः ? इत्यादीनां विषयाणां चिन्तनं कृत्वा सम्पूर्णस्य जन्माङ्गस्य विश्लेषणं क्रियते। ग्रहाणां बलाबलज्ञानाय षड्बलं विचार्यते। इमानि षड्बलानि

1. स्थानबलम्

2. दिग्बलम्

3. चेष्टाबलम

4.कालबलम्

5.नैसर्गिकबलम्

6.स्थानबलञ्च।

पाठ्यांशेऽस्मिन् एषां षड्बलानां चर्चा क्रियते। केषुचित् ग्रन्थेषु षड्बलेषु दृग्बलस्य परिगणनं षष्ठे स्थाने कृतमस्ति परञ्च ग्रन्थेऽस्मिन् वराहमिहिरेण दृग्बलस्य गणना षड्ब-ालेषु न कृता। दृग्बलस्य स्थाने पुन: स्थानबलमेवोत्तमस्ति। एवं स्थानबलं लघुजातके वराहमिहिरेण द्विविधं कथितम्।

**स्थानबलम्**

षड्बलेषु प्रथम स्थानबलम्। स्थानबले ग्रहाणां स्थिति: विचार्यते। यदा कोऽपि ग्रह: स्वराशौ, स्वोच्चराशौ, स्वनवमांशे, मित्रराशौ, शुभग्रहै: दृष्टश्च भवति तदा सो ग्रहो बलयुतो भवति। चन्द्रशुक्रौ समराशिषु बलिनौ भवत:। शेषा: ग्रहा: रवि- भौम- गुरु- शनयश्च विषमराशिषु बलशालिन: भवन्ति। तद्यथा

बलवान् स्वगृहोच्चांशे मित्र वीक्षित: शुभैश्चापि।

चन्द्रसितौ स्त्रीक्षेत्रो पुरुषक्षेत्रेपगा: शेषा:।।

सर्वे ग्रहा: स्वराशिषु बलिनो भवन्ति। लोकेऽपि दृश्यते यत् स्वगृहे सर्वे जना: बलिनो भवन्ति तत्र कस्मादपि भयं न भवति। स्वगृहे जन: स्वतन्त्ररूपेणाचरति। ग्रहा अपि स्वगृहे बलिनो भवन्ति। भौमादीनां ग्रहाणां मेषादय: स्वराशय: सन्ति। जन्माङ् यदि भौमादयो ग्रहा:

मेषादिषु स्वराशिषु भवन्ति तदा बलिनस्ते भवन्ति। यदि कोऽपि ग्रह: स्वोच्चराशौ भवति तदाऽपि सो ग्रहो बली कथ्यते। मेष- वृष- मकर- कन्या- कर्क- मीन- तुलाश्च क्रमश: सूर्य- चन्द्र- भौम- बुध- गुरु- शुक्र- शनीनां ग्रहाणामुच्चराशय: सन्ति ।जन्माङ्ग यो ग्रह: स्वोच्चराशौ भवति सो ग्रहो बली मन्यते। ग्रह: स्वनवमांशेऽपि बली कथ्यते। नवमांशकुण्डल्यां यदि कोऽपि ग्रह: स्वनवमांशे अर्थात् स्वराशौ वर्तते तदा सो ग्रहोऽपि बली मन्यते। पुनश्च जन्माङ्ग यो ग्रह: मित्रराशौ भवति सो ग्रहोऽपि बली मन्यते। ग्रहाणां मैत्री द्विविधा- तात्कालिकी मैत्री नैसर्गिकी मैत्री च। पञ्चधामैयां तात्कालिकी नैसर्गिकी च मैत्री एतयो: द्वयो: आहृत्य विचारो भवति। कोऽपि ग्रह: स्वमित्रगृहेऽधिमित्रगृहे वा वर्तते, पुनश्च शुभग्रहै: दृष्टोऽप्यस्ति तदा सो ग्रहोऽपि बली मन्यते। यदि स एव ग्रह: पापग्रहैरपि दृष्टो भवति तदा सो ग्रहो बली न मन्यते। अत: मित्रगृहे सत्यपि शुभग्रहाणां दृष्टिरपि आ-वश्यकी। चन्द्रशुक्रौ स्त्रीराशिषु बलिनौ भवत:। शेषग्रहा: पुरुषराशिषु बलिनो भवन्ति। वृष- कर्ककन्या- वृश्चिक- मकर- मीनाश्च समराशय: स्त्रीराशय: सन्ति। एषु राशिषु

चन्द्रशुक्रयोः स्थितिः शुभकरा मन्यते। अतः चन्द्रशुक्रौ एषु राशिषु बलशालिनौ भवतः। मेष- मिथुनसिंह- तुला- धनु- कुम्भाश्च पुरुषराशयः सन्ति। रवि- भौम- बुध- गुरु- शनयो ग्रहा एषु राशिषु बलशालिनो भवन्ति। इदानीं स्थानबलेषूच्चबलस्य प्रयोजनं वर्त्यते। ' श्रीमत्कल्याणदत्तवर्मणाश्श् कथितं यदुच्चबलयुतग्रहो जनेभ्यः सम्पत्तिं ददाति। तद्यथा

उच्चबलेन समेतः परां विभूतिं ग्रहः प्रसाधयति।

पुनश्च पुरुषराशिबलयुतो ग्रहोऽथवा स्त्रीराशिबलयुतो ग्रहो यस्य मनुष्यस्य जन्माङ्ग भवति सो जनो ग्रहस्य दशान्तर्दशायां संसारेऽस्मिन् मानमाप्नोति। सः निरोगी कला-कुशलश्च भवति। तद्यथा

पुंस्त्रीभवनबलेन च करोति जनपूजितं कलाकुशलम्। ।

पुरुषं प्रसन्नचित्तं कल्यं परलोकभीरु च।।

**दिग्बलम्**

षड्बलेषु द्वितीयमस्ति दिग्बलम्। गुरुबुधौ पूर्वदिशि बलिनौ भवतः। रविभौमौ दक्षिणदिशि बलिनौ मन्येते। शनि पश्चिमे बली भवति। चन्द्रशुक्रौ उत्तरदिशि बलिनौ भवतः। जन्मकुण्डल्या पूर्वस्य बोधकः प्रथमो भावोऽस्ति। चतुर्थभावेनोत्तरदिक् विचार्यते। गुरुबुधौ लग्ने बलिनौ भवतः। यदि कस्यापि जन्माङ्गे स्पष्टीभूतस्य लग्नस्य गुरो अंशेन सह साम्यं भवेत्। तदा गुरुः बली कथ्यते। एवमेव स्पष्टीभूतस्य लग्नस्य बुधस्य अंशेन सह साम्यं भवेच्चेत् बुधो बली मन्यते। पश्चिमदिशि द्वावेव पूर्णतया बलहीनौ मन्येते। सप्तमो भावः पश्चिमदिग्बोधकोऽस्ति। यदि स्पष्टीभूतस्य सप्तमभावस्य बुधांशेन सह साम्यं भवेच्चेत् बुधो बलहीनः कथितः। एवमेव स्पष्टीभूतस्य सप्तमभावस्य जीवांशेन सह साम्यमपि जीवस्य निर्बलत्वं द्योतते। बुधजीवौ यदि द्वितीयतः षष्ठं भावं यावत् कस्मिन्नपि भावे स्याताम् अथवा अष्टमतः एकादशं भावं यावत् कस्मिन्नपि भावे स्याताम् तदा द्वयोरेव दिग्बलस्य ज्ञानमनुपातेन कार्यम्। चन्द्रशुक्रौ उत्तरदिशि बलिनौ कथितौ। चतुर्थो भाव उत्तरदिग्बोधकोऽस्ति। अतः स्पष्टांशस्य चतुर्थभावस्य स्पष्टांशेन चन्द्रेण सह साम्येन चन्द्रस्तथा च स्पष्टांशकस्य चतुर्थभावस्य स्पष्टांशकेन शुक्रेण सह साम्येन शुक्रो दिग्बलमाप्नोति। दशमभावे अर्थात् दक्षिणदिशि द्वावपि बलहीनौ भवतः। अतः चतुर्थे भावे चन्द्रशुक्रौ पूर्णतः दिग्बलिनौ भवतः। दशमे च भावे ईषदपि दिग्बलं तौ न प्राप्नुतः । एवमेव शनिः पश्चिमदिशि पूर्णदिग्बलं प्राप्नोति। स एव शनिः यदा स्पष्टांशकलग्नतुल्यञ्च भवति तदा ईषदपि दिग्बलं न प्राप्नोति। एतयोर्मध्ये अनुपातेन दिग्बलं ज्ञेयम्। एवमेव सूर्यभौमौ दक्षिणदिशि पूर्णदिग्बलिनौ भवतः। दशमो भावो दक्षिणदिग्बोधकः। अतः स्पष्टांशकस्य सूर्यस्य स्पष्टांशकेन दशमभावेन सह साम्येन सूर्यः पूर्णदिग्बलं प्राप्नोति।

एवमेव स्पष्टांशकस्य भौमस्य स्पष्टांशकेन दशमभावेन सह साम्येन भौम: पूर्णदिग्बलं प्राप्नोति परञ्च चतुर्थे भावे द्वयो: रविभौमयो: कृते शून्यं दिग्बलं प्राप्यते। एतयोर्मध्ये अनुपातेन दिग्बलं ज्ञेयम्। तद्यथा-

'प्राच्यादिषु जीवबुधौ सूर्यादौ भास्करि शशाङ्कसितौ।

पूर्णदिग्बलस्य मानं 600 षष्ट्यंशं भवति। यदा स्पष्टांशकस्य गुरो: स्पष्टांशकेन लग्नेन सह साम्यं भवति तदा जीव: 600 षष्ट्यंशं बलमाप्नोति। सप्तमे भावे जीव: शून्यं बलमाप्नोति। जीवो यदि स्पष्टांशकात् लग्नात् षष्ट्यंशं यावत् दूरं भवति अर्थात् गुरुर्लग्नयोर्मध्ये षष्ट्यंशानामन्तरं वर्तते तदा जीव: 40 षष्ट्यंशं बलमाप्नोति। एवमेव गुरुर्लग्नयोर्मध्ये विंशत्याधिकमेकशदंशानाम् (1200) अन्तरं भवति चेत् विंशति: (200) षष्ट्यंशबलं प्राप्यते। एवं प्रत्येक त्रिशदंशे 10 दिग्बलस्य ह्रासो जायते। अस्य दिग्बलस्य प्रयोजनमस्ति यत् दिग्बलयुतग्रहस्य दशान्तैदशायां दिग्बलयुतग्रहस्य दिशि गमनेन धनस्य लाभो भवति। जीवो यदा दिग्बलयुतो भवति तदा जीवस्य दशार्तदशायां पूर्वदिशि गमनेन धनस्य लाभो भवति। दिग्बलहीनस्य ग्रहस्य दशान्तर्दशायां तस्य ग्रहस्य दिशि यात्रा

हानिप्रदा। तस्मिन् दिशि निवेशोऽपि हानिप्रद:। तद्यथा-

आशाबलसमुपेतो नयति स्वदिशं नभश्चर: पुरुषम्।

नीत्वा वस्त्रविभूषणवाहनसौख्यान्वितं कुरुते।।

**चेष्टाबलम्**

इदानीं चेष्टाबलं व्याख्यायते। उत्तरायणे सूर्यचन्द्रमसौ बलिनौ भवत:। येषां जन्म उत्त-रायणेऽभवत् तेषां जनानां सूर्यचन्द्रमसौ चेष्टाबलशालिनौ भवत:। मकरादिराशिषट्कम्ए-को वर्ग:। कर्कटादिराशिषक द्वितीयो वर्ग:। प्रथमवर्गानुसारं सूर्यस्थितिरुत्तरायणमिति। द्वितीयवर्गानुसारं सूर्यस्थिति: दक्षिणायनमिति। शेषा: ग्रहा: भौम-बुध-गुरु-शुक्र-मन्दा: विपरीतगतिमन्त: सन्तो बलिनो भवन्ति। पुनश्च कुजादय: पञ्चताराग्रहा: यदा चिक्कणा: पुष्टाश्च दृश्यमाना भवन्ति तदाऽपि बलिनो भवन्ति। तद्यथा-

उदगयने शशिसूर्यो वक्रेऽन्ये स्निग्धविपुलाश्च''

एवं चेष्टाबलान्तर्गतं बलानि सन्ति-

1. उदगयनबलम् 2. वक्रबलम् 3. समागमबलम् 4. विपुलकरबलम् 5. युद्धबलम् द्य आचार्यवराहमिहिरेण बृहज्जातके उदगयनमित्यस्यार्थ: उत्तराक्रांति: कृत:। तदनुसारं सूर्यचन्द्रयो: यदा उत्तराक्रांति: भवति तदा द्वावेव 60 षष्ट्यंशबलं प्राप्नुत:। क्रांते: परमं

मानं 24 भवति। अत: यदा सूर्यचन्द्रयो: उत्तराक्रांति: 24 भवति तदा द्वयो कृते 60 षष्ट्यंशबलं तथा च यदा दक्षिणाक्रान्ति: 24 भवति तदा द्वयो: कृते शून्यं षष्ट्यंशबलं प्राप्यते। मध्येऽनुपातेन ज्ञेयम्।।

चेष्टाबलान्तर्गतं द्वितीयं बलमस्ति- वक्रबलम्। सूर्यचन्द्रयो: कदापि वक्रगतिर्न भवति। कुजादीनां पञ्चताराग्रहाणां वक्रगतिर्भवति। यो ग्रहो वक्री भवति सो ग्रह: 60 षष्ट्यंशबलमाप्नोति। यो ग्रहो मार्गी भवति स: 30 षष्ट्यंशबलमाप्नोति। सूर्ययुतग्रह: 15 षष्ट्यंशबलं तथा च चन्द्रयुतग्रह: 30 षष्ट्यंशबलमाप्नोति। मन्दगतिग्रह: 15 षष्ट्यंशबलं तथा च शीघ्रगतिग्रह: 45 षष्ट्यंशबलं प्राप्नोति। अतिशीघ्रगतिग्रह: 30 षष्ट्यंशबलं प्राप्नोति।

चेष्टाबलान्तर्गतमपरं बलमस्ति- समागमबलम्। कुजादीनां पञ्चताराग्रहाणां समागमो यदा चन्द्रेण सह भवति तदा ते 30 षष्ट्यंशबलं प्राप्नुवन्ति परञ्च समागमोऽयमंशाभ्यन्तरं आवश्यकम्।।

चेष्टाबलान्तर्गतमं बलमस्ति- विपुलकरबलम्। तदनुसारं विपुलकरग्रहोऽपि चेष्टाबलयुतो भवति। विपुलरश्मियुतग्रह एव विपुलकरग्रह: कथ्यते। विपुलकरस्य लक्षणमिदं प्रतिपादितमाचार्येण

''शीघ्रकेन्द्रद्वितीयपदस्थग्रहस्य विपुलकरत्वं प्राय: सम्भवति।''

चेष्टाबलान्तर्गतमन्तिम बलमस्ति- युद्धबलम्। पञ्चताराग्रहेषु येषां ग्रहाणां राश्यंशकलाविकलासु साम्यं यदा जायते तदा ग्रहेषु युद्धो भवति। तेषु ग्रहेषु यो ग्रह उत्तरादिग्भागस्थित: सो बलवान् भवति तस्यैव विजयो भवति। यो ग्रहो दक्षिणदिग्भागस्थित: तस्य पराजयो भवति। सर्वे ग्रहा: उकस्था जययुत्ता: भवन्ति परञ्च शुक्रो दक्षिणदिस्थो जयी भवति। तद्यथा

'सर्वे जयिन उकस्था दक्षिणदिस्थो जयी शुक्र:।

एवं पञ्चरूपबलयुतो ग्रह एव बली भवति (1 रूप= 60 षष्ट्यंशबलं) अस्य चेष्टाबलस्य प्रयोजनमिदमप्यस्ति यत् चेष्टाबलयुतग्रहस्य दिशि यात्रा लाभप्रदा भवति। तस्मिन् दिशि यात्रया यशोधनलाभो विजयश्च जायते।

यस्य नरस्य जन्माङ्ग यावन्तो ग्रहा: चेष्टाबलयुता: भवन्ति सो नर: तावदेव शुभफलमाप्नोति । चेष्टाबलयुतग्रहस्य दशान्तर्दशायां राज्यं, यशो, धनञ्च लभते। तद्यथा

क्वचिद्राज्यं क्वचित्पूजां क्वचिद्रव्यं क्वचिद्यश:। ददाति विगश्चित्रं चेष्टावीर्यसमन्वित:।।

**कालबलम्**

षड्बलेषु चतुर्थमिदं कालबलम्। शुक्ररविगुरवो दिवसे बलिनो भवन्ति। बुधोऽहोरात्रे बली मन्यते। चन्द्रभौमशनयः रात्रिकाले बलिनो भवन्ति। सर्वे ग्रहाः स्वदिनादिषु बलिनो भवन्ति। पापग्रहाः कृष्णपक्षे, शुभग्रहाः शुक्लपक्षे च बलिनो भवन्ति। तद्यथा-

अहनि सितार्कसुरेज्या द्युनिशं ज्ञो नक्तमिन्दुकुजसौराः।

स्वादिनादिष्वशुभशुभा बहुलोत्तरपक्षयोर्बलिनः।।

वस्तुतस्तु कालबलस्यास्य सप्तभेदाः सञ्जायन्ते। तद्यथा

(क) नतोन्नतबलम् ।

शुक्ररविगुरवो दिवसे बलशालिनः भवन्ति। अतो दिवसस्य मध्यभागे अर्थात् मध्याह्न 60 षष्ट्यंशं बलं प्राप्नुवन्ति। मध्यरात्रौ शून्यं षष्ट्यंशबलं प्राप्नुवन्ति अर्थात् पूर्णरूपेण निर्बलाः भवन्ति। मध्येऽनुपातेन एतेषां बलं ज्ञेयम्। चन्द्रभौमशनैश्चराः रात्रिबलिनः भवन्ति। अतः मध्यरात्रौ 60 षष्ट्यंशं बलं प्राप्नुवन्ति। मध्याह्न च शून्यं षष्ट्यंशं बलं प्राप्नुवन्ति। मध्येऽनुपातेन बलं ज्ञेयम्। बुधः सदैव 60 षष्टयंशं बलमेव प्राप्नोति। तद्यथा-

निशि शशिकुजसौराः सर्वदा ज्ञोऽह्नि चान्ये।

आचार्यरुद्रभट्टेन बृहज्जातकस्य श्लोकस्यास्य टीका एवं कृता-

''निशि शशिकुजसौरा इत्यत्र क्रमो विवक्षितः। शशीपूर्वभागस्य, तेन तदानीं मृष्टभोजनं संभवति। कुजो मध्यभागस्य तेन तदानीं मारणविद्वेषणादिक्रूरकर्माणि कुर्वन्ति। अन्त्यभागस्य शनैश्चरः, तस्मिन्बलवति तदानीमुपासनाशास्त्रार्थविचिन्तादिकं च संभवति। हीनबले तदानीमतिनिद्रा। सर्वदा ज्ञः। बुधे बलवति सर्वदा विद्याभ्यासश्चिन्तनीयः। अन्यथा सर्वदा परिहासशीलः द्यूतादिभिर्वा। अन्ये दिवा। तत्र प्रातः कालस्य सूर्यः, तेन तदानीं वैश्वदेवातिथि पूजा स्वभोजनं च सम्भवति। अन्त्यभागस्य शुक्रः, तेन इदानीं पुराणकाव्यनाटकादिकं च संभवति।

एवमाचार्यरुद्रभट्टेन स्वटीकायां नतोन्नबलस्य व्याख्या प्रदत्ता।

(ख) पक्षबलम्।

पक्षबलं कालबलस्य द्वितीयो भेदः। चन्द्रबुधगुरुशुक्राः शुक्लपक्षे बलिनो भवन्ति। पूर्णिमातिथौ यदा सूर्यचन्द्रयोरंशात्मकमन्तरं 180Û भवति तदा इमे ग्रहाः 60Û षष्ट्यंशं बलं प्राप्नुवन्ति। अमायां यदा सूर्यचन्द्रयोर्युतिर्जायते तथा च द्वयोरंशात्मकमन्तरमपि शून्यं भवति तदा इमे ग्रहाः Û0 षष्ट्यंशं बलं प्राप्नुवन्ति। मध्येऽनुपातेन ज्ञेयम्। सूर्यभौमशनैश्चराः कृष्णपक्षे बलं प्राप्नुवन्ति। अमायां 60Û षष्ट्यंशं पूर्णिमायां 0Û षष्ट्यंशं

बलञ्च प्राप्नुवन्ति। मध्येऽनुपातेन

(ग) वर्षबलम्।

यो ग्रहो वर्षेशो भवति स एव 15 षष्ट्यंशं बलं प्राप्नोति। अवशिष्टाः ग्रहाः शून्यं बलं प्राप्नुवन्ति। वर्षेशज्ञानस्य विधिरेवमुक्तं यत् जन्मनो वर्षे चैत्रशुक्लप्रतिपदि यस्य ग्रहस्य दिवसो भवति स एव वर्षपतिः। रुद्रभटेन लिखितं यथा-

संवत्सरस्यादौ यस्य प्रथमवारो भवति स तस्य संवत्सरस्याधिपतिः'' मासस्याप्येवमाधिपत्यम्।।''

(घ) मासबलम्।

यो ग्रहो मासेशो भवति तस्य ग्रहस्य 30 षष्ट्यंशबलं, शेषाणां ईषदपि बलं न भवति। जन्मनो यो मासो भवति, तस्य मासस्य आरम्भो येन वारेण भवति स एव ग्रहो मासपतिः कथ्यते। मासारम्भः शुक्लप्रतिपदातः मन्यते।

(ङ) दिनबलम्।

सप्तदिवसेषु यस्मिन् दिवसे जातकस्य जन्म जातम् तस्य दिवसस्य स्वामिग्रह एव दिनपतिः कथ्यते। सूर्योदयात् सूर्योदयं यावत् दिवसो मन्यते। तद्यथाउद्यादुदयं भानोभूमिसवनवासरः।''

दिवसपतये 450 यावत् षष्ट्यंशबलं लभते। अन्येषां ग्रहाणां किञ्चिदपि षष्ट्यंशबलं न भवति।

(च) होराबलम्।

होराबलस्य ज्ञानाय जन्मकालीना होरा द्रष्टव्या। सम्पूर्ण दिवसे चतुर्विंशतयः होराः भवन्ति। यस्य ग्रहस्य वारो भवति। तस्यैव ग्रहस्य प्रथमा होरा भवति। तदनन्तरं ग्रहाणां कक्षाक्रमेण होरा गण्यते। यस्य ग्रहस्य होरायां कस्यापि मनुष्यस्य जन्म जातः। स एव ग्रहः 60 षष्ट्यंशबलमाप्नोति।

कालबलस्य प्रयोजनमाचार्यकल्याणवर्मणा सारावल्यां निरूपितं यत् वर्षेश- मासेशदिवसेश- होरेशाः स्वदशाऽन्तर्दशायां यथाक्रमेण प्रथमात् द्विगुणितं सुखं, कीर्ति, धनञ्च ददति। अर्थात् मासबलयुतग्रहो वर्षबलयुतग्रहात् द्विगुणितं सुखं धनञ्च स्वदशान्तर्दशायां ददाति। दिवसबलयुतग्रहो मासबलयुतग्रहात् द्विगुणितं सुखं धनं कीर्तिञ्च ददाति। होराबलयुतग्रहो दिवसबलयुतग्रहात् द्विगुणितं शुभफलं प्रददाति। तद्यथा

द्विगुणं द्विगुणं दद्युर्वर्षाधिपमासदिवसहोरेशाः।

क्रमपरिवृद्धया सौख्यं स्वदशासु धनं च कीर्तिञ्च।।

**नैसर्गिकबलम्-**

शनिभौमबुधगुरुशुक्रचन्द्रसूर्यादयो ग्रहाः यथाक्रमेण उत्तरोत्तरं बलिनो भवन्ति। ग्रहाणामिदं नैसर्गिकबलम्। बलसाम्ये नैसर्गिकबलात् बलाधिक्यं ज्ञायते। तद्यथा-

मन्दारसौम्यवाक्पतिसितचन्द्रार्का यथोत्तरं बलिनः।

नैसर्गिकबलमेतद्बलसाम्येऽस्माद् बलाधिकता।

नैसर्गिकशब्दस्यार्थोऽस्ति स्वाभाविकम्। ग्रहाः स्वभावेनैवोत्तरोत्तरं बलशालिनो भवन्ति। शनैश्चरात् भौमः भौमात् बुधः बुधात् जीवः, जीवात् शुक्रः, शुक्रात् चन्द्रः, सोमात् सूर्यो यथाक्रमेण बली भवति। अतः सूर्याय 60 षष्ट्यंशं बलं, सोमाय 51.43 षष्ट्यंशं बलं,

शुक्राय 42.85 षष्ट्यंशं बलं, जीवाय 34.28 षष्ट्यंशं बलं, बुधाय 25.70 षष्ट्यंशं बलं, भौमाय 17.14 षष्ट्यंशं बलं, तथा च शनैश्चराय 8.57 षष्ट्यंशं बलं ज्योतिर्विदाः ददति।

**स्थानबलम्**

षड्बलेष्वन्यतममस्ति स्थानबलम्। षड्बलानामारम्भः समाप्तिश्च स्थानबलेन भवति। स्थानबलं तु पूर्वमपि कथितं परञ्च तत्र होरा- द्रेष्काण- मूलत्रिकोणादिविषयाः नोक्ताः। इमे विषया अत्र विविच्यन्ते। सर्वे ग्रहाः स्वमित्रराशौ, स्वोच्चराशौ, स्वहोरायां स्वराशौ, स्वमूलत्रिकोणराशौ, स्वद्रेष्काणे, स्वनवमांशे, स्व-स्व दिवसे च बलशालिनः भवन्ति। तद्यथा-

मित्रक्षेत्रे स्वोच्चे स्वहोरायां स्वभवनत्रिकोणे च।

स्वद्रेष्काणे स्वांशे स्वदिने च बलान्विताः सर्वे।।

सर्वे ग्रहाः स्वमित्रगृहस्य राशौ बलशालिनः भवन्ति। पुनश्च ग्रहाः स्वोच्चेऽपि बलशालिनः भवन्ति। यदि कोऽपि ग्रहः स्वपरमोच्चे वर्तते तदा सो ग्रहः एक रूपं (60षष्ट्यंश) बलं प्राप्नोति। परमनीचे सति शून्यं षष्ट्यंशबलमाप्नोति। मध्येऽनुपातेन ज्ञेयम्। यथा मेषस्य दशमे अंशे सूर्यः 60 षष्ट्यंशं बलमाप्नोति। तुलाराशेः दशमे अंशे सूर्यः शून्यं षष्ट्यंशं बलमाप्नोति। वराहमिहिराचार्येण स्वकीये बृहज्जातके आरोहवीर्ययुतग्रहोऽपि बली कथितः। यदा कोऽपि ग्रहः स्वपरमनीचात् स्वपरमोच्चं प्रति गच्छन् भवति तदा सो ग्रह आरोहवीर्ययुतग्रहः कथितः । सो ग्रहोऽपि बली मन्यते। सूर्यस्तुलायाः दशमे अंशे परमनीची भवति मेषस्य दशमे अंशे च परमोच्चो भवति। सूर्यो यदि तुलायाः दशमंशात्

मेषस्य दशमंशं यावत् गच्छन् भवति।

तदा स आरोहवीर्ययुतग्रहः कथ्यते। एवमेव वृश्चिकस्य 30 अंशादारभ्य वृषस्य 3 अंशयावत् चन्द्र आरोहवीर्ययुतग्रहो भवति। कर्कस्य 280 अंशादारभ्य मकरस्य 280 अंशपर्यन्तं भौम आरोहवीर्ययुतग्रहो भवति। आरोहवीर्ययुतग्रहोऽपि बली मन्यते। तद्यथा-

भ्रष्टस्य तुंगादवरोहिसंज्ञा मध्या भवेत्सा सुहृदुच्चभागे।

आरोहिणी निम्नपरिच्युतस्य नीचारिभांशेष्वधमा भवेत्सा।।

अधुना स्थानबलस्य द्वितीयो भेदः कथ्यते। यदि कोऽपि ग्रहः स्वमूलत्रिकोणे भवति तदा 45 षष्ट्यंशबलं प्राप्नोति। स्वराशौ ग्रहः 30 षष्ट्यंशबलं, अधिमित्रराशौ 22.5 षष्ट्यंशबलं मित्रराशौ 15 षष्ट्यंशबलं, समराशौ 7.5 षष्ट्यंशबलं, शत्रुराशौ 3.75

षष्ट्यंशबलं अधिशत्रुराशौ च 1.875 षष्ट्यंशबलं प्राप्नोति। ग्रहाणां मूलत्रिकोण राशयः सन्ति-

सिंहो वृष प्रथम- षष्ठ-हयाङ्गतौलिकुम्भस्त्रिकोणभवनानि भवन्ति सूर्यात्।।

अर्थात् सिंह- वृष- मेष- कन्या- धनु- तुला- कुम्भाः यथाक्रमेण सूर्यादीनां मूलत्रि-कोणराशयो भवन्ति। ग्रहाणामुच्चराशिविषये ग्रहाणां मैत्रीविषये च पूर्वमेव स्पष्टीकृतम्।।

स्थानबलस्य तृतीयो भेदोऽयं यत् सर्वे ग्रहा स्वहोरायां बलिनो भवन्ति। मनसि प्रश्न उत्पद्यते यत् होरा तु केवलं सूर्यचन्द्रयोर्भवति तर्हि शेषाः ग्रहाः कथं होराबलं लप्स्यन्ते। सूर्यचन्द्रयोरेव होरा भवति अत एव सूर्यः स्वहोरायां चन्द्रः स्वहोरायाञ्च बलं लभते। जीवभौमौ सूर्यहोरायां बलिनौ भवतः। शनिशुक्रौ चन्द्रहोरायां बलिनौ मन्येते बुधो जन्-माङ्ग समराशौ सति सूर्यहोरायां, विषमराशौ सति च चन्द्रहोरायां बली मन्यते। कोऽपि ग्रहः स्वहोरायां 30 षष्ट्यंशबलं, अधिमित्रस्य होरायां 22.5 षष्ट्यंशबलं, मित्रहोरायां 15 षष्ट्यंशबलं, समहोरायां 7.5 षष्ट्यंशबलं, शत्रुहोरायां 3.75 षष्ट्यंशबलं, अधिशत्रुहोरायां 1. 875 षष्ट्यंशबलञ्च प्राप्नोति। एकस्मिन् दिवसे चतुर्विंशतिहोराः भवन्ति। दिवसारम्भे प्रथमा होरा दिनपतेरेव भवति। तदनन्तरं कक्षाक्रमेणान्येषां ग्रहाणां होराः भवति।

स्थानबलस्य चतुर्थो भेदोऽस्ति- द्रेष्काणबलम्। सर्वे ग्रहाः स्वद्रेष्काणे बलशालिनो भवन्ति। यदि ग्रहः स्वद्रेष्काणे भवति तदा 30 षष्ट्यंशबलं प्राप्नोति। अधिमित्रस्य द्रेष्काणे 22.5 षष्ट्यंशबलं, मित्रस्य द्रेष्काणे 15 षष्ट्यंशबलं, समद्रेष्काणे 7.5 षष्ट्यंशबलं, शत्रुग्रहस्य द्रेष्काणे 3.75 षष्ट्यंशबलं, अधिशत्रुग्रहस्य द्रेष्काणे 1.875 षष्ट्यंशबलमाप्-नोति। द्रेष्काणसाधनप्रकारः ''षड्वर्गसाधनविधिःश् नामाख्ये पूर्वस्मिन् पाठ्यांशे वर्णितः।

सर्वे ग्रहाः स्वनवमांशे बलशालिनो भवन्ति। स्वनवमांशे ग्रहः 30षष्ट्यंशबलमाप्नोा-

ति। अधिमित्रस्य नवमांशे 22.5 षष्ट्यंशबलं, मित्रस्य नवमांशे 15 षष्ट्यंशबलं, समग्रहस्य नवमांशे 7.5 षष्ट्यंशबलं, शत्रुग्रहस्य नवमांशे 3.75 षष्ट्यंशबलं, अधिशत्रुग्रहस्य नवमांशे 1. 875 षष्ट्यंशबलमाप्नोति।

सर्वे ग्रहा: स्व-स्व-दिने बलिनो भवन्ति।

अस्यां कुण्डल्यां सूर्यो भौमस्य राशावस्ति । भौम: सूर्यस्याधिमित्रं वर्तते। अत: सूर्याय 22.5 षष्ट्यंशबलं लभते। गृहबलमिदं कथ्यते। पुनश्च सूर्य: चन्द्रस्य होरायामस्ति सूर्यचन्द्रयो: मैत्रीसम्बन्ध:।अत एव सूर्याय 15 षष्ट्यंशबलं लभते। सूर्य: भौमस्य द्रेष्काणे वर्तते। अधिमित्रस्य द्वेषकाणोऽस्ति अत: सूर्याय 22.5 षष्ट्यंशबलं लभते। एवमेव अन्येषां ग्रहाणामपि बलं ज्ञेयम्।

ग्रहाणां बलहेतवस्तु कथिता:। ग्रहाणां निर्बलहेतवोऽपि केचन सन्ति। ते च-

1.स्वनीचराशौ ग्रहो निर्बलो भवति।

2. शत्रुराशौ ग्रहो निर्बलो जायते।

3.पापग्रहसंयोगेन ग्रहाणां निर्बलत्वं मन्यते।

4. पापग्रहाणां दृष्टिरपि ग्रहाणां बलहीनताया: कारणमस्ति।

5.पापग्रहाणां वर्गेषु स्थितिरपि ग्रहाणां निर्बलस्य कारणम्।

6.भावसंधावपि ग्रहो निबलो जायते।।

7.स्वाष्टकवर्गे बिन्दुहीनता ग्रहाणां बलहीनताया: हेतु:।

8.पापग्रहस्य नवमांशेऽपि ग्रहो बलहीन: कथ्यते।

9.सूर्यसन्निधिवशाद् अस्ता: ग्रहा: अपि बलहीना: भवन्ति।

10. युद्धे पराजितग्रहोऽपि बलहीनो भवति।

11. शुभग्रहाणां दृष्टियुतिरहितग्रहोऽपि बलहीनो मन्यते।

जन्माङ्ग ये ग्रहा: निर्बला: भवन्ति ते अशुभकरा: भवन्ति। स्व-स्वदशाऽन्तर्दशायां निर्बला: ग्रहा अशुभफलं ददति। तद्यथा-

नीचारिपापखगयोगनिरीक्ष्यमाणा-

स्तद्वर्गसन्धिलघुबिन्दुदुरंशकाश्च।

आदित्यरश्मिपरिभूतपराजितास्ते

दृष्ट्यादिशत्त्यसहिताश्च न शोभना: स्यु:।।

ग्रहाणां बलाबलयोः हेतवः वर्णिताः । एषु ग्रहेषु बलयुतग्रहः शुभकरो मन्यते। बलहीनग्रहोऽशुभकरः कथितः। एकस्य ग्रहस्य बलाबललक्षणसम्पन्ने सति तारतम्येन ग्रहस्य बलाबलं ज्ञेयम्।

विषयसङ्ग्रहः-

ग्रहाणां शुभाशुभत्वं ज्ञानाय नैके हेतवः ज्ञातव्याः। तेष्वेव एकोऽस्ति- ग्रहाणां बलाबलम्।

अयमेव पाठ्यांशस्यास्य विचारणीयो विषयः। कि नाम बलम्, तानि कानि? कस्य बलस्यान्तर्भावः षड्बलेषु क्रियते? तेषां कः साधनप्रकारः? तेषां बलानां कि प्रयोजनम् ? एतान् विषयान् स्पष्टीकर्तुमेव पाठ्यांशेऽस्मिन् स्थान-दिक्-चेष्टा-काल-न-सर्गिकादिबलानां साधनप्रकारो विस्तरेण वर्णितः। स्थानबलयुतग्रहस्य किं फलम् ? दिक्बलयुत ग्रहस्य कि फलम् ? चेष्टाबलयुत अथवा कालबलयुतग्रहस्य किं फलम् ? इत्यपि प्रतिपादितम्। कस्यापि ग्रहस्य शुभाशुभफलकथने बलानामत्यधिक महत्त्वं वर्तते। शुभभावे सत्यपि बलहीनग्रहो स्वदशाऽन्तर्दशायां शुभफलं दातुं समर्थो न भवति। पाठ्यांशेऽस्मिन् एते विषयाः मया निरूपिताः।

**ग्रहाणां दृष्टि**

''यत् पिण्डे तत्ब्रह्माण्डे'' सिद्धान्तेनानेन जीवात्मब्रह्माण्डयोः साम्यं प्रतिपादितम्। संसारस्य प्रत्येक पदार्थे पञ्चमहाभूताः राजन्ते। मनुष्यशरीरो यथा पञ्चमहाभूतात्मकः तथैव सृष्टिरियमपि पञ्चमहाभूतात्मिका। ब्रह्माण्डस्य सर्वेऽपि पदार्थाः पञ्चमहाभूतात्मका एव। सूर्यादयो ग्रहा अपि पञ्चमहाभूतात्मकाः। अतः ग्रहमनुष्ययोः साम्यं वर्तते। तत्साम्यं विविधेषु ग्रन्थेष्वपि प्रतिपादितम्। मनुष्यवत् ग्रहेषु अपि केचन राजानः, केचन सचिवाः, केचन भृत्यादयो भवन्ति। सूर्यादीनां ग्रहाणामपि पारस्परिकी मित्रता शत्रुता वा भवति। ज्योतिषशास्त्रस्य विविधेषु ग्रन्थेषु ग्रहाणां आत्म-मनस् तत्त्वमपि प्रतिपादितम्। मानवीयशरीरमनु सर्यादीनां ग्रहाणां दृष्टिरपि प्रतिपादिता।

**जातकशास्त्रे निरूपिता ग्रहाणां दृष्टिः**

लोके यथा मनुष्याः मैत्री-शत्रुता-उदासीनादिप्रवृत्यानुसारं पश्यन्ति तथैव ग्रहाणामपि दृष्टिः कल्पिताः। सूर्यादयो ग्रहाः परस्परं पूर्वोत्तभावनया पश्यन्ति। ग्रहाणां पारस्परिकी दृष्टिः तेषां ग्रहाणां शुभाशुभत्वयोः हेतुः। ग्रहाणां पारस्परिकः चतुर्विधः सम्बन्धो भवति। तेषु एकः दृष्टिसम्बन्धोऽपि वर्तते। कोऽपि ग्रहः यस्मिन् भावे भवति, तस्य भावस्य शुभाशुभ-फलं तु ददात्येव, यं यं भावं पश्यति, तस्यापि शुभाशुभफलं ददाति। पाराशरमतानुसारं तु यावत् द्वयोः ग्रहयोः चतुर्विधेषु सम्बन्धेषु एकोऽपि सम्बन्धो न भवति,

तावत् तौ शुभफलं दातुं न शक्नुतः। ।

ज्योतिषशास्त्रस्य प्रायशः सर्वे आचार्याः ग्रहाणां दृष्टिमङ्गीकुर्वन्ति। केवलं जैमिनिमतमिदं यत् ग्रहाणां स्वकीया दृष्टिः न भवति, अपितु राशीनां दृष्टिः भवति, ग्रहा अपि राश्यानुसारं पश्यन्ति, ग्रहाणां स्वकीया स्वतन्त्रा दृष्टिः न भवति। जैमिनिसूत्रे राशीनां दृष्टि एवं प्रतिपादिताराशि-

जैमिनिमतमिदं सर्वमान्यं न वर्तते। जातकशास्त्रे निरूपिता ग्रहाणां दृष्टि एव सर्वमान्या वर्तते। ग्रहाणां दृष्टिरपि द्विविधा-

(1) सामान्या दृष्टिः

(2) विशिष्ट दृष्टिः

१. सामान्या दृष्टिः-

सर्वे ग्रहाः स्वस्थानात् दशमं तृतीयञ्च, एकपादात्मिकया, द्विपादात्मिकया, त्रिपाद-ात्मिया, पूर्णदृष्ट्या च पश्यन्ति। ग्रहाः पाददृष्ट्यानुसारमेव शुभाशुभफलं यच्छन्ति। यथा-

दशम-तृतीये नवपञ्चमे चतुर्थाष्टमे कलत्रं च।

पश्यन्ति पादवृद्धया फलानि चौवं प्रयच्छन्ति।।

लोकेऽपि दृश्यते यत् यदा मनुष्यः किञ्चदपि पदार्थं एकपादात्मिकया दृष्ट्या पश्यति तदा पदार्थः स्पष्टरूपेण न दृश्यते, यतोहि मनुष्यस्य अवधानमपि एकपादमितमेव भवति अतः दर्शनस्य फलमपि एकपादमितमेव भवति। ये पदार्थं मनुष्यः द्विपादात्मिकया दृष्ट्या पश्यति, मनुष्यस्य तत्पदार्थविषयकमवधानमपि पादार्धमितमेव भवति। एवमेव यं पदार्थं कोऽपि जनः पादहीनदृष्ट्या पश्यति, तत्र तस्य अवधानमपि पादोनं भवति। यत्र जनः सम्पूर्णदृष्ट्या सम्यक्रूपेण पश्यति, तत्र तस्य अवधानमपि सम्पूर्णं भवति। सम्पूर्णेन अवधानेन सह सम्पादितस्य कार्यस्य फलमपि सम्पूर्णं भवति। एवमेव सर्वेषां ग्रहाणामपि एकपादात्मिका, पादार्धात्मिका, पादोनात्मिका, सम्पूर्णा च दृष्टिः वर्तते। ग्रहो यस्मिन्राशौ स्थितस्तस्माद् तृतीयराशौ दशमराशौ वा ये ग्रहाः, तान् प्रकृतो ग्रहः एकपादात्मिकया दृष्ट्या पश्यति। पंचमराशौ नवमराशौ वा ये ग्रहाः, तान् प्रकृतो ग्रहः पादार्धात्मिकया दृष्ट्या पश्यति।

चतुर्थराशौ अष्टमराशौ वा ये ग्रहाः, तान् प्रकृतो ग्रहः पादोनात्मिकया दृष्ट्या पश्यति। सप्तमराशौ ये ग्रहाः स्थितास्तान् पूर्णतया पश्यति। यदि तेषु भावेषु कोऽपि ग्रहो नास्ति तदा तं भावमेव ग्रहाः पाददृष्ट्या पश्यन्ति। पादृष्ट्यानुसारमेव ग्रहाणां फले शुभाशुभत्वं ज्ञायते।

ग्रहाणां पादात्मिकायाः दृष्टेः हेतुः वर्ण्यते यत् सप्तम भावो जायाभावः। सर्वेषां

जीवानां सर्वाधिकमवधानं स्वपत्न्यां भवति। अतः सर्वेषां ग्रहाणामपि सर्वाधिकमवधानं जायाभावे भवति, सर्वे ग्रहाः सप्तमं भावं पूर्णतया पश्यन्ति। तदनन्तरं मनुष्यः सुखस्य विषये आयुर्विषये च सर्वाधिकः चिन्तितो भवति, चतुर्थो भावः सुखभावः, अष्टमश्च आयुर्भावः। अतः सर्वे ग्रहाः चतुर्थमष्टमञ्च भावं त्रिपादात्मिकया दृष्ट्या पश्यन्ति। तदनन्तरं मनुष्यस्य कृते विद्यायाः धर्मस्य च सर्वाधिका आवश्यकता भवति। पुरुषार्थचतुष्टयेष्वपि धर्मस्य गणना कृता। धर्मसम्पादनाय ज्ञानमावश्यकम्। पञ्चमो विद्याभावः नवमो धर्मभावश्च। अतः सर्वे ग्रहाः पञ्चमं नवमञ्च भावं पादार्धात्मिकया दृष्ट्या पश्यन्ति। सर्वेषां सुखानां प्राप्तये पराक्रमस्य कर्माणाञ्च आवश्यकता भवति, यद्यपि मनुष्यस्य पराक्रमे कर्मसु च न्यूनमेव अवधानं भवति। पराक्रमभावः तृतीयः, कर्मभावश्च दशमः। अतः सर्वे ग्रहाः तृतीयं भावं दशमञ्च भावं पादात्मिकया दृष्ट्या पश्यन्ति। ग्रहाणां सामान्या दृष्टिरियं व्याख्याता। सामान्यादृष्टिरियं जन्माङ्गेऽस्मिन् एवं ज्ञायते।

दशमे स्थाने च कोऽपि ग्रहो नास्ति। नवमभावात् तृतीयं स्थानं एकादशो भावः, दशमं स्थानञ्च षष्ठो भावः वर्तते। एतयोः द्वयोः भावयोः चद्रस्य पादात्मिका दृष्टिः वर्तते। सर्वे ग्रहाः स्वस्थानात् नवमं पञ्चमं च भावं पादार्धात्मिकया दृष्ट्या पश्यन्ति।

नवमभावस्थसोमात् पञ्चमं स्थानं प्रथमो भावः, नवमं स्थानं पञ्चमो भावश्च। पञ्चमे भावे रविबुधगुरवश्च। चन्द्रः एतान् सर्वान् पादार्धात्मिकया दृष्ट्या पश्यति। प्रथमे भावेऽपि चन्द्रस्य पादार्धात्मिका दृष्टिः वर्तते। सर्वे ग्रहाः स्वस्थानात् चतुर्थमष्टमञ्च स्थान पादोनात्मिकया दृष्ट्या पश्यन्ति। सोमात् चतुर्थं द्वादशो भावः अष्टमञ्च चतुर्थो भावः। द्वादशे

भावे कोऽपि ग्रहो नास्ति, चतुर्थे भावे च शुक्रः। चन्द्रस्य द्वयोः स्थानयोः पादोनात्मिका दृष्टिः वर्तते। सर्वे ग्रहाः स्वस्थानात् सप्तमं स्थानं पूर्णतया पश्यन्ति। सोमात् सप्तममस्ति तृतीयो भावः। तृतीये भावे शनिभौमौ अवस्थितौ। चन्द्रस्य द्वयोः पूर्णा दृष्टिः वर्तते।

इदानीं कुण्डल्यामस्यां शनिभौमयोः दृष्टिः विचार्यते। शनिभौमौ कुण्डल्यामस्यां तृतीये भावे तुलाराशिस्थितौ। द्वयोः नवम् भावे सप्तमी दृष्टिः वर्तते। शनेः षष्ठे भावे दशमे च भावे पादोनात्मिका दृष्टिः वर्तते। द्वयोः सप्तमे भावे भौमस्य एकादशे च भावे पादार्धात्मिका दृष्टिः तथा च पञ्चमे भावे द्वादशे च भावे पादात्मिका दृष्टिः वर्तते। इदानीं कुण्डल्यामस्यां शुक्रस्य दृष्टिः विचार्यते। शुक्रः कुण्डल्यामस्यां चतुर्थे भावे वृश्चिकराशिस्थः। शुक्रः दशमं भावं पूर्णतया पश्यति। शुक्रः सप्तमं भावं एकादशं भावञ्च पादोनात्मिकया दृष्ट्या पश्यति। शुक्रः अष्टमं द्वादशं च भावं पादार्धात्मिकया दृष्ट्या पश्यति तथा च शुक्रः षष्ठं भावं प्रथम भावञ्च पादात्मिकया दृष्ट्या पश्यति।

इदानीं कुण्डल्यामस्यां सूर्यबुधगुरूणां दृष्टि: विचार्यते। सूर्यबुधगुरव: कुण्डल्यामस्यां पञ्चमभावे धनुराशिस्था:। तस्मात् भावात् सूर्यबुधगुरव: एकादशं भावं पूर्णतया अवलोकयन्ति। इमे ग्रहा: अष्टमं द्वादशं च भावं त्रिपादात्मिकया दृष्ट्या पश्यन्ति। सूर्यबुधयो: नवमे प्रथमे च भावे पादार्धात्मिका दृष्टि: वर्तते। जीवस्य पादार्धात्मिका दृष्टि: न भवति। तथा च सूर्यबुधजीवानां सप्तमे द्वितीये च भावे पादात्मिका दृष्टि: वर्तते।

एवं सर्वेषां ग्रहाणां सोदाहरणं सामान्या दृष्टि: वर्णिता। चक्रेणानेन ग्रहाणां पाददृष्टि: ज्ञायते। तद्यथा-

यदि कोऽपि ग्रह: कमपि भावं पश्यति, तदा तस्य ग्रहस्य दृष्टि: भावस्थे ग्रहेऽपि ज्ञेया, भावस्थे राशावपि ज्ञेया। केषाञ्चन ग्रहाणां विशिष्टा दृष्टिरपि व्याख्याता। सा च-

२. विशिष्टा दृष्टि:-

शनि: स्वस्थानात् तृतीयं दशमञ्च स्थानं पूर्णतया अवलोकयति। गुरु: स्वस्थानात् नवमं पञ्चमञ्च स्थानं पूर्णतया पश्यति। भौम: स्वस्थानात् चतुर्थमष्टमञ्च स्थानं पूर्णतया पश्यति। अवशिष्टा: सूर्यचन्द्रबुधशुक्रा: स्वस्थानात् सप्तमं स्थानं पूर्णतया पश्यन्ति। तद्यथा-

पूर्णम्पश्यति रविजस्तृतीयदशमे त्रिकोणमपि जीव:।

चतुरस्त्रं भूमिसुत: सितार्कबुधहिमकरा: कलत्रं च।।

शनि: तृतीयं दशमं च स्थानं पूर्णतया पश्यति। यतोहि शनि: ग्रहाणां भृत्य:। पराक्रमशीलो भृत्य एव राज्यस्य सम्यक् रक्षणं करोति। तृतीयो भावस्तु पराक्रमभाव: दशमस्तु राज्यभाव:। भृत्यस्य पूर्णा दृष्टि: पराक्रमे राज्ये च आवश्यकी। अनेनैव राज्यस्य उन्नतिर्भवति। अत: शनि: तृतीयं दशमञ्च स्थानं पूर्णतया पश्यति। बृहस्पति: ग्रहाणां सचिव: आचार्यश्च। स एव विद्याया: स्वामी। पञ्चमो भाव: विद्याभाव: नवमभावस्तु धर्मभाव:। कस्यापि मनुष्यस्य, समाजस्य, राष्ट्रस्य वा सम्बर्धनाय विद्याधर्मयो: महत्त्वं सर्वाधिकं भवति। अत: विद्यास्थानेषु धर्मस्थानेषु च सचिवस्य पूर्णा दृष्टि अत्यावश्यकी। आचार्यो यदि विद्यास्थानं धर्मस्थानञ्च पूर्णतया पश्यति, तदैव कस्यापि मनुष्यस्य, समाजस्य, राष्ट्रस्य च उन्नयन सम्यक् दिशि भवितुं शक्यते। अत: बृहस्पति: पञ्चमं नवमञ्च भावं पूर्णतया पश्यति।

भौम: चतुर्थं अष्टमञ्च भावं पूर्णतया पश्यति। भौम: ग्रहाणां सेनापति:। चतुर्थ: सुखभाव:, अष्टमस्तु आयुर्भाव:। चतुर्थस्थानात् सुखं अष्टमस्थानात् च आयु: चिन्त्येते। कस्यापि राष्ट्रस्य मनुष्याणां सुखस्य रक्षणं, आयुष: रक्षणञ्च सेनापति एवं करोति। अत:

भौम: चतुर्थमष्टमञ्च स्थानं पूर्णतया पश्यति। एवं प्रकारेण शनिभौमजीवेभ्य:

विशिष्टा दृष्टिः प्रदत्ता। ग्रहाणां विशिष्टा दृष्टिः जन्माङ्गमाध्यमेन ज्ञायते।

कुण्डल्यामस्यां शनिः तृतीयभावस्थः। शनिः स्वस्थानात्। तृतीयं-सप्तमं-दशमं स्थानञ्च पूर्णतया पश्यति। अतः कुण्डल्यामस्यां शनिः पञ्चमं-नवमं-द्वादशञ्च भावं पूर्णतया पश्यति।

भौमोऽपि कुण्डल्यामस्यां तुलाराशौ तृतीयभावस्थः। भौमः स्वस्थानात्। चतुर्थ-सप्तमं-अष्टमं स्थानञ्च पूर्णतया पश्यति। अतः कुण्डल्यामस्यां भौमः षष्ठं-नवमं-दशमञ्च स्थानं पूर्णतया पश्यति।।

बृहस्पतिः कुण्डल्यामस्यां धनुराशौ पञ्चमभावस्थितः। बृहस्पतिः स्वस्थानात् पञ्चमं-सप्तमं-नवमञ्च स्थानं पूर्णतया पश्यति। अतः कुण्डल्यामस्यां बृहस्पतिः नवमं-एकादशं-प्रथमञ्च भावं पूर्णतया पश्यति। ग्रहाणां विशिष्टा पूर्णा दृष्टिः चक्रेणानेनापि ज्ञायते-

यं स्थानं ग्रहा पादात्मिकया दृष्ट्या पश्यन्ति तस्य भावस्य फलमपि पादमितमेव प्राप्यते। यस्मिन् स्थाने ग्रहाणां पूर्णा दृष्टिः भवति, तस्य भावस्यापि ते ग्रहाः पूर्ण फलं प्रयच्छन्ति।

**राहुकेत्वोः दृष्टिविचारः-**

आचार्यवराहमिहिरेण सप्त एव ग्रहा अङ्गीकृताः। तन्मते राहुकेतू ग्रहौ न स्तः। अतः आचार्येण मित्रामित्रकथने, दृष्टिविचारे च राहुकेत्वोः विचारः न कृतः। केचन आचार्याः राहुकेत्वोः दृष्टिमङ्गीकुर्वन्ति। पाराशरेणापि राहुकेत्वोः दृष्टिः अङ्गीकृता। तन्मते राहुः

स्वस्थानात् पंचम, सप्तमं, नवमं, द्वादशं स्थानञ्च पूर्णतया पश्यति। द्वितीयं स्थानं, दशमं स्थानञ्च पादार्धदृष्ट्या पश्यति। तृतीयं-षष्ठं च स्थानं पादात्मिकया दृष्ट्या पश्यति। राहुः स्वभावनं न पश्यति, अतः राहोः त्रिपादात्मिका दृष्टिः न भवति। तद्यथा-

सुत मदन नवान्ते पूर्ण दृष्टिं तमस्य

युगल दशम गेहेचार्ध दृष्टिं वदन्ति।

सहज रिपुविपक्षान् पाद दृष्टि मुनिन्द्रा।

निज भवनमुपेतो लोचनान्धः प्रदिष्टः।। (बृहत्पाराशरहोराशास्त्रम्)

केचन आचार्याः केतोः दृष्टिरपि इयमेव अङ्गीकुर्वन्ति। केषाञ्चन आचार्याणां मतमिदं यत् केतोः दृष्टिः न भवति यतोहि केतोः शिरः नास्ति। राहोः दृष्टिः जन्माङ्ग-माध्यमेन अपि वर्णिता। तद्यथा-

कुण्डल्यामस्यां राहुः दशमे भावे वृषराशिस्थ राहुः स्वस्थानात् पञ्चम, सप्तमं, नवमं, द्वादशञ्च स्थानं पूर्णतया पश्यति। अतः राहुः द्वितीयं, चतुर्थं, षष्ठं, नवमञ्च भावं पूर्णतया पश्यति। राहुः स्वस्थानात् द्वितीयं दशमञ्च स्थानं पादार्धात्मिकया दृष्ट्या

पश्यति, अतः एकादशे सप्तमे च भावे राहोः पादार्धात्मिका दृष्टिः वर्तते। राहुः स्वस्थानात् तृतीयं षष्ठं च स्थानं पादात्मिकया दृष्ट्या पश्यति, अतः द्वादशे तृतीये च भावे राहोः पादात्मिका दृष्टिः वर्तते, केतोः दृष्टिरपि इयमेव ज्ञेया।

ग्रहाणां दृष्टिरियं केवलं जातकशास्त्रे विचारणीया वर्तते, ताजिकशास्त्रे तु ग्रहाणां दृष्टिः भिन्नरीत्या निरूप्यते। ताजिकशास्त्रस्य विविधेषु ग्रन्थेषु ग्रहाणां दृष्टिः निरूपिता।

४.० ताजिकशास्त्रे निरूपिता ग्रहदृष्टिः-

वर्षकुण्डल्या ग्रहाणां दृष्टिः द्विविधा भवति-

1) मित्रदृष्टिः

2) शत्रुदृष्टिः

दृष्टिरियम् अग्रे चतुः प्रकारिका भवति। तद्यथा

1) प्रत्यक्षस्नेहा

2) गुप्तस्नेहा

3) गुप्तवैरा

4) प्रत्यक्षवैरा

मित्रदृष्टिः- वर्षकुण्डल्या सर्वे ग्रहाः स्वस्थानात् पञ्चमं नवमं च स्थानं पश्यन्ति। दृष्टिरियं बलवती प्रत्यक्षस्नेहा च कथ्यते। दृष्टिरियं चतुर्थांशन्यूना अर्थात् पादोनात्मिका पञ्चचत्वारिंशत्कलात्मिका (45) च कथ्यते। ग्रहाणां दृष्टिरियं यस्मिन् भावे भवति, तत्भावसम्बन्धि सर्वं शुभफलं प्राप्यते। अतः अस्याः नाम मेलापिका दृष्टिरपि वर्तते।। वर्षकुण्डल्यां सर्वे ग्रहाः स्वस्थानात् तृतीयं एकादशञ्च स्थानं गुप्तस्नेहदृष्ट्या पश्यन्ति। दृष्टिरियं यंशोना चत्वारिंशत्कलात्मिका च कथिता। एकादशे स्थाने च या दृष्टिः सा षडंशवती दशकलात्मिका च कथिता। दृष्टिरियमपि कार्यस्य संसिद्धिदा भवति। तद्यथा-

दृष्टिः स्यान्नवपञ्चमे बलवती प्रत्यक्षतः स्नेहदा

पादोनाऽखिलकार्यसाधनकरी मेलापकाख्योच्यते।

गुप्तस्नेहकरी तृतीयभवने कार्यस्य संसिद्धिदा।

त्र्यंशोना कथिता तृतीयभवने षडभागदृष्टिर्भवे।।

शत्रुदृष्टि:- वर्षकुण्डल्या सर्वे ग्रहाः स्वस्थानात् चतुर्थं स्थानं दशमं च स्थानं गुप्तशत्रुदृष्ट्या पश्यन्ति। दृष्टिरियं पादमिता अर्थात् चतुर्थांशमिता पंचदशकलात्मिका च भवति। दृष्टिरियं हानिप्रदा मन्यते। दृष्टिरियं कार्यस्याभीष्टस्य विध्वंसकारिणी कथिता।

वर्षकुण्डल्यां सर्वे ग्रहाः स्थानात् सप्तमं स्थानं प्रथमं च स्थानं प्रत्यक्षशत्रुदृष्ट्या पश्यन्ति। दृष्टिरियं पापफलं ददाति। युद्धकारिणी क्लेशकारिणी च दृष्टिरियं कथ्यते। दृष्टेः फलं तदैव प्राप्यते यदा दृष्टदृश्ययोर्मध्येऽन्तरं द्वादशांशाधिकं न भवति। तद्यथा-

दृष्टिः पादमिता चतुर्थदशमे गुप्तारिभावा स्मृता

ऽन्योन्यं सप्तमभे तथैकभवने प्रत्यक्षवैराऽखिला।

दृष्टं दृत्रियं क्षुताह्वयमिदं कार्यस्य विध्वंसदं।

संग्रामादिकविप्रदं दृश इमाः स्युठ्ठदशांशान्तरे।।

वर्षकुण्डल्या ग्रहाणां दृष्टिः जन्माङ्गेऽस्मिन् वर्णिता। वर्षकुण्डल्यामस्यां चन्द्रः नवमे भावे मेषराशिस्थः। चन्द्रस्य प्रथमे पञ्चमे च भावे प्रत्यक्षस्नेहा दृष्टिः, पुनश्च तृतीये सप्तमे च भावे गुप्तस्नेहादृष्टिः वर्तते।

शनिभौमौ कुण्डल्यामस्यां तृतीये भावे तुलाराशिस्थौ। द्वयोः सप्तमे एकादशे च प्रत्यक्षस्नेहा दृष्टिः, पञ्चमे प्रथमे च भावे गुप्तस्नेहा दृष्टिः वर्तते। शुक्रः चतुर्थे भावे वृश्चिकराशिस्थः। तस्मात् स्थानात् शुक्रः अष्टमं द्वादशं भावञ्च प्रत्यक्षस्नेहदृष्ट्या पश्यति, पुनश्च षष्ठं भावं द्वितीयं भावञ्च गुप्तस्नेहदृष्ट्या पश्यति। सूर्यबुधगुरवश्च कुण्डल्यामस्यां धनुराशौ पञ्चमभावस्थिताः सन्ति। तस्मात् स्थानात् सूर्यबुधगुरूणां नवम भावे प्रथमे च भावे प्रत्यक्षस्नेहा दृष्टिः, पुनश्च सप्तमे भावे तृतीये च भावे गुप्तस्नेहादृष्टिः वर्तते।

इदानीं वर्षकुण्डल्यामस्यां ग्रहाणां शत्रुदृष्टिः विचार्यते। वर्षकुण्डल्यामस्यां चन्द्रः मेषराशौ नवमभावस्थितः। तस्मात् स्थानात् चन्द्रः द्वादशं षष्ठं च भावं गुप्तशत्रुदृष्ट्या, तथा नवमं तृतीयञ्च भावं प्रत्यक्षशत्रुदृष्ट्या पश्यति। शनिभौमौ षष्ठं द्वादशं च भावं गुप्तशत्रुदृष्ट्या तथा च तृतीयं नवमञ्च भावं प्रत्यक्षशत्रुदृष्ट्या पश्यतः। शुक्रः वृश्चिकराशौ नवमभावस्थितः। तस्मात् स्थानात् शुक्रः सप्तमं प्रथमञ्च भावं गुप्तशत्रुदृष्ट्या तथा च चतुर्थं दशमञ्च भावं प्रत्यक्षशत्रुदृष्ट्या पश्यति। सूर्यबुधगुरवः वर्षकुण्डल्यामस्यां धनुराशौ पञ्चमभावस्थिताः। तस्मात् स्थानात् सूर्यबुधगुरवः अष्टमं द्वितीयञ्च भावं गुप्तशत्रुदृष्ट्या, पञ्चमं एकादशं च भावं प्रत्यक्षशत्रुदृष्ट्या पश्यन्ति।

वर्षकुण्डल्या ग्रहाणां दृष्ट्यानुसारमेव तेषां मित्रामित्रं ज्ञायते। येषां ग्रहाणां पारस्परिकी मित्रदृष्टिः, ते मिथः मित्राणि, येषां शत्रुदृष्टिः ते मिथः शत्रवः भवन्ति। यत्र दृष्टिसम्बन्धो न भवति, ते मिथः समाः भवन्ति। वर्षकुण्डल्या ग्रहाणां दृष्टिः चक्रेणानेनापि ज्ञायते।

विषयसङ्ग्रहः

ग्रहाणां चतुर्विधसम्बन्धेषु एकः दृष्टिसम्बन्धोऽपि वर्तते। अनेनैव ग्रहदृष्टेः महत्त्वं ज्ञायते। यदि द्वयोः ग्रहयोः पारस्परिक सम्बन्धो न भवेत् तदा योगे सत्यपि शुभफलं न प्राप्यते। अतः ग्रहाणां सम्यक् शुभाशुभफलबोधाय तेषां दृष्टिरपि ज्ञेया। पाठ्यांशेऽस्मिन् ग्रहदृष्टिः निरूपिता। जातकशास्त्रानुसारिणी ताजिकशास्त्रानुसारिणी च ग्रहाणां दृष्टिः मया प्रतिपादिता। ग्रहाणां सामान्य दृष्टिः, विशिष्टा दृष्टिः, वर्षकुण्डल्या ग्रहाणां दृष्टिः, राहुकेत्वोः दृष्टिः पाठ्यांशेऽस्मिन् सोदाहरणं मया निरूपिता।

**ग्रह-नक्षत्र**

ब्रह्माण्डेऽस्मिन् ये केऽपि भौतिकपदार्थाः दृश्यन्ते ग्रह-नक्षत्र-पृथिवी-तारकादयः, तेषां ज्ञानाय मनुष्य आदिकालादेव प्रयत्नशीलो वर्तते। एतज्ज्ञानाय मनुष्येन विज्ञानस्य मार्गद्वयं आलम्बतम्। प्रथमं भौतिक विज्ञानम् अपरं आध्यात्मिक विज्ञानम्। पाश्चात्यैः भौतिकविज्ञानस्य अनुसरणं कृतं यद्यपि प्राच्यैः आध्यात्मिक विज्ञानमनुसृतम्। आध्यात्मिकचिन्तनेन एव ऋषयः खगोलस्य गूढ़तत्त्वानां अन्वेषणं कृतवन्तः। तन्मते यत्र भौतिकविज्ञानं समाप्यते तत एव आध्यात्मिक विज्ञानमारभ्यते। भौतिकविज्ञानेन केवलं पञ्चज्ञानेन्द्रियगम्यं ज्ञानमेव साध्यमस्ति यद्यपि अध्यात्ममार्गानुसारिण ऋषयः पञ्चज्ञानेन्द्रियगम्यज्ञानादपि पारङ्गताः। भारतीयज्ञानपरम्परायां प्रत्येक पदार्थाः चित्स्वरूपाः स्वीकृताः। सर्वेषामन्तर्निहिता एका अभिमानिदेवता स्वीकृता। परम्परायामस्यां ग्रहा अपि चित्स्वरूपाः देवांशभूताः मन्यन्ते। तद्यथा-

''ग्रहाधीनं जगत्सर्वम्। ते ग्रहास्तु देवांशकाःश्श्। पाठ्यांशेऽस्मिन् ग्रहाणां स्वरूपविषयिणी चर्चा क्रियते। ग्रहाणां भौतिक स्वरूपं, दैहिक स्वरूपं, तस्य प्रयोजनञ्च पाठ्यांशस्यास्य चर्चाविषयः।

रविस्वरूपम्।

"सूर्य आत्मा जगतस्तस्थुषश्चश्श् (ऋग्वेदः) सत्यमिदं वेदवचनं यत् सूर्यः विश्वस्य आत्मा यतोहि सूर्येण विना विश्वेऽस्मिन् जीवनस्य कल्पनमपि कर्तुं न शक्यते। सूर्यस्य भौतिक पिण्डमग्नितत्त्वेन परिपूर्णमस्ति। तत्र सर्वाधिक हाइड्रोजनद्रव्यं (गैस) वर्तते। सूर्यः पृथ्वीतः 13,000,000 (त्रिशतलक्षोत्तर-एककोटिः) मीलमितं दूरं वर्तते। अस्य व्यासः 866,500 (सार्धषड्षष्टिसहस्त्रोत्तर-अष्टलक्ष) मीलमितोवर्तते। नक्षत्र-तारकादयोऽपि सूर्यस्य प्रकाशेनैव प्रकाशिताः भवन्ति। वेदेषु वर्णितं यत् सूर्यः भुवनानि पश्यन्न याति। तद्यथा-

आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतम्मर्त्य च।

हिरण्ययेन सविता रथेन देवो याति भुवनानि पश्यन्।।

सूर्य एव अहोरात्रकारकः। सूर्यो यदा मेषराशौ तुलाराशौ वा प्रविशति तदा अहोरात्रस्य मानं तुल्यं भवति। पुराणेषु वर्ण्यते यत् दक्षप्रजापतेः द्वे पु।।यौ आस्ताम् दितिः अदितिश्च। द्वयोः विवाहः कश्यपऋषिणा सह जातः। अदितेः पुत्रः आदित्य इति कथ्यते। सूर्यस्य द्वौ विवाहौ सञ्जातौ। सूर्यस्य प्रथमा पत्नी-संध्या। अपरा च छाया, हेलिः, सूर्यः, तपनः, दिनकृत्, भानुः, पूषा, अरुणः, अर्कादीनि सूर्यस्य नामान्तराणि सन्ति। तद्यथा-

"हेलिः सूर्यस्तपनदिनकृत् भानु पूषारुणार्काः''

सूर्यः चतुरस्त्रः अर्थात् प्रसारितभुजद्वयप्रमाणसमोच्छ्रायः, मध्यमोच्चः, स्वल्पकचः, पित्तात्मकः, दृढास्थिः, वीरः, मधुसमपीतनयनः, रक्तश्यामवर्णः, विस्तीर्णश्च अस्ति। तद्यथा-

चतुरस्त्रो नात्युच्चस्तनुकेशः पैत्तिकोऽस्थिसारश्च।

शूरो मधुपिङ्गाक्षो रक्तश्यामः पृथुश्चार्कः।।

सूर्यस्य स्वराशिः सिंहो वर्तते। मेषराशिः सूर्यस्योच्चराशिः तथा च मेषस्य दशमे अंशे सूर्यः परमोच्चो भवति। तुलाराशिः सूर्यस्य नीचराशिः, सिंहश्च मूलत्रिकोणं वर्तते। कस्यामपि कुण्डल्यां स्वस्थानात् सप्तमं स्थानं सूर्यः पूर्णतया पश्यति, सूर्यस्य नैसर्गिकबलं ग्रहेषु सर्वाधिक वर्तते।

यस्य नरस्य जन्मकाले जन्माङ्गे सूर्यो बली भवति, तस्य नरस्य स्वरूपमपि सूर्यवत् भवति। अतः यस्य कस्यापि जन्माङ्गे सूर्यः लग्नस्थः, नवमांशलग्नस्थो वा भवति, तेषां शारीरिक स्वरूपमपि सूर्यवत् भवति अर्थात् ते जना अपि सूर्यवत् चतुरस्त्राः, मध्यमोच्चाः अत्योन्नता न इति, अल्पकेशयुताः भवन्ति। तेषां प्रकृतिरपि पित्तात्मिका भवति। ते शूरवीराः भवन्ति। ते जनाः मधुपिङ्गाक्षाः भवन्ति। तेषां वर्णः रक्तश्यामो भवति। तेषां शरीरो विस्तीर्णो भवति। ।

अनेन प्रकारेण ज्ञायते यत् सूर्यस्य यत् स्वरूपं लघुजातके वराहमिहिरेण कथितम्। तत्स्वरूपमेव जन्मकुण्डल्यां ज्ञेयम्। यस्य मनुष्यस्य जन्माङ्ग सूर्यो बली भवति तस्य मनुष्यस्य शारीरिक स्वरूपमपि सूर्यस्य स्वरूपवत् भवति।

**चन्द्रस्वरूपम्**

इमं देवा असपत्न सुबध्वं महते क्षत्राय महते

ज्यैष्ठयाय महते जान राज्यायेन्द्रस्येन्द्रियाय

इमममुष्य पुत्रममुष्यै पुत्रमस्यै विश

एष वोमी राजा सोमोऽस्माकं ब्राह्मणानां राजा।।

सौरमण्डलस्य द्वितीयोऽयं प्रमुखो ग्रहः सोमः। शशिः, इन्दुः, विधुः, चन्द्रः, कलाधरः, हिमगुः, मृगाङ्कः, शशाङ्कः, सुधांशुः, शीतरश्मिः, हिमांशुः, ग्रहस्यास्य एव नामान्तराणि। चन्द्रः सूर्यस्य प्रकाशेन प्रकाशते। निशाकाले चन्द्रस्य अमृतरश्मिभिः अस्माकं पृथ्वी प्रकाशते। यदा

सूर्यचन्द्रयोः 180 अंशात्मकमन्तरं भवति, तदा पूर्णिमा भवति गगनमण्डले पूर्णिमायां पूर्णचन्द्रः निशाकाले दृश्यते। भारतीयखगोलशास्त्रे सूर्यात् चन्द्रस्योत्पत्तिः मन्यते। तद्यथा-

आदित्याद्वै चन्द्रमा जायते। (ऐतरेय ब्राह्मण)

पाश्चात्यानामभिमतमिदं यत् चन्द्रस्योत्पत्तिः पृथ्व्याः जाता। चन्द्रस्य व्यासः 2160 मीलमितो वर्तते। सोमात् पृथ्व्याः दूरी 2,38000 (अष्टत्रिंशतसहस्त्रोत्तर-द्विलक्ष) मीलमिता वर्तते। सोमस्योदयः पश्चिमदिशि अस्तञ्च उत्तरदिशि भवति चन्द्र 27-1/3 (पादोन-सप्तविंशति) दिवसेषु सम्पूर्णस्य नक्षत्रमण्डलस्य प्रदक्षिणां करोति। चन्द्रः 2-1/4 (सपादद्वयं) दिनं यावत् एकस्मिन् राशौ सञ्चरति।

चन्द्रस्य गतिमधिकृत्य वेदेषु कथितं यत् 'चन्द्रमा मनसो जातःश्श् अर्थात् यथा मनः गीतशीलं तथैव चन्द्रोऽपि गतिशीलो वर्तते। ज्योतिषशास्त्रेऽपि चन्द्रः मनसः कारको मन्यते। यथोत्तम्।

आत्मा रविः शीतकरस्तु चेतः।

पुनश्च ग्रहेषु सूर्यचन्द्रौ राजानौ स्तः। अनेन एव चन्द्रस्य महत्त्वं ज्ञायते। वराहमिहिरेण चन्द्रस्य स्वरूपं लघुजातके वर्णितमेवम्।

स्वच्छः प्राज्ञो गौरवश्चपलः कफवातिको रुधिरसारः।।

मृदुवाग् घृणी प्रियसखस्तनुवृत्तश्चन्द्रमाः प्रांशुः।।

चन्द्रः स्वरूपेण धवलो भासते। सः पण्डितः गौरवर्णीयश्च वर्तते। चन्द्रस्य स्वभावः चञ्चलः प्रकृतिः कफवातात्मिका च वर्तते। चन्द्रस्य शरीरे रत्तस्याधिक्यं वर्तते। चन्द्रः मधुरां वाणीं वदति। स्वभावेनैव चन्द्रः दयालुः। चन्द्रः मित्राणां प्रियोऽस्ति। अस्य शरीरस्य स्वरूपं कृशवर्तुलाकारं प्रांशुः च वर्तते।

चन्द्रस्य स्वराशिः कर्को वर्तते। वृषराशिः चन्द्रस्योच्चराशिः। वृष एव चन्द्रस्य मूलत्रिकोणं वर्तते। वृषस्य तृतीये अंशे चन्द्रः परमोच्चः, शेषेषु अंशेषु चन्द्रस्य मूलत्रिकोणं भवति। वृश्चिकराशिः चन्द्रस्य नीचराशिः। वृश्चिकराशेः तृतीये अंशे चन्द्रः परमनीचः चन्द्रस्य कोऽपि शत्रुः नास्ति। सूर्यबुधौ चन्द्रस्य मित्रे स्तः। शेषाः सर्वे ग्रहाः चन्द्रस्य

मध्यमा:।

यस्य मनुष्यस्य जन्मकाले चन्द्रो बली भवति, तस्य नरस्य स्वरूपमपि चन्द्रवत् भवति। अत: यस्य कस्यापि जन्माङ्गे चन्द्र: लग्नस्थ:, नवमांशस्थो वा भवति अथवा चन्द्र: स्वोच्चराशौ भूत्वा लग्नं वीक्ष्यति, तदा सो जनोऽपि चन्द्रवत् गौरवर्णीयो भवति। तस्य स्वभावोऽपि चन्द्रवत् चञ्चलो भवति। तस्य जनस्य प्रकृतिरपि कफवातात्मिका भवति। सो

जन: मधुरां वाणीं वदति, तस्य बहूनि मित्राणि भवन्ति। स: चन्द्रवत् मित्राणां प्रियो भवति। स: जन: दयालु: भवति। तस्य मनुष्यस्य शारीरिक स्वरूपं कृशवर्तुलाकारञ्च भवति। एवं चन्द्रस्य प्रभावेन मनुष्यस्य शारीरिक स्वरूपं गुणाश्च चन्द्रवत् जायन्ते।

**कुजस्वरूपम्**

अग्निर्मूद्ध दिव: ककुत्पति: पृथिव्याऽअयम्।

अपाभ्रेता ॐ सिजिन्नति।।

रत्तवर्णीयो भौम: पृथिव्या: सन्निकटे स्थितो वर्तते। अयं ग्रह: पृथ्वीत: 6,25,00000 (पञ्चविंशतिलक्षोत्तर षड्कोटि:) मीलमितं दूरं वर्तते परञ्च प्रत्येक पञ्चदशे वर्षे ग्रहोऽयं पृथिव्या: अत्यन्तं निकटं दृश्यते। तदा पृथ्विभौमयोरन्तरं केवलं 34,60,000 (षड्लक्षोत्तश्चर्तुविंशतकोटि:) मीलमितमेव वर्तते। अस्य ग्रहस्य व्यास: 4115 (एकशताधिकपञ्चदशोत्तर-चतुर्सहस्त्र) मीलमितो वर्तते। भौम: 687 (षडशताधिकसप्ताशीाति:) दिवसेषु सूर्यस्य परिक्रमा करोति। ग्रहस्यास्य गति: परिवर्तनशीला। सूर्यस्य निकटे सति भौमस्य गति: वर्धते। अस्य ग्रहस्योदय: पश्चिमदिशि भवति, पूर्वदिशि च ग्रहोऽयं अस्तं याति। सार्धकमासे (1-1/2) ग्रहोऽयं एकस्य राशे: भोगं करोति।

भौमग्रहस्य द्वौ चन्द्रौ वर्तेते। एकस्य संज्ञा डैमास (क्मपउें) अपरस्य फेबोस (चीइवे) वर्तते। 'डैमासश् इत्यस्य व्यास: 5 मीलमित: ''फैबोसश्श् इत्यस्य व्यास: 10 दशमीलमित: वर्तते। अस्मिन् ग्रहे वायु: जलञ्च वर्तेते। इमे मनुष्यस्य जीवनाय मूलभूततत्त्वे स्त:। अत एव भौमेऽपि जीवनस्य सम्भावना मन्यते। भौम: पृथ्विपुत्रो मन्यते। लोहितांग:, अङ्गारक:, सुरसेनापति:, स्कन्द:, कुज:, भूमिपुत्र: कुमार: इत्यादय: भौमस्य नामान्तराणि सन्ति। तद्यथा-

"सुरसेनापति: स्कन्द: पठ्यतेऽङ्गारको ग्रह: (ब्रह्माण्डपुराणम्)

भौम: शत्ते: प्रतीकोऽस्ति। ज्योतिषशास्त्रे ऊर्जादायक:, शत्तिदायकश्च ग्रहोऽयं मन्यते। मनुष्यस्य दाम्पत्यजीवनेऽपि भौमस्य विशिष्ट: प्रभाव: स्वीकृत:। भौमस्योच्चराशि: मकर: नीचराशिश्च कर्कट:। मेषराशि: भौमस्य मूलत्रिकोणं वर्तते। मेषवृश्चिकयोरधिपति:

भौमो वर्तते। भौमस्य स्वरूपं वराहमिहिराचार्येण लघुजातके वर्णितम्।

''हिंस्त्रो ह्रस्वस्तरूण: पिंङ्गाक्ष: पैत्तिको दुराधर्ष:।

चपल: सरत्तगौरो मज्जासाश्च माहेय:।।

अर्थात् भौम: हिंसायुत्त:, देवानां सेनापतिश्च वर्तते। सेनानायक: हिंसां करोत्येव। भौम: ह्रस्व: अल्पोच्चो भवति। अयं दुराधर्ष:, पिङ्गाक्ष:, युवकश्च। दुराधर्षस्याभिप्राय: यत् अस्य आचरणं सम्यक् नास्ति। अस्य स्वभावेऽपि चञ्चलता वर्तते। अयं ग्रह: रत्तमिश्रितगौरवर्णीयो वर्तते। अस्य देहे मज्जाया आधिक्यं वर्तते।

यस्य मनुष्यस्य जन्मकाले भौमो बली भवति, तस्य जनस्य स्वरूपमपि भौमवत् भवति। अत: यस्य कस्यापि जन्माङ्ग भौम: लग्नस्थ: नवमांशलग्नस्थो वा भवति, अथवा भौमो बली भूत्वा लग्नमीक्ष्यति, तदा सो जनोऽपि भौमवत् रत्तमिश्रितगौरवर्णीयो भवति। स: जन: पिङ्गाक्ष:, दुराधर्ष:, हिंसकश्च भवति। प्रायश: सैनिकानां आतंक-वादीनाञ्च जन्माङ्ग भौमस्य प्रभावो दृश्यते परञ्च द्वयो: कश्चन भेद:। तत्र अन्येषां ग्रहाणां युति-दृष्टिभेदेन द्वयो: हिंसककार्येषु भेदो जायते। एतादृश: जन: दैहिकरूपेण अत्योन्नतो न भवति। एतादृशानां जनानां शरीरे मज्जाधिक्यं भवति।

बुधस्वरूपम्-

"उदबुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते स ॐ सृजेथामयञ्च।

अस्मिन्त्सधस्थे अध्युत्तरस्मिन्विश्वेदेवा यजमानश्च सीदत।।

सूर्यस्य निकटस्थो ग्रहों बुध: सूर्यात् 33841467 (त्रियस्त्रिंशतकोट्याधिकचतु-राशीतिलक्षात्मकसप्तषष्ट्योत्तरचतुर्दशसहसत्र) मीलमितो दूरमस्ति। अस्य ग्रहस्य व्यास: 3000 मीलमितो वर्तते। 88 दिवसमश्यन्तरमेव बुध: सूर्यस्य प्रदक्षिणां करोति। स्थूलरूपेण पंचविंशतिदिनमभ्यन्तरं बुध: एकस्य राशेर्नोगं करोति। चन्द्रपुत्रो बुधो ग्रहेषु युवराज: कथ्यते। ग्रहोऽयं कालपुरुषस्य वास्थाने राजते। बुधो वेदशास्त्रज्ञो मन्यते। तद्यथा-

''नारायणं बुधं पाहुर्वेदज्ञानविदो बुध:।''

सौम्य-हेम्न-वित्त-ज्ञ-बोधन-चन्द्रपुत्र-तारातनय-इन्द्रपुत्रादयो बुधस्य नामान्तराणि वर्तन्ते। बुध: कन्याया: पंचदशमशं यावत् परमोच्चसंज्ञक:, पंचमंशं यावत् मूलत्रि-कोणं तदनन्तरं बुधस्य स्वराशि: भवति। कन्यामिथुनयो: स्वामी बुधो वर्तते। बुधग्रहस्य स्वरूपमेव वर्णितमाचार्यवराहमिहिरेण

मध्यमरूप: प्रियवाग् दूर्वाश्याम: शिराततो निपुण:।

त्वक्सारस्त्रिस्थूणः सततं हृष्टस्तु चन्द्रसुतः।।

बुधस्य दूर्वासमश्यामवर्णो भवति। बुधः विस्तृतस्नायुः, दक्षः, प्रमुदितश्च भवति। बुधस्य प्रकृतिः कफात्मिका भवति।

अतः यस्य मनुष्यस्य जन्मकाले बुधः लग्नस्थः, नवमांशलग्नस्थो वा भवति अथवा बुधो बली भूत्वा लग्नमीक्ष्यति, तदा सो जनोऽपि बुधवत् दूर्वासमश्यामवर्णीयो भवति। सो जनः विस्तृतस्नायुः, दक्षः, दृढत्वचः, प्रमुदितश्च भवति।

**गुरुस्वरूपम्**

बृहस्पतेऽअति यदर्योऽअर्को घुमद्विभाति क्रतुमज्जनेषु।

यद्दीदयच्छवसऽऋत प्रजात तदस्मासु द्रविणं देहि चित्रम्।।

सौरमण्डलस्य सर्वेषु ग्रहेषु गुरुरेव गुरुर्तरो वर्तते। अस्य व्यासः 986720 (अष्टनवतिलक्षाधिकसप्तविंशतियोत्तर षड्सहस्त्रम्) मीलमितो वर्तते। बृहस्पतिः द्वादश-वर्षाभ्यन्तरं सूर्यस्य प्रदक्षिणां करोति। सूर्यात् बृहस्पतिः 4,83,200,000 (द्वात्रिंशतोत्तर अष्टचत्वारिंशत्कोटिः) मीलमितं पृथ्वीतः 367,000,000 (सप्ततिलक्षोत्तरषत्रिंशत्-कोट्या) मीलमितं दूरं वर्तते। एकस्मिन् वर्षे बृहस्पतिः एकस्य राशेः भोगं करोति। बृहस्पतिः पूर्वदिशि उदेति पश्चिमे च अस्तं याति। एतत्ग्रहसम्बन्धिनः चन्द्राः दश वर्तन्ते। तेषु चत्वार एवं प्रमुखाः सन्ति ।

सर्वेषु ग्रहेषु बृहस्पतिः अत्यन्तं शुभो मन्यते। ग्रहोऽयं सौख्यस्य ज्ञानस्य समृद्धेश्च प्रतीकोऽस्ति। ग्रहाणां मन्त्री गुरु एव वर्तते। अङ्गिरा, जीवः, सुरगुरुः, वाचस्पतिः, सुराचार्यः, देवेज्यः, ईज्यादीनि बृहस्पतेः नामान्तराणि सन्ति। वेदेषु बृहस्पतये ''अङ्ग-रसःश्श् पदस्य प्रयोगः कृतः।

ज्योतिषशास्त्रे बृहस्पतिः ज्ञानदायकः, सुखदायकः, समृद्धिदायकश्च मन्यते। धन्विमीनयोरधिपतिः बृहस्पतिः मन्यते। धनुराशिः बृहस्पतेः मूलत्रिकोणमपि वर्तते। धनुराशौ दशमंशं यावत् बृहस्पतेः मूलत्रिकोणं, तदनन्तरं स्वगृहञ्च कथितम्। कर्कटो ग्रहस्यास्योच्चराशिः मकरश्च नीचराशिः कथ्यते। कर्कस्य पंचमे अंशे बृहस्पतिः परमोच्चः, मकरस्य पंचमे अंशे च परमनीचो भवति। कस्यामपि जन्मकुण्डल्यां त्रि-कोणभावेषु केन्द्रभावेषु वा बृहस्पतेः स्थितिः उत्तमा भवति। वराहमिहिरेण लघुजातके बृहस्पतेः स्वरूपमेवं वर्णितम्-

मधुनिभनयनो मतिमानुपचितमांसः कफात्मको गौरः।

ईषत्पिङ्गलकेशो मेदः सारो गुरुदीर्घश्च।।

बृहस्पतिः मधुसमलोचनः, बुद्धिमान्, मांसपुष्टशरीरात्मको वर्तते। अस्य प्रकृतिः कफात्मिका वर्तते। बृहस्पतिः गौरवर्णीयोऽस्ति। अस्य ग्रहस्य केशाः पिङ्गलवर्णस्य भवन्ति। बृहस्पतेः शरीरे मेधस आधिक्यं भवति। रविचन्द्रभौमाः ग्रहस्यास्य मित्राणि, शनिः समः, बुधशुक्रौ शत्रू कथितौ।

यस्य नरस्य जन्मकाले बृहस्पतिः बली भवति, तस्य स्वरूपमपि जीववत् कथितम्। अतः यस्य जन्माङ्गे बृहस्पतिः लग्नस्थः, नवमांशलग्नस्थो वा भवति अथवा बली भूत्वा लग्नमीक्ष्यति तदा सो जनः मधुसमलोचनः, बुद्धिमान्, मांसपुष्टशरीरात्मक गौरवर्णीयश्च भवति। तस्य मनुष्यस्य प्रकृतिः कफात्मिका भवति। तस्य केशानां पिङ्गलवर्णो भवति। सः दीर्घशरीरी भवति। एवं बृहस्पतेः प्रभावेन तस्य मनुष्यस्य स्वरूपं गुणाश्च गुरुवत् जायन्ते।

**शुक्रस्वरूपम्**

अन्नात्परस्त्रुतो रस ब्रह्मणा व्यपिवत्क्षत्रं पयः सोमं प्रजापतिः।

ऋतेन सत्यमिन्द्रियं विपान ॐ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु।।

गगनमण्डले शुक्रः बुधस्य सन्निकृष्टो वर्तते। सूर्यचन्द्रयोरनन्तरं शुक्र एव सर्वाधिक प्रकाशितो ग्रहो वर्तते। सूर्योदयात् पूर्वं पूर्वदिशि सूर्यास्ताद पश्चाच्च पश्चिमदिशि शुक्रो दृश्यते। शुक्रः सूर्यात् 67,000,000 (सप्ततिलक्षोत्तरषड्कोटिः) मीलमितं दूरं वर्तते। भ्रमणवशात् शुक्रस्य पृथ्वीतः अन्तरं 20000000 (विंशतिकोटयः) मीलमितो भवति तदा शुक्रः पृथिव्याः निकटतमो भवति। अस्य ग्रहस्य व्यासः 7000 मीलमितं वर्तते। शुक्रः मासे एकस्य राशेः भोगं करोति। वैदिकसाहित्ये शुक्राय ष्वेनश्श् शब्दः प्रयुक्तः। रोमजनाः शुक्रस्य कृते ष्वीनसश्श् शब्दस्य प्रयोगं कुर्वन्ति। द्वयोः शब्दयोः साम्यं वर्तते। दैत्यगुरुः उशना, काव्यः, भार्गवः, भृगुसुतः, दानवेज्यादीनि शुक्रस्य नामान्तराणि सन्ति।

पाश्चात्यानां मते शुक्रः कलायाः, प्रेम्णः, सौन्दर्यस्य, आकर्षणस्य च द्योतको वर्तते। भारतीयशास्त्रेष्वपि शुक्रः कामस्य प्रतीको मन्यते। ग्रहाणां मन्त्रिपदं शुक्रस्य पार्श्वेऽपि वर्तते। तद्यथा-

''सचिवौ सितेज्यौ''

द्वादशराशिषु मीनराशिः शुक्रस्योच्चराशिः कन्याराशिः च शुक्रस्य नीचराशिः वर्तते। मीनस्य सप्तविंशे अंशे शुक्रस्य परमोच्चत्वं कन्यायाः सप्तविंशे अंशे शुक्रस्य परमनीचत्वं च भवति। तुलाराशिः शुक्रस्य मूलत्रिकोणं वर्तते। तुलावृषभराश्योरधिपतिः शुक्रः वर्तते। तुलाराशेः 15 पञ्चदश-अंशं यावत् शुक्रस्य मूलत्रिकोणं तदनन्तरं स्वगृहञ्च भवति। शुक्रस्य स्वरूपं वराहमिहिरेण लघुजातके वर्णितमेवम्

श्यामो विकृष्टपर्वा कुटिलासितमूर्द्धजः सुखीकान्तः।

कफवातिको मधुरवाग्भृगुपुत्रः शुक्रसारश्च।।

अर्थात् शुक्रस्य श्यामवर्णः, शरीरस्यावयवाः आकर्षकाः, कुञ्चितकृष्णकेशाश्च भवन्ति। शुक्रस्य प्रकृतिः कफवातात्मिका भवति। एषः मृदुभाषी, सुखी च वर्तते। शुक्रे वीर्याधिक्यं भवति।।

यस्य नरस्य जन्मकाले शुक्रो बली भवति, तस्य स्वरूपमपि शुक्रवत् भवति। अतः यस्य जन्माङ्ग शुक्रः लग्नस्थः, नवमांशलग्नस्थो वा अथवा शुक्रो बली भूत्वा लग्नमीक्ष्यति, तदा सो जनः श्यामवर्णीयो भवति। तस्य जनस्य शरीराङ्गानि सुन्दराणि भवन्ति। सः जनः मृदुभाषी सुखी च भवति। तस्य प्रकृतिरपि कफवातात्मिका भवति। एवं शुक्रस्य प्रभावेन जनानां स्वरूपमपि शुक्रवत् भवति।

**शनिस्वरूपम्**

शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये।

शंय्योरभिस्त्रवन्तु नः।।

गगनमण्डले बृहस्पतेः अनन्तरं शनेः कक्षा वर्तते। ग्रहोऽयं दूरस्थो वर्तते। अस्य ग्रहस्य व्यासः 71500 (पञ्चशतोत्तरेकसप्तसहस्र) मीलमितो वर्तते। ग्रहस्यास्य सूर्यात् दूरी 886000000 (षष्टिलक्षोत्तरष्टाशीतिकोटि) मीलमिता पृथ्वीतः दूरी च 791000000 (दशलक्षोत्तरेकोनाशीतिवकोटि) मीलमिता वर्तते। शनिः 30 वर्षेषु सूर्यस्य प्रदक्षिणामेकां करोति। ग्रहोऽयं 2-वर्षयोः एकस्य राशेः भोगं करोति। ग्रहोऽयं पूर्वदिशि उदेति पश्चिमदिशि च अस्तं याति। ग्रहस्यास्य गतिः मन्दतमा वर्तते अत एव अस्य संज्ञा “शनिः। तद्यथा-

शनैश्शनैश्चलतीति शनैश्चरः

सौरिः, अर्कपुत्रः, आर्किः, असितः, विरूपः, यमः, पिङ्गलादीनि ग्रहस्यास्य नामान्तराणि सन्ति। तद्यथा-

कोणस्थः पिङ्गलो बभ्रुः कृष्णो रोद्रोऽन्तको यमः।

शौरिः शनैश्चरो मन्दः पिपलादेन संस्तुतः।।

रुद्रो वैवस्वतः साक्षाद् यमो लोक प्रभुः स्वयम्।

महाग्रहो द्विजश्रेष्ठो मन्दगामी शनैश्चरः।।

पुराणेषु वर्णितं यत् शनिः सूर्यस्य पुत्रो वर्तते। मकरकुम्भयोरधिपतिः शनैश्चरो वर्तते।

कुम्भराशौ विशत्यंशं यावत् शनेः मूलत्रिकोणं तदनन्तरं स्वगृहञ्च भवति। तुला शनेः उच्चराशिः मेषश्च नीचराशिः वर्तते। तुलायाः विंशे अंशे शनिः परमोच्चः मेषस्य विंशे अंशे च शनिः परमनीचो भवति। वराहमिहिरेण लघुजातके शनिस्वरूपमेवं प्रतिपादितम्-

कृशदीर्घः पिङ्गाक्षः कृष्णः पिशुनोऽलसोऽनिलप्रकृतिः।

स्थूलनखदन्तरोमा शनैश्चरो स्नायुसारश्च।।

अर्थात् शनेः श्यामवर्णः, स्थूलनखदन्तकेशाश्च वर्तन्ते। ग्रहोऽयं कृशः, दीर्घः पिङ्गाक्षः, निन्दकः, आलस्ययुत्तश्च वर्तते। अस्य प्रकृतिः वातात्मिका वर्तते।

यस्य नरस्य जन्मकाले शनिः बली भवति, तस्य नरस्य स्वरूपमपि शनिवत् भवति। अतः यस्य जन्माङ्गे शनिः लग्नस्थः, नवमांशलग्नस्थो वा अथवा शनिः बली भूत्वा लग्नमीक्ष्यति, तदा सो जनः श्यामवर्णीयो भवति, तस्य जनस्य स्थूलनखदन्तकेशाश्च भवन्ति। तस्य जनस्य शरीरः कृशः दीर्घश्च भवति। सः पिङ्गाक्षः भवति। सो जनः निन्दक आलस्ययुत्तश्च भवति। तस्य जनस्य प्रकृतिः वातात्मिका भवति।

**स्वरूपप्रयोजनम्-**

वराहमिहिरेण लघुजातके प्रत्येक सिद्धान्तस्य प्रयोजनमपि कथितम्। तस्मिन्नेव क्रमे ग्रहाणां स्वरूपस्य प्रयोजनं वर्णयति वराहमिहिरः-

एते ग्रहा बलिष्ठा प्रसूतिकाले नृणां स्वमूर्तिसमम्।

कुर्युर्देहं नियतं बहवश्च समागता मिश्रम्।।

अर्थात् कस्यापि मनुष्यस्य जन्मकाले यो ग्रहः सर्वाधिको बलयुतो भवति, सो ग्रहः मनुष्यस्य स्वरूपं निजरूपतुल्यं करोति। यदि बहवः ग्रहाः बलिनो भवन्ति, तदा नरस्य मिश्रितं रूपं कुर्वन्ति अर्थात् तस्मिन् मनुष्ये बलयुतानां ग्रहाणां गुणाः मिश्रितरूपेण भवन्ति।

विषयसङ्ग्रहः-

अस्माकं ऋषिभिः विश्वस्य प्रत्येक पदार्थः चित्स्वरूपः स्वीकृतः। परम्परायामस्या ग्रहा अपि चित्स्वरूपाः देवांशभूताः मन्यन्ते। पाठ्यांशेऽस्मिन् ग्रहाणां पिण्डात्मक स्वरूपं दैहिक स्वरूपं च प्रतिपादितम्। विश्वस्य सर्वेषु जीवेषु ग्रहाणां प्रभावो भवति। जन्मकाले ये ग्रहाः बलशालिनः भवन्ति, मनुष्यस्य दैहिक स्वरूपं गुणाश्च तत्ग्रहवत् भवन्ति। अतः ग्रहाणां यत् दैहिक स्वरूपं प्रतिपादितम्। तत्स्वरूपमेव मनुष्यस्य भवति। यथा जन्मकाले शुक्रो बली भवति चेत् मनुष्यस्य स्वरूपं शुक्रवत्। चन्द्रो बली भवति चेत् मनुष्यस्य स्वरूपमपि चन्द्रवत् । भवति। मनुष्यस्य स्वरूपज्ञानाय ग्रहाणां स्वरूपस्य ज्ञानं परममा-वश्यकम्। अतः ग्रहाणां स्वरूपं प्रयासेन ज्ञेयम्।

**ग्रहदशाप्रमाणम्**

मानवजीवनस्य सम्पूर्णजीवनकाले कानिचित् प्रमुखकालखण्डानि भवन्ति, कानिचिद् अन्तर-प्रत्यन्तरकालखण्डानि च जायन्ते। एतेषां सर्वेषामपि सम्बन्धः विभ्-ाजनाधारेण सूक्ष्मातिसूक्ष्ममानवजीवनस्य उपयोगिकालस्य शुभाशुभत्वनिर्धारणं च वर्तते। जातकस्य जन्मकालाधारेण जन्माङ्के यदा कस्यचिदपि योगस्य उपलब्धिः सञ्जायते, तदा तस्य योगस्य शुभाशुभफलं कदा भविष्यतीति निर्धारणं जातकस्य दशामाध्यमेनैव क्रियते। यतो हि दशा एव फलस्य कालसूचकोऽस्ति। तत्र प्रायः सर्वेष्वपि जातकग्रन्थेषु दशाप्रमुखत्वेन पञ्चधा विभक्ताऽस्ति, सा च महादशा-अन्तर्दशा- प्रत्यन्तर्दशा-सूक्ष्मद-शा-प्राणदशा नाम्ना विश्रुता वर्तते तद्यथा -

"दशा चान्तर्दशा चौव विदशोपदशा तथा।

प्राणाख्या च फलं तासां वदेच्छास्त्रानुसारतः।।"

तत्र आदित्यादिनवग्रहाणामात्मनः यो शुभाशुभो वा स्वभावः तदनुसारेण एव मन्-ुष्याणां शुभाशुभफलं वाच्यम्। तत्र यदि जन्मकुण्डल्यां ग्रहः उच्चस्थः शुभयुतो वा तदा शुभफलप्रदः, यदि च पापयुतः नीचस्थस्तदा अशुभफलदो भवतीति। अस्मिन् प्रसङ्ग आचार्यपराशरेणापि प्रतिपादितं यत् -

"न दिशेयुर्ग्रहाः सर्वे स्वदशासु स्वभुक्तिषु।

शुभाशुभफलं नृणामात्मभावानुरुपतः।।"

आचार्येण दशाविचारविषये सर्वाधिक सयुक्तिक सप्रमाणं च विवरणं प्रतिपादितम्, यत्र बह्वीनां दशानां गणना, साधनपद्धतिः तत्फलञ्च निरुपितम्। परञ्च वराहमिहि-राचार्यस्य ग्रहदशावर्षप्रमाणसम्बन्धिनी प्रक्रिया सर्वेभ्योऽचार्येभ्यो भिन्ना दृश्यते

**ग्रहदशाप्रमाणम् -**

तत्र ग्रहाणां दशान्तर्दशाज्ञानार्थमादौ ग्रहस्य आयुर्दायः कर्तव्यः। यदस्माभिः गताध्याये ग्रहायुर्दायः, लग्नायुर्दायः साधनप्रकारश्च पठितः। तत्र सर्वादौ ग्रहाणामायुर्दायः यद् विहितं तत्र यद् वर्षप्रमाणं तदेव तस्य ग्रहस्य दशावर्षाण्यपि परिकल्पनीयानि। पुनः ग्रहाणां शुभाशुभफलमपि दशायामेव बोध्यम्। तन्नाम यदि जातकस्य जन्मकाले यो ग्रहः सम्यग्बलवान् स्यात्तदा तस्य ग्रहस्य दशान्तर्दशाकाले शरीरारोग्य धनवृद्धिभिः

